सुखिनः स्याममाधवेत्यर्जुनोक्तमपाकृतम् ३२ ननु नाहं सुखफलकामः नकांक्षे विजयं कृष्ण अपि त्रैलोक्यराज्यस्येत्युक्तत्वा
त्कथं मया कर्तव्यमित्याशंक्याकरणे दोषमाह अथेति पक्षांतरे इमं भीष्मद्रोणादिवीरपुरुषपाति योगिकं धर्म्यं हि सांदिशे
षेणादुष्टं सतां धर्मादनपेतमितिवा सच मनुनाद र्शितः न कूटैरायुधैर्हन्याद्युध्यमानो रणे रिपून्। न कर्णिभिर्नापि दिग्धैः नाग्नि

अथ चेत्त्वमिमं धर्म्यं संग्रामं न करिष्यसि ततः स्वधर्मं कीर्तिं च हित्वा पापमवाप्स्यसि ३३

ज्वलिततेजनैः न च हन्यात्स्थलारूढं न क्लीबं न कृतांजलिं नमुक्तकेशं नासीनं नतवास्मीतिवादिनं। नसुप्तं नविसन्नाहं न
नग्नं ननिरायुधं नायुध्यमानं पश्यंतं न परेण समागतं नायुध॰ व्यसनप्राप्तं नार्त्तं नातिपरिक्षतं नभीतं नपरावृत्तं सतां धर्म
मनुस्मरन्निति। सतां धर्ममुल्लंघ्य युध्यमानो हि पापी यान्स्यात् वं तु परैराहूतोपि सद्धर्मोपेतमपि संग्रामं युद्धं न करिष्यसि
धर्मतो लोकतो वा भीतः पराङ्मुखो भविष्यसि ते तोनिर्दिष्टयपरसैन्यानिहि सिं धर्मेण पालयेदित्यादि दित्यादिशास्त्रविहितस्य ५९
युद्धस्याकरणात्स्वधर्मं हित्वाऽननुष्ठाय कीर्तिं च महादेवादि समागमनिमित्तां हित्वा न निवर्तेत संग्रामादित्यादिशा
स्त्रविहितसंग्रामानिवर्त्तनाचरणजन्यं पापमेव केवलमवाप्स्यसि न तु कीर्तिं धर्मं चेत्यभिप्रायः। अथवा अनेकजन्मार्जितं

धि तज्जा सुकृतान्यत्रैव हतानां विषत्त्वायिना मिति तेभ्य युद्धे पापमेवाश्रये दस्मान् हंतैतानाततायिनः ४

धर्म॰ स्वकृतपापमेवाप्स्यसीत्यर्थः। यस्मात् पराहन्तमेतेदुष्टा अवश्यं हनिष्यन्ति अतः पराहत्तः हतः सन् परोपार्जितमि
दुष्कृतं परस्मिंनपरोपार्जितं दुष्कृतमात्मन्यारोपितमित्यभिप्रायः तथा च मनुः। यस्तु भीतः पराहत्तः संग्रामे हन्यते
परैः दुष्कृतं किंचित्तत्सर्वं प्रतिपद्यते। यच्चास्य सुकृतं किंचिदमुत्रार्थमुपार्जितं भर्त्ता तत्सर्वमादत्ते पराहत्तस्य हतस्य
इति। ... निराकृतं भवति ३४ एवं कीर्तिधर्मयोरप्राप्तिरिति द्विष्यो
... निष्ठा मिष्टतोपिमधुसू॰ निराकृतं भवति
ज्ञापनसम्य प्राप्तियुद्धपरित्यागे दर्शिता। तत्र पापाख्यमनिष्टं यत्नधानं न दुःखफलदमामुत्रिकत्वात्। शिष्टगर्हितत्वाच्चानिष्ट
मास्वफलदमसह्यमित्यत आह भूतानि देवर्षिमनुष्यादीनि तेतव अव्ययां दीर्घकालां अकीर्तिं न धर्ममिति युक्तरे

अकीर्तिं चापि भूतानि कथयिष्यन्ति तेऽव्ययाम् संभावितस्य चाकीर्तिर्मरणादतिरिच्यते ३४

... कृपांकथयिष्यंत्यन्योन्यं च अपि शब्दे कीर्तिहानिः समुच्चयार्थो निपातः। न केवलं कीर्तिधर्मौ हित्वा पापं प्राप्स्य
... अपि तु अकीर्तिं प्राप्स्यसि न केवलं त्वं नेतां प्राप्स्यसि अपि तु भूतान्यपि कथयिष्यंतीति वा येदानयोरर्थः। ननु युद्धे
... दुःखाणसंदेहात्तत्परिहारार्थमकीर्तिरपि सोढव्या ... नापेक्षितत्वात्। तथा वोक्तं शांतिपर्वणि
... नेन भेदेन समस्तैरुतवापृथक्। विजेतुं ... युध्येत कदाचन। अनित्यो विजयो यस्माद्दृश्यते युध्यमान
... संग्रामे तस्माद्युद्धं विवर्जयेत् ... नां पूर्वेषां नाम संभवे। तस्माद्युद्धे संशयो विजये

४५।

॥रि पूज्यश्चेति। एवमेवमनुनाप्युक्तं। तथा च मरणाभीतस्य किमकीर्त्तिदुःखमिति शंकामपनुदति संभावितस्य धर्मात्मा शूर
इत्येवमादिभिरनन्यलभ्यैर्गुणैर्बहुमतस्य जनस्याकीर्त्तिर्मरणादप्यतिरिच्यते अधिका भवति। ततो हेतो एवं यस्मात्ततोऽकी
र्त्तेर्मरणमेव वरं न्यूनत्वात्त्वमपि अतिसंभावितोसि महादेवादिसमागमेन अतो नाकीर्त्तिदुःखं सोढुं शक्ष्यसीत्यभिप्रायः। उदा
सतत्ववचनं चार्थशास्त्रवान्न निवर्तेत संग्रामादित्यादि धर्मशास्त्राद्दुर्बलमिति भावः। ३५ ननूदासीना मां निंदंतु नाम भीष्म
द्रोणादयस्तु महारथाः कारुणिकत्वेन स्तोष्यंति मामित्यत आह करुणादिभ्यो भयाद्युद्धान्निवृत्तं न कोऽपि जना× पि यतित्वां मं

भयाद्रणादुपरतं मंस्यंते त्वां महारथाः येषां च त्वं बहुमतो भूत्वा यास्यसि लाघवम् ३६।१
अवाच्यवादांश्च बहून् वदिष्यंति तवाहिताः निंदंतस्तव सामर्थ्यं ततो दुःखतरं नु किम् ३७।१

स्यंते भीष्मद्रोणदुर्योधनादयो महारथाः। ननु ते मां बहुमन्यमानाः कथं भीतं मंस्यंत इत्यत आह येषामेव भीष्मादीनां त्वं बहुम
तो बहुभिर्गुणैर्युक्तोयमर्जुन इत्येव मतस्त एव त्वां महारथा भयादुपरतं मंस्यंत इत्यन्वयः। अतो भूत्वा युद्धादुपरत इति शेषः।
लाघवं अनादरविषयतां यास्यसि प्राप्स्यसि सर्वेषामिति शेषः। येषामेव त्वं प्राग्बहुमतो भूस्तेषामेव तादृशो भूत्वा लाघवं या
स्यसीति वा ३६ ननु भीष्मादयो महारथा न बहुमन्यंतां दुर्योधनादयस्तु शत्रवो बहुमंस्यंते युद्धनिवृत्त्या तदुपकारेणेत्यादिरि
त आह तवासाधारणं यत्सामर्थ्यं लोकप्रसिद्धं तन्निंदंतस्तव शत्रवो दुर्योधनादयः। अवाच्यान्वादान्वचनानर्हान् शंढतिल
दिरूपान्बहुशब्दान्बहून् अनेकप्रकारान् वदिष्यंति न तु बहुमंस्यंत इत्यभिप्रायः। अथवा तव सामर्थ्यं स्तुतियोग्यत्वं त

वनिंदंतोऽहिता अवाच्यवादान्वदिष्यंतीत्यन्वयः। ननु भीष्मद्रोणादिवधप्रयुक्तं कष्टतरं दुःखमसहमानो युद्धान्निवृत्तः शत्रु
कृतं सामर्थ्यनिंदनादिदुःखं सोढुं शक्ष्यामीत्यत आह। तव सामर्थ्यनिंदाप्राप्तिदुःखात्किं नु दुःखतरं ततोऽधिकं किमपि दुःखं
नास्तीत्यर्थः। ३७ ननु तर्हि युद्धे गुर्वादिवधवशान्मध्यस्थकृता निंदा ततो निवृत्तौ तु शत्रुकृता निंदेत्युभयतः पाशारज्जु
रित्याशंक्य जये पराजये च लाभध्रौव्याद्युद्धार्थमुत्थानमावश्यकमित्याह स्पष्टं पूर्वार्द्धं यस्मादुभयथापि ते लाभस्तस्मात् जेष्यामि
शत्रून्मारिष्यामि वेति कृतनिश्चयः सन् युद्धायोत्तिष्ठ अन्यतरफलसंदेहेपि युद्धकर्त्तव्यताया निश्चितत्वात्। एतेन न चैतद्विद्मः कतरन्नो

हतो वा प्राप्स्यसि स्वर्गं जित्वा वा भोक्ष्यसे महीं तस्मादुत्तिष्ठ कौंतेय युद्धाय कृतनिश्चयः ३८ ।१।
सुखदुःखे समे कृत्वा लाभालाभौ जयाजयौ ततो युद्धाय युज्यस्व नैवं पापमवाप्स्यसि ३९।१

गरीयस्त्वादि परिहृतम्। ३८ नन्वेवं स्वर्गमुद्दिश्य युद्धकरणे तस्य नित्यत्वव्याघातः राज्यमुद्दिश्य युद्धकरणे चार्थशास्त्रत्वाद्धर्म
शास्त्रापेक्षया दौर्बल्यं स्यात्तथ काम्यस्याकरणे कुतः पापं दृष्टार्थस्य गुरुब्राह्मणादिवधस्य कृतो धर्मत्वं तथा चाथ वेदिति श्लो॰
कार्थोऽत्याहत इति चेत्तत्राह। समता करणं रागद्वेषराहित्यं। सुखे तत्कारणे लाभे तत्कारणे जये च रागमकृत्वा एवं दुःखे तद्धेतावल
लाभे तद्धेतौ पराजये च द्वेषमकृत्वा ततो युद्धाय युज्यस्व सन्नद्धो भव। एवं सुखकामनां दुःखनिवृत्तिकामनां वा विहाय स्वकर्मबुध्या
युध्यमानो गुरुब्राह्मणादिवधनिमित्तं नित्यकर्माकरणनिमित्तं च पापं न प्राप्स्यसि। यस्तु फलकामनया करोति स गुरुब्राह्मण
दिवधनिमित्तं प्राप्नोति। यो वा न करोति स नित्यकर्माकरणनिमित्तं। अतः फलकामनां त्यक्त्वा कुर्वन्नुभयविधमपि पापं न प्राप्नोः

गी॰टी॰ २

५१ तीति [illegible]व्याख्यातोऽभिप्रायः। हतो वा प्राप्स्यसि स्वर्गं जित्वा वा भोक्ष्यसे महीमिति [illegible]नुषंगिकफलकथनमिति न दोषः। तथाचापस्तं
बस्मृतिः। तद्यथा [illegible] फलार्थे निमित्ते [illegible] अनूत्पद्यंते [illegible] वेदमूलत्वं तेन धर्महानिर्भवती-
ति अतो युद्धशास्त्रस्यार्थशास्त्रत्वाभावात् मेवाधर्म [illegible] शङ्का भवति ३९ ननु भवतु स्वधर्मबुद्ध्या युध्यमानस्य
पापाभावः तथापि मां प्रति युद्धकर्तव्यतोपदेशः [illegible] निहतार्थमित्यादिना कथं स पुरुषः पार्थ कं घातयति हंति कमि
त्यनेन विदुषः [illegible] कर्म प्रति हेतुत्वनिषेधात् कर्तृभोक्तृत्वशून्य [illegible] युद्धक्रियातत्फलं भोक्ष्य इति च ज्ञानं संभवति। विरोधात् ज्ञा
नकर्मणोः समुच्चयासंभवात् प्रकाशतमसोरिव अयं चार्जुनाभिप्रायो ज्यायसी चेदित्यत्र व्यक्तो भविष्यति। तस्मादेकमेव मां प्रति ज्ञा
नस्य कर्मणश्चोपदेशो नोपपद्यत इति चेत् न हि द्विविदवस्थाभेदेन ज्ञानकर्मणोर्द्वयोरुपपत्तेरित्याह भगवान् एषा तेऽभिहिता सां
ख्ये बुद्धिर्योगे त्विमां शृणु। बुद्ध्या युक्तो यया पार्थ कर्मबंधं प्रहास्यसि ४० एवं तावदशोच्यानित्याद्येकोनविंशतिश्लोकैः हेतुभा
मभिहिता सांख्ये [illegible] परमात्मतत्त्वमनयेति संख्योपनिषत् तयैव तात्पर्यपरिस
माप्त्या प्रतिपाद्यते यः सांख्यः औपनिषदः पुरुषस्तदर्थः। तस्मिन् बुद्धिस्तन्मात्रविषयं ज्ञानं सर्वानर्थनिवृत्तिकारणं [illegible]
योर्के [illegible] तादृशज्ञानवतः [illegible] निवृत्ते [illegible] यदि पुनरेवं मयोक्तेऽपि तव [illegible] ५३
ति देवित्त दोषात् तदात [illegible] यकर्मयोग एव त्वयानुष्ठेयः। तस्मिन् योगे कर्मयोगे तु करणीयां [illegible]
खदुःखे समे कृत्वेत्यत्रोक्त [illegible] विस्तरेण मया वक्ष्यमाणां शृणु तु शब्दः पूर्व बुद्धेर्यो [illegible]

सु व्यतिरेकसूचनार्थः। तथान्तःशुद्धांतःकरणं प्रति ज्ञानोपदेशोऽशुद्धांतःकरणं प्रति कर्मोपदेश इति कुतः समुच्चयशंकया वि
[illegible] धावकाशइत्यभिप्रायः। योगविषयां बुद्धिं फलकथनेन स्तौति। यया व्यवसायात्मिकया बुद्ध्या कर्मसु युक्तस्त्वं कर्मनिमित्तं बं
धं ज्ञानप्रतिबंधकरूपेण पुनः प्रतिबंधानुत्पत्तिरूपेण हास्यसि त्यक्ष्यसि अयं भावः कर्मनिमित्तो ज्ञा
नप्रतिबंधः कर्मणैव धर्माख्येनापनेतुं शक्यते। धर्मेण पापमपनुदतीति श्रुतेः श्रवणादिलक्षणो विचारस्तु कर्मात्मकः
तिबंधरहितस्यासंभावनादिप्रतिबंधं दृष्टद्वारेणापनयतीति न कर्मबंधनिराकरणाय पर्याप्त इति शक्यते अतोऽस्येव मलिनां
तःकरणस्य बहिरंगसाधनं कर्मैव क्रियानुष्ठेयं नाधुना श्रवणादियोग्यतापि तव जाता हरे ज्ञानयोग्यतेति तथाचदस्थानि
कर्मण्येवाधिकारस्त इति। एतेन सांख्यबुद्धेरंतरंगसाधनं श्रवणादि विहाय बहिरंगसाधनं कर्मैव भगवता [illegible] मर्जुना
[illegible] एतेन सांख्यबुद्धे रंतरंग साधनं श्रवणादि विहाय बहिरंगसाधनं कर्मैव भगवता [illegible]
[illegible] पदिश्यत इति निरस्तं। कर्मबंधं संसारमीश्वरप्रसादनिमित्तज्ञानप्राप्त्या प्रहास्यसीति प्राचां व्याख्याने त्वध्याहारदोषः
कर्मविदं वेदयथं च न परिहर्तव्यम् ४० ननु तमेतं वेदानुवचनेन ब्राह्मणा विविदिषंति यज्ञेन दानेन तपसानाशकेनेति श्रुत्या वि
विदिषां ज्ञानं वोद्दिश्य संयोगपृथक्त्वन्यायेन सर्वकर्मणां विनियोगात् तत्वांतःकरणशुद्धिद्वारा तं प्रति कर्मानुष्ठानं विधी
[illegible] तत्तद्यथेह कर्मजितो लोकः क्षीयत एवमेवामुत्र पुण्यजितो लोकः क्षीयत इति श्रुतिबोधितस्य फलनाशस्य संभवात् [illegible]
[illegible] विविदिषां वोद्दिश्य क्रियमाणस्य यज्ञादेः काम्यायाः सर्वांगोपसंहारेणानुष्ठेयस्य यत्किंचिदंगासंपत्तावपि वैगुण्योपपत्तेः
यजेतेत्यादिवाक्यविहितानां च सर्वेषां कर्मणामेकेनपुरुषेणायुषपर्यवसानेऽपि कर्तुमशक्यत्वात् कुतः कर्मबंधं प्रहास्यसी

गी.टी.
२
५२

ति[illegible]शेषत आह भगवान् [illegible] नेहाभिक्रमनाशोऽस्ति प्रत्यवायो न विद्यते स्वल्पमप्यस्य धर्मस्य त्रायते [illegible]
[illegible] तिकर्मणा [illegible] मद्य थेत्यादिना प्रतिपादितः [illegible] निष्कामक [illegible]
[illegible] स्य बुद्धेः [illegible] भावेन [illegible] संभवात् [illegible] पर्यवसायाए [illegible]
[illegible] व्यवधानेना [illegible] फलं [illegible] स्य फलमजनयित्वा नाशासंभवादिह फल [illegible]
[illegible] तदुक्तं तदर्थे हेतियानि [illegible] दासा फलेन तु [illegible] फले [illegible] कृतं कर्म विशुद्धिकृदिति [illegible]
निबंधनेनैगुण्यं वादेः [illegible] गुण्यं [illegible] हन [illegible] कोटि [illegible] त्यानामेवापात [illegible] यज्ञा [illegible] विविदिषायां विनियोगात् [illegible]
[illegible] भावात्कामानां [illegible] संयोगपृथक्त्वन्यायेन विनियोग इति पक्षे [illegible] फलाभिसंधिरहितत्वेन [illegible]
[illegible] नित्यानि [illegible] कश्चिद्दोषोऽस्ति फलाभिसंधितदभावाभ्यामेव तु काम्यत्वनित्यत्वे [illegible]
[illegible] नादीनामेक [illegible] नलक्षणे । तमेतं मितिवाक्येन क्रियानि [illegible] विधि
[illegible] विविदिषार्थं [illegible] मितिवाक्येन संयोगपृथक्त्वेन तदिति तथा च फलाभिसंधि [illegible] ५२
[illegible] स्वर्गे [illegible] शुद्ध्यर्थकर्म [illegible] ब्राह्मणि [illegible] दिना समाप्ति [illegible]
[illegible] शुद्ध्यर्थस्य [illegible] मत्यादिवा [illegible] विहितस्य [illegible] स्वल्प

मपि संस्कारयेति कर्मयत्न यावा यथाशास्त्रं भगवदाराधनार्थं किंचिदप्यनुष्ठितं सत् महतः संसारभयात् त्रायते भगवत्प्रसादसंपादने
नानुष्ठानात् संस्कृतिसर्वपापक्षयकोपि ध्यायन्निमिषमच्युतं। भूयस्तपस्वी भवति पंक्तिपावनपालन इत्यादिस्मृतेः। तमेतमितिवाक्ये
समुच्चयविधायकाभावाच्च सुकृति तारतम्याद्देवानुष्ठानतारतम्योपपत्तेर्युक्तमुक्तं कर्मबंधं प्रहास्यसीति ४१ एतदुपपादनाय [illegible]
मितिवाक्यविहितानामेकार्थमाह हे कुरुनंदन इह श्रेयोमार्गे तमेतमितिवाक्ये वा व्यवसायात्मिका आत्म [illegible] निश्चयात्मिका बुद्धिरेकैव
तुर्णामाश्रमाणां साध्याविवक्षितावेदानुवचनेनेत्यादौ तृतीयाविभक्त्या प्रत्येकं निरपेक्षसाधनत्व बोधनाद्विविदिषार्थे हि दर्शपूर्णमासाभि
तिवद्विद्दृक्स्य तेनयदग्नये च प्रजापतये चेति वच्चशब्देन न तथा नकिंचित्प्रमाणम स्तीत्यर्थः। सांख्यविषया योगविषया च बुद्धिरेकफला दे

व्यवसायात्मिका बुद्धिरेकेह कुरुनंदन बहुशाखा ह्यनंताश्च बुद्धयोऽव्यवसायिनाम् ४१

का व्यवसायात्मिका सर्वविपरीतबुद्धीनां बाधिका निर्दोषवेदवाक्यसमुत्थत्वादितरास्त्वव्यवसायिनां बुद्धयो बाध्या इत्यर्थ इति भाष्यकृतः
अन्ये तु परमेश्वराराधनेनैव संसारं तरिष्यामीति निश्चयात्मिका एकनिष्ठैव बुद्धिरिह कर्मयोगे भवतीत्यर्थमाहुः। सर्वथापि तु ज्ञानकांड
तु सारेण स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयादित्युपपन्नं। कर्मकांडे पुनर्बहुशाखाश्चानेकभेदाः कामानामनेकभेदत्वादनंताश्च क
र्मफलगुणफलादिप्रकारोपशाखाभेदाद्बुद्धयो भवंत्यव्यवसायिनां तत्तत्फलकामनानां बुद्धीनामानंत्यप्रसिद्धिद्योतनार्थो हि शब्दः।
अतः काम्यकर्मापेक्षया महद्वैलक्षण्यं शुद्ध्यर्थकर्मणामित्यभिप्रायः ४१ श्रीमन्नंदकुमारश्रीराधिकारमणो जं

श्री·टी· अव्यवसायिनामपि व्यवसायात्मिका बुद्धिः कुतो न भवति प्रमाणस्य तुल्यत्वमित्याशंक्य प्रतिबंधकसद्भावान्न भवतीत्याह त्रिभि
५२ र्यामिमां यावदर्शितया वाचापहृतचेतसामविपश्चितां व्यवसायात्मिका बुद्धिर्न भवतीत्यन्वयः। इमामध्ययनविध्युपात्तत्वेन प्रसिद्धां
पुष्पितां पुष्पितपलाशवदापातरमणीयां साध्यसाधनसंबंधप्रतिभानान्निरतिशयफलाभावाच्च ... निरतिशयफलत्वाभासामा
दाह। जन्मकर्मफलप्रदां जन्म चापूर्वशरीरेंद्रियादिसंबंधलक्षणं तदधीनं च कर्म तत्र ... अभिमाननिमित्तं तदधीनं च
यामिमां पुष्पितां वाचं प्रवदंत्यविपश्चितः वेदवादरताः पार्थ नान्यदस्तीति वादिनः ४३
कामात्मानः स्वर्गपरा जन्मकर्मफलप्रदां क्रियाविशेषबहुलां भोगैश्वर्यगतिं प्रति ४४
भोगैश्वर्यप्रसक्तानां तयापहृतचेतसां व्यवसायात्मिका बुद्धिः समाधौ न विधीयते ४५
जन्म स्वर्गादिलक्षणं विनश्वरं तानि प्रकर्षेण घटीयंत्रवदविच्छेदेन ददातीति तथा तां कुत एवमत आह भोगैश्वर्यगतिं प्रति
... ... ... ... ... ...भोगस्तत्कारणं च यदैश्वर्यं देवादिस्वामित्वं तयोर्गतिं प्राप्तिं ... ५२
याविशेषबहुलां अमृतपानोर्वशीविहारपारिजातपरिमलादिनिबंधनो यो भोगस्तत्कारणं च ... क्रियाविशेषबहुलां विस्तृतां अतिबाहुल्येन
योगतिं प्राप्तिं प्रति साधनभूता ये क्रियाविशेषा अग्निहोत्रदर्शपूर्णमासज्योतिष्टोमादयस्तैर्बहुलां विस्तृतां अतिबाहुल्येन
भोगैश्वर्यसाधनक्रियाकलापप्रतिपादिकामित्यावत्। कर्मकांडस्य हि ... कांडापेक्षया सर्वत्रातिविस्तृतत्वं प्रसिद्धम्। एता

दृशीं कर्मकांडलक्षणां वाचं प्रवदंति प्रकृष्टां परमार्थस्वर्गादिफलामभ्युपगच्छंतीति ये केऽविपश्चितः विचारजन्यतात्पर्यपरिज्ञानशू
न्याः। अत एव वेदवादरताः वेदे ये संति वादा अर्थवादाः अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवतीत्येवमादयस्तेष्वेव रता वे
दार्थसत्यत्वेन एवमेवैतदिति मिथ्याविश्वासेन संतुष्टाः। हे पार्थ अत एव नान्यदस्तीति वादिनः कर्मकांडापेक्षया नास्त्यन्यज्ज्ञा
दे नकांडं सर्वस्यापि वेदस्य कार्यपरत्वात् कर्मफलापेक्षया चनास्त्यन्यं निरतिशयं ज्ञानफलमिति वदनशीलाः महता प्रबंधेन ज्ञान
कांडविरुद्धार्थभाषिण इत्यर्थः। कुतो मोक्षद्वेषिणस्ते यतः कामात्मानः काम्यमानविषयशताकुलचित्तत्वेन काममयाः एवं
सति मोक्षमपि कुतो न कामयंते यतः स्वर्गपराः स्वर्ग एवोर्वश्याद्युपेतत्वेन परं उत्कृष्टो येषां ते तथा स्वर्गातिरिक्तः पुरुषार्थो
नास्तीति भ्राम्यंतो विवेकवैराग्याभावान्मोक्षकथामपि सोढुमक्षमा इति यावत्। तेषां च पूर्वोक्तयोर्भोगैश्वर्ययोः प्रसक्तानां
कृषिवादिदोषादर्शनेन निविष्टांतःकरणानां तया क्रियाविशेषबहुलया वाचापहृतमाच्छादितं चेतो विवेकविज्ञानं येषां तथा
भूतानां अर्थवादास्त्यर्थाः तात्पर्यविषये प्रमाणांतराबाधिते वेदस्य प्रामाण्यमिति सुप्रसिद्धमपि ज्ञातुमशक्तानां समाधावं
तःकरणे व्यवसायात्मिका बुद्धिर्न विधीयते न भवतीत्यर्थः। समाधिविषया व्यवसायात्मिका बुद्धिस्तेषां न भवतीति वा अधिकरणे
विषये वा सप्तम्यास्तुल्यत्वात्। विधीयत इति कर्मकर्तरि लकारः। समाधीयतेऽस्मिन् सर्वमिति व्युत्पत्त्या समाधिरंतःकरणं वा
परमात्मा वेति ना प्रसिद्धार्थकल्पनं। अयं भावः ... एवमवस्थानं समाधिस्तन्निमित्तं व्यवसायात्मिका बुद्धिर्नोत्पद्यत इति व्याख्या
ने तु रूढिरेवादृता। अयं भावः यद्यपि काम्यान्यग्निहोत्रादीनि शुद्ध्यर्थेभ्यो न विशिष्यंते तथापि फलाभिसंधिदोषान्नाशय

२ गी०टी०
५७

शुद्धिं संपादयंति भोगास्तु गुणानुशुद्धिर्नज्ञानोपयोगिनीत्येतदेव दर्शयितुं भोगैश्वर्यप्रसक्तानामिति पुनरुपात्तं फलाभिसंधिमंतरेणानु
ष्ठितानि ज्ञानोपयोगिनीं शुद्धिमादधतीति सिद्धं विपश्चिदविपश्चितोः फलवैलक्षण्यं विस्तरेणैवेतदग्रे प्रतिपादयिष्यते ४४ ननु स
कामानां माभूदाशयदोषाद्व्यवसायात्मिका बुद्धिः निष्कामानां तु व्यवसायात्मकबुद्ध्या कर्मकुर्वतां कर्मस्वाभाव्यात्स्वर्गादिफलप्राप्तौ
ज्ञानप्रतिबंधः समान इत्याशंक्याह त्रयाणां गुणानां कर्म त्रैगुण्यं काममूलः संसारः स एव प्रकाश्यत्वेन विषयो येषां तादृशा वेदाः
कर्मकांडात्मकाः यो यत्फलकामस्तस्यैव तत्फलं बोधयंतीत्यर्थः। नहि सर्वेभ्यः कामेभ्यो दर्शपूर्णमासाविति विनियोगेपि सकृदनुष्ठा
नात्सर्वफलप्राप्तिर्भवति तत्तत्कामनाविरहात् यत्फलकामनया नुतिष्ठति तदेव फलं तस्मिन् प्रयोग इति स्थितं योगसिद्ध्यधिकरणे
।थ त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्जुन निर्द्वंद्वो नित्यसत्वस्थो निर्योगक्षेम आत्मवान् ४५
यस्मादेवं कामनाविरहे फलविरहः तस्मात्त्वं निस्त्रैगुण्यो निष्कामो भव हे अर्जुन। एतेन कर्मस्वाभाव्यात्संसारो निरस्तः। ननु
शीतोष्णादिद्वंद्वप्रतीकाराय वस्त्राद्यपेक्षणात् कुतो निष्कामत्वमत आह निर्द्वंद्वः सर्वत्र भवेति संबध्यते। मात्रास्पर्शास्तितिक्षस्वेत्युक्तन्या
येन शीतोष्णादिद्वंद्वसहिष्णुर्भव असह्यं दुःखं कथं वा सोढव्यमित्यपेक्षायामाह नित्यसत्वस्थः नित्यमचंचलं यत्सत्वं धैर्यापरपर्या ५७
यं तस्मिंस्तिष्ठतीति तथा रजस्तमोभ्यामभिभूतस्तु शीतोष्णादिपीडया मरिष्यामीति मन्वानो धर्माद्विमुखो भवति त्वं तु रज
स्तमसी अभिभूय सत्वमात्रालंबनो भव। ननु शीतोष्णादि सहनेपि क्षुत्पिपासादिप्रतीकारार्थं किंचिदनुपात्तमुपादेयमुपा

त्तं च रक्षणीयमिति तदर्थं यत्ने क्रियमाणे कुतः सत्वमित्यत आह निर्योगक्षेमः अलब्धलाभो योगः लब्धपरिरक्षणं क्षेमस्तद्रहितो भव
चित्तविक्षेपकारिपरिग्रहरहितो भवेत्यर्थः। नचैवं चिंता कर्तव्याकथमेवं सति जीविष्यामीति यतः सर्वांतर्यामी परमेश्वर एव तव यो
गक्षेमादिनिर्वाहयिष्यतीत्याह। आत्मवान् आत्मा परमात्मा ध्येयत्वेन योगक्षेमादिनिर्वाहकत्वेन च वर्तते यस्य स आत्मवान् सर्वकामनापरि
त्यागेन परमेश्वरमाराधयतो मम स एव देहयात्रामात्रमपेक्षितं संपादयिष्यतीति निश्चिंत्य निश्चिंतो भवेत्यर्थः। आत्मवान् अप्रमत्तो भवे
ति वा ४५ नचैवं शंकनीयं सर्वकामनापरित्यागेन कर्म कुर्वन्महतैस्तैः कर्मजनितैरानंदैर्वंचितः स्यामिति यस्मात् उदपाने क्षुद्रजला
शये जातावेकवचनं यावानर्थः यावत्स्नानपानादिप्रयोजनं भवति सर्वतः संप्लुतोदके महति जलाशये तावानर्थो भवत्येव यथा हि पर्वत

यावानर्थ उदपाने सर्वतः संप्लुतोदके तावान्सर्वेषु वेदेषु ब्राह्मणस्य विजानतः ४६

निर्झराः सर्वतः स्रवंतः क्वचिदुपत्यकामेकत्र मिलंति तत्र प्रत्येकं जायमानमुदकप्रयोजनं समुदिते सुतरां भवति सर्वेषां निर्झराणामे
कत्रैव कासारे तद्भावात् एवं सर्वेषु वेदेषु वेदोक्तेषु काम्यकर्मसु यावानर्थो हैरण्यगर्भानंदपर्यंतः तावान्विजानतो ब्रह्मतत्वं साक्षा
त्कृतवतो ब्राह्मणस्य ब्रह्मत्वभूषणो भवत्येव क्षुद्रानंदानां ब्रह्मानंदांशत्वात् तत्क्षुद्रानंदानामंतर्भावादेतस्यैवानंदस्यान्यानि भूतानि
मात्रामुपजीवंतीति श्रुतेः। एकस्याप्यानंदस्याविद्याकल्पिततत्तदुपाधिपरिच्छेदमादायांशांशिवद्व्यपदेशः आकाशस्येव घटाद्य
वच्छेदकल्पनया। तथा च निष्कामकर्मभिः शुद्धांतःकरणस्य तत्वात्मज्ञानोदये परब्रह्मानंदप्राप्तिः स्यात् तत्रैव च सर्वानंदप्राप्तो नक्षु

२ गी॰टी॰ द्ब्रानंदप्राप्तिनिबंधनवैयर्थ्यावकाशः अतःपरमानंदप्रापकायतत्वज्ञानायनिष्कामकर्माणिकुर्वित्यभिप्रायः। अत्रयथातथाभवृत्ती
५५ तिपदत्रयाध्याहारःयावानर्थताबानितिपदद्वयानुषंगःदार्ष्टांतिकेद्रष्टव्यः। ४७ ननुनिष्कामकर्मणिरात्मज्ञानंसंपाद्यपरमानंद
प्राप्तिःक्रियतेवेदांतात्मज्ञानमेवसंपाद्यंकिंबहुआयासैःकर्मभिर्बहिरंगसाधनभूतैरित्याशंक्याह तत्रवाशुद्धांतःकरणस्यतात्कालि
कज्ञानोत्पत्त्ययोग्यस्यकर्मण्येवांतःकरणशोधके अधिकारोमयेदंकर्तव्यमितिबोधोस्तुनतुज्ञाननिष्ठारूपेवेदांतवाक्यविचारादौक
र्मचकुर्वतस्तवतत्फलेषुस्वर्गादिषुकदाचनकस्यांचिदवस्थायांकर्मानुष्ठानात्प्रागूर्ध्वंतत्कालेवा अधिकारोमयेदंभोक्तव्यमिति

कर्मण्येवाधिकारस्तेमाफलेषुकदाचन माकर्मफलहेतुर्भूर्मातेसंगोस्त्वकर्मणि ४८

बोधोमास्तुननुमयेदंभोक्तव्यमितिबुद्ध्यभावेपिकर्मस्वसामर्थ्यादेवफलंजनयिष्यतीतिचेन्नेत्याह माकर्मफलहेतुर्भूःफल
कामनयाहिकर्मकुर्वन्फलस्यहेतुरुत्पादकोभवतित्वंतुनिष्कामःसन्कर्मफलहेतुर्माभूः नहिनिष्कामेनभगवदर्पणबुद्ध्या ग्रम॰
कृतंकर्मफलायकल्पतइत्युक्तंफलाभावेपिकर्मणांमातेसंगोस्त्वकर्मणि यदिफलंनेष्यतेकिंकर्मणादुःखरूपेणेतिअकरणेतव
प्रीतिर्माभूत् ४८ पूर्वोक्तमेवविवृणोति योगस्थःकुरुकर्माणिसंगंत्यक्त्वाधनंजय। सिद्ध्यसिद्ध्योःसमोभूत्वासमत्वंयोगउ ५५
च्यते ४९ हेधनंजयत्वंयोगस्थःसन्संगंफलाभिलाषंकर्तृत्वाभिनिवेशंवत्यक्त्वाकर्माणिकुरु। अत्रबहुवचनात्कर्मण्येवाधिका
रस्तइत्यत्रजातावेकवचनं। संगत्यागोपायमाह। सिद्ध्यसिद्ध्योःसमोभूत्वाफलसिद्धौहर्षफलासिद्धौचविषादंत्यक्त्वाकेवलमीश्वरा

राधनबुद्ध्याकर्माणिकुर्वित्यर्थः। ननुयोगशब्देनप्राक्कर्मोक्तं अत्रतुयोगस्थःकर्माणिकुर्वित्युच्यते। अतःकथमेत[illegible]
मित्यत्राह। समत्वंयोगउच्यते सिद्ध्यसिद्ध्योःसमत्वंयोगस्थ[illegible]योगशब्देनोच्यतेनतुकर्ममात्रकोपिविशेषइ
त्यर्थः। अत्रपूर्वार्धश्लोकोत्तरार्धेनव्याख्यानंक्रियतेइत्ययोनरूपितमितिभाष्यकारीयःपंथाः। सुखदुःखेसमेकृत्वालाभालाभौजयाजयौ
म्येनयुद्धमात्रकर्तव्यताप्रकृतत्वादुक्ताइहतुदृष्टादृष्टसर्वफलपरित्यागेनसर्वकर्मकर्तव्यतेतिविशेषः। ४९ [illegible]किंकर्मा
व णुष्ठानमेवपुरुषार्थोयेननिष्फलमेसदाकर्तव्यमित्युच्यते। प्रयोजनमनुद्दिश्यनमंदोपिप्रवर्ततइतिन्यायात्। नहिरफलका
मनयेवकर्मानुष्ठानमितिचेन्नेत्याह दूरेणह्यवरंकर्मबुद्धियोगाद्धनंजय। बुद्धौशरणमन्विच्छकृपणाःफलहेतवः ५०
बु[illegible]योगात्आत्मबुद्धिसाधनभूतान्निष्कामकर्मयोगात् दूरेणातिविप्रकर्षेणावरमधमंकर्मफलाभिसंधिनाक्रियमाणं
[illegible]रणहेतुभूतांअथवापरमात्मबुद्धियोगात्दूरेणावरंसर्वमपिहियस्मात्हेधनंजयतस्मात्बुद्धौपरमात्मबुद्धौश
[illegible]निवृत्तिकार्यांशरणंप्रतिबंधकपापक्षयेणरक्षकंनिष्कामकर्मयोगंअन्विच्छकर्तुमिच्छयेतुफलहेतवःफलकामास्तेअवरं
कर्मकुर्वंतितेकृपणाःसर्वदाजन्ममरणादिघटीयंत्रभ्रमणेनपरवशाः[illegible]सर्वथा[illegible]
[illegible]कालेतिसकृपणइतिश्रुतेः[illegible]सर्वनिषेध[illegible]वर्जकास्मज्ञानोत्पादकं[illegible]
कर्मयोग[illegible]प्रायः।यथा[illegible]दुःखेनधनमर्ज्यतेतोप्यकिंचिद्[illegible]भेनदानादिजनि

२ गी॰टी॰ तमहत्सुखमनुभवितुं नशक्नुवंती यात्मानमेववंचयंति। तथाम हता दुःखेन कर्माणि कुर्वाणाः क्षुद्रफलमात्रलोभेन परमानं
५६ दानुभवेन वंचिता इत्यहो दौर्भाग्यं मौढ्यं च तेषामिति कृपणपदेन ध्वनितं ५० एवं बुद्धियोगाभावे दोषमुक्त्वा तद्वतो गुणा
माह इह कर्मसु बुद्धियुक्तः समत्वबुद्ध्या युक्तो जहाति परित्यजति। उभे सुकृतदुःकृते पुण्यपापे सत्वशुद्धिज्ञानप्राप्तिद्वारेणाय
स्मादेवं तस्मात्त्वं समत्वबुद्धियोगाय युज्यस्व घटस्व उद्युक्तो भव यस्मादीदृशः समत्वबुद्धियोग ईश्वरार्पितचेतसः कर्मसु प्रव
र्तमानस्य कौशलं कुशलभावः यद्बंधहेतुनामपि कर्मणां तदभावो मोक्षपर्यवसायित्वं च तन्महत्कौशलं समत्वबुद्धियुक्तः क

बुद्धियुक्तो जहातीह उभे सुकृतदुष्कृते तस्माद्योगाय युज्यस्व योगः कर्मसु कौशलं ५१
कर्मजं बुद्धियुक्ता हि फलं त्यक्त्वा मनीषिणः जन्मबंधविनिर्मुक्ताः पदं गच्छंत्यनामयम् ५२

र्मयोगः कर्मात्मापि सन्दुष्टकर्मक्षयं करोतीति महाकुशलस्त्वं तु न कुशलो यतस्त्वं तेनोपि सन्न जानासि यद्दुष्टकृत्यं न करोषीति व्यतिरेको
त्र ध्वनितः। अथवा इह समत्वबुद्धियुक्ते कर्माणि कृते सति सत्वशुद्धिद्वारेण बुद्धियुक्तः परमात्मसाक्षात्कारवान्सन् जहात्युभे सुकृतदुष्कृ
ते तस्मात्समत्वबुद्धियुक्ताय कर्मयोगाय युज्यस्व यस्मात्कर्मसु मध्ये समत्वबुद्धियुक्तः कर्मयोगः कौशलं कुशलः इष्टकर्मनिवारणचतु
र इत्यर्थः ५१ ननु दुष्कृतहानमपेक्षितं न तु सुकृतहानं पुरुषार्थभ्रंशापत्तेरित्याशंक्य तुच्छफलत्यागेन परमपुरुषार्थप्राप्तिं फलमाह
समत्वबुद्धियुक्ता हि यस्मात्कर्मजं फलं त्यक्त्वा केवलमीश्वराराधनार्थं कर्माणि कुर्वाणाः सत्वशुद्धिद्वारेण मनीषिणस्तत्वमस्यादि
वाक्यजन्यात्ममनीषावंतो भवंति तादृशाश्च संतो जन्मात्मकेन बंधेन विनिर्मुक्ताः विशेषेणात्यंतिकवलकृतेन निरवशेषं मुक्ताः ५६

पदं पदनीयं मात्मतत्वमानंदरूपं ब्रह्म अनामयमविद्यातत्कार्यात्मकरोगरहितमभयं मोक्षाख्यं पुरुषार्थं गच्छंत्यभेदेन प्राप्नुवंतीत्यर्थः।
यस्मादेवं फलकामनां त्यक्त्वा समत्वबुद्ध्या कर्माण्यनुतिष्ठंतस्तैः कृतांतःकरणशुद्धयस्तत्वमस्यादिप्रमाणोत्पन्नात्मतत्वज्ञानविन
ष्टाज्ञानतत्कार्याः संतः सकलानर्थनिवृत्तिपरमानंदप्राप्तिरूपं मोक्षं विष्णोः परमं पदं गच्छंति तस्मात्त्वमपि यथोक्तः स्या इति निश्चितं
भूहितमेवेत्युक्तेः श्रेयोर्थिना मुमुक्षुणा सर्वविधं कर्मयोगमनुतिष्ठेति भगवतोभिप्रायः ५२ एवं कर्माण्यनुतिष्ठतः कदा मे सत्वशुद्धिः स्यादित्यत्रा
ह न चैतावता कालेन सत्वशुद्धिर्भवतीति कालनियमोस्ति किंतु यदा यस्मिन्काले तेन तव बुद्धिरंतःकरणं मोहकलिलं व्यतितरिष्यति अ

यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्यति तदा गंतासि निर्वेदं श्रोतव्यस्य श्रुतस्य च ५३
श्रुतिविप्रतिपन्ना ते यदा स्थास्यति निश्चला समाधावचला बुद्धिस्तदा योगमवाप्स्यसि ५४

विवेकात्मकं कालुष्यं अहमिदं ममेदमित्याद्यज्ञानविलसितमतिगहनं व्यतिक्रमिष्यति निरङ्क्षत्सूमीमलमपहाय शुद्धभावमापत्स्य
ते इति यावत् तदा तस्मिन्काले श्रोतव्यस्य श्रुतस्य च कर्मफलस्य निर्वेदं वैतृष्ण्यं गंतासि परीक्ष्य लोकान्कर्मचितान्ब्राह्मणो नि
र्वेदमायादिति श्रुतेः। निर्वेदेन फलेनांतःकरणशुद्धिं ज्ञास्यसीत्यभिप्रायः ५२ अंतःकरणशुद्ध्यैव जातनिर्वेदस्य कदा ज्ञान
प्राप्तिरित्यपेक्षायामाह तेन तव बुद्धिः श्रुतिभिर्नानाविधफलश्रवणैः विचालिता तात्पर्ये विप्रतिपन्ना अनेकविधसंशयविपर्यास
वत्त्वेन विक्षिप्ता प्राक् यदा यस्मिन्काले शुद्धिजविवेकजनितेन दोषदर्शनेन तं विक्षेपं परित्यज्य समाधौ परमात्मनि निश्चला नाग्र
त्वभदर्शनलक्षणविक्षेपरहिता अचला सुषुप्तिमूर्छास्तब्धीभावादिरूपलयलक्षणचलनरहिता सती स्थास्यति लब्धविवे

फलश्रुतौ दोषोपरित्यज्य समाहिता अनिश्चलीति अथवा निश्चला असंभावनाविपरीतभावनारहिता अचला दीर्घकालाद
रनैरन्तर्यसत्कारसेवनैर्विजातीयप्रत्ययादूषिता निवातप्रदीपवदात्मनि स्थास्यतीति योजना। तदा तस्मिन्काले योगं जी
वपरमात्मैक्यलक्षणं तत्त्वमस्यादिवाक्यजन्यमखंडसाक्षात्कारं सर्वयोगफलमवाप्स्यसि पुनः साध्यांतराभावात्
त्यः स्थितप्रज्ञो भविष्यसीत्यभिप्रायः ५३ एवं लब्धावसरः स्थितप्रज्ञलक्षणं ज्ञातुमर्जुन उवाच यो हि जीवन्मुक्तो
नितान्यो वक्तुमुक्तलक्षणानि लोपायभूतानीति मन्वानः। स्थिता निश्चला ऽहं ब्रह्मास्मीति प्रज्ञा यस्य स स्थितप्रज्ञोऽवस्थाद्वयवान्स
माधिस्थो व्युत्थितचित्तश्चेति अतो विशिनष्टि समाधिस्थस्य स्थितप्रज्ञस्य का भाषा कर्मणि षष्ठी आष्यतेऽनयेति भाषा लक्षणं

अर्जुन उवाच स्थितप्रज्ञस्य का भाषा समाधिस्थस्य केशव
स्थितधीः किं प्रभाषेत किमासीत व्रजेत किम् ५५

समाधिस्थः स्थितप्रज्ञः केन लक्षणेनान्यैर्व्यवह्रियत इत्यर्थः। स च व्युत्थितचित्तः स्थितधीः स्थितप्रज्ञः स्वयं किं प्रभाषेत स्तुतिनि ५७
न्दादावभिनन्दनद्वेषादिलक्षणं किं कथं प्रभाषेत सर्वत्र संभावनायां लिङ्। तथा किमासीत व्युत्थितचित्तनिग्रहाय कथं बहिरि
न्द्रियाणां निग्रहं करोति तन्निग्रहाभावकाले च किं व्रजेत कथं विषयान्प्राप्नोति तत्कर्तृकभाषणासनव्रजनानि मूढजनविलक्षणा
नि कीदृशानीत्यर्थः। तदेवं चत्वारः प्रश्नाः समाहितस्थितप्रज्ञे एकः व्युत्थिते स्थितप्रज्ञे त्रय इति केचिद्व्याचक्षते
मितया ... लक्षणं रहस्यं वक्तुं समर्थोऽसीति सूचयति ५५

एतेषां चतुर्णां प्रश्नानां क्रमेणोत्तरं भगवानुवाचयावदध्यायसमाप्तिः। कामान्कामसंकल्पादीन्मनोवृत्तिविशेषान्प्रमाणवि
कल्पनिद्रास्मृतिभेदेन तन्त्रान्तरे पञ्चधा प्रपञ्चितान्सर्वान्निरवशेषान्प्रकर्षेण कारणबाधेन यदा जहाति परित्यजति। सर्ववृत्ति
शून्य एव यदा भवति स्थितप्रज्ञस्तदोच्यते समाधिस्थ इति शेषः। कामानामनात्मधर्मत्वेन परित्यागयोग्यतामाह मनोगता
निति यदि ह्यात्मधर्माः स्युस्तदा न त्यक्तुं शक्येरन्वह्न्यौष्ण्यवत्स्वाभाविकत्वात्। मनसस्तु धर्मा एते अतस्तत्परित्यागेन परित्य
क्तुं शक्या इत्येवं त्वर्थः। ननु स्थितप्रज्ञस्य सुखप्रसादलिंगगम्यः संतोषविशेषः प्रतीयते। स कथं सर्वकामपरित्यागे स्यादित्य

श्रीभगवानुवाच प्रजहाति यदा कामान्सर्वान्पार्थ मनोगतान् आत्मन्येवात्मना तुष्टः
स्थितप्रज्ञस्तदोच्यते ५६

तत्राह आत्मन्येव परमानंदरूपे न त्वनात्मनि तुच्छे आत्मना स्वप्रकाशचिद्रूपेण भासमानेन तुष्टस्त्यात् तुष्टः परितृप्तः प
रमपुरुषार्थलाभात् तथा च श्रुतिः यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि श्रिताः। अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नु
त इति। तथा च समाधिस्थः स्थितप्रज्ञ एवंविधैर्लक्षणवाचिभिः शब्दैर्भाष्यत इति प्रथमप्रश्नस्योत्तरं ५६
इदानीं व्युत्थितस्य स्थितप्रज्ञस्य भाषणोपवेशनगमनानि मूढजनविलक्षणानि व्याख्येयानि। तत्र किं प्रभाषेतेत्यस्य
उत्तरमाह द्वाभ्यां दुःखानि त्रिविधानि शोकमोहज्वरशिरोरोगादिनिमित्तान्याध्यात्मिकानि व्याघ्रसर्पादिप्रयुक्ता
न्याधिभौतिकानि अतिवाताविवर्षाद्यादिहेतुकान्याधिदैविकानि। तेषु दुःखेषु रजःपरिणामसंतापात्मकचित्तवृत्तिविशे

येष्वप्रारब्धपापकर्मप्रापितेषु नोद्विग्नं दुःखपरिहाराक्षमतया व्याकुलं न भवति मनो यस्य सोऽनुद्विग्नमनाः। अविवेकिनो हि
दुःखप्राप्तौ सत्यामहो पापोऽहं धिङ्मां दुरात्मानमेतादृशदुःखभागिनं को मे दुःखमीदृशं निराकुर्यादित्यनुतापात्म
को भ्रान्तिरूपस्तामसश्चित्तवृत्तिविशेष उद्वेगाख्यो जायते यद्ययं पापानुष्ठानसमये स्यात्तदा तत्प्रतिबंधकत्वेन सफ
लः स्यात्। भोगकाले तु भवन्कारणे सति कार्यस्योच्छेत्तुमशक्यत्वात् निष्प्रयोजनो दुःखकारणे सत्यपि किमिति मम
दुःखं जायत इत्यविवेकभ्रमरूपत्वात्। न विवेकिनः स्थितप्रज्ञस्य संभवति दुःखमात्रं हि प्रारब्धकर्मणा प्राप्यते न तु तदु
द्वेगाख्यो भ्रमोऽपि न तु दुःखोत्तरकारणत्वात् सोऽपि प्रारब्धकर्मतिरेण प्राप्यतामिति चेन्न स्थितप्रज्ञस्य भ्रमोपादा

दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते ५६

नाज्ञाननाशेन भ्रमासंभवात्। तज्जन्यदुःखप्रापकप्रारब्धाभावात्। यथा कथंचिद्देहयात्रामात्रनिर्वाहकप्रारब्धक
र्मफलस्य च भ्रमाभावेऽपि बाधितानुवृत्त्योपपत्तेरिति विस्तरेणाग्रे वक्ष्यते। तथा सुखेषु सत्त्वपरिणामरूपप्रीत्या
त्मकचित्तवृत्तिविशेषेषु त्रिविधेषु प्रारब्धपुण्यकर्मप्रापितेषु विगतस्पृहः आगामितज्जातीयसुखस्पृहारहितः ५८
स्पृहा हि नाम सुखानुभवकाले तज्जातीयसुखस्य कारणं धर्ममनुष्ठाय तथैव तदाकांक्षारूपा तामसी चित्तवृत्तिः
र्न तिरेव सा चाविवेकिन एव जायते न हि कारणाभावे कार्यं भवितुमर्हति। अतो यथा सति कार्यं आ भूदिति तृष्णाकां

क्षारूप उद्वेगो विवेकिनो न संभवति तथैवासति कारणे कार्यं भूयादिति तृष्णाकांक्षारूपा तामसिका स्पृहापि नो
पपद्यते प्रारब्धकर्मणः सुखमात्रप्रापकत्वात्। हर्षात्मिका वा चित्तवृत्तिः स्पृहाशब्देनोक्ता सापि भ्रान्तिरेव अहो ध
न्योऽहं यस्य ममेदृशं सुखमुपस्थितं को वा मया तुल्योऽस्ति भुवने केनोपायेन ममेदृशं सुखं न विच्छिद्येतेत्येवमाभि
कोत्फुल्लतारूपा तामसी चित्तवृत्तिः। अत एवोक्तं भाष्ये नाग्निरिवेंधनाद्याधानेन यः सुखान्यनुविवर्धते स विग
तस्पृह इति वक्ष्यति च न प्रहृष्येत्प्रियं प्राप्य नोद्विजेत्प्राप्य चाप्रियमिति। सापि न विवेकिनः संभवति भ्रान्तित्वात्।
तथा वीतरागभयक्रोधः रागः शोभनाध्यासनिबंधनो विषयेषु रंजनात्मकश्चित्तवृत्तिविशेषोऽत्यन्ताभिनिवेश
रूपः। रागविषयस्य नाशके समुपस्थिते तन्निवारणासामर्थ्यमात्मनो मन्यमानस्य दैन्यात्मकचित्तवृत्तिविशेषो भ
यं। एवं रागविषयविनाशके समुपस्थिते तन्निवारणसामर्थ्यमात्मनो मन्यमानस्याभिज्वलनात्मकचित्तवृत्ति
विशेषः क्रोधः। ते सर्वे विपर्ययरूपत्वाद्विगता यस्मात्स तथा एतादृशो मुनिर्मननशीलः संन्यासी स्थितप्रज्ञ
उच्यते एवंलक्षणः स्थितधीः स्वानुभवप्रकटनेन शिष्यशिक्षार्थमनुद्वेगनिस्पृहत्वादि वाचः प्रभाषत इत्यन्वे
यः उक्तः। एवं चान्योऽपि मुमुक्षुर्दुःखे नोद्विजेत्सुखेन प्रहृष्येत् रागभयक्रोधरहितश्च भवेदित्यभिप्रायः
५७ किंच सर्वत्र देहजीवनादिष्वपि यो मुनिरनभिस्नेहः यस्मिन्सति अन्यदीये हानिवृद्धी स्वस्मिन्नारो
प्येते स तादृशोऽन्यविषयः प्रेमापरपर्यायस्तामसो वृत्तिविशेषः स्नेहः सर्वप्रकारेण तद्रहितोऽनभिस्नेहः। भगव

तिपरमात्मनि तु सर्वथाऽभिस्नेहवान्भवेदेव अनात्मस्नेहाभावस्य तदर्थत्वादिति द्रष्टव्यं। तत्तत् प्रारब्धकर्मप्रापितं शुभं सु
खहेतुं विषयं प्राप्य नाभिनंदति हर्षविशेषपुरःसरं न प्रशंसति अशुभं दुःखहेतुं विषयं प्राप्य न द्वेष्टि अंतरसूयापूर्वकं
न निंदति अज्ञस्य हि सुखहेतुर्यः स्वकलत्रादिः स शुभो विषयस्तद्गुणकथनादिप्रवर्तिका धीवृत्तिर्भ्रांतिरूपाऽभिनं
दः स च तामसः तद्गुणकथनादेः परप्ररोचनार्थत्वाभावेन व्यर्थत्वात्। एवमसूयोत्पादनेन दुःखहेतुः परकीयविद्याप्रक
र्षादिरेनं प्रत्यशुभो विषयस्तन्निंदादिप्रवर्तिका भ्रांतिरूपा धीवृत्तिर्द्वेषः सोपि तामसः तन्निंदाया निवारणार्थत्वा

यः सर्वत्रानभिस्नेहस्तत्तत्प्राप्य शुभाशुभम्। नाभिनंदति न द्वेष्टि तस्य प्रज्ञा प्रतिष्ठिता ५८।२।
यदा संहरते चायं कूर्मोंगानीव सर्वशः। इंद्रियाणींद्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता।१।५९

भावेन व्यर्थत्वात्। तावभिनंदद्वेषौ भ्रांतिरूपौ तामसौ कथमभ्रांते शुद्धसत्वे स्थितप्रज्ञे संभवेतां तस्माद्विवालकाभावात्तस्या
नभिस्नेहस्य हर्षविषादरहितस्य मुनेः प्रज्ञा परमात्मतत्वविषया प्रतिष्ठिता फलपर्यवसायिनी स स्थितप्रज्ञ इत्यर्थः। एव
मन्योपि मुमुक्षुः सर्वत्रानभिस्नेहो भवेत् शुभं प्राप्य न प्रशंसेत् अशुभं प्राप्य न निंदेदित्यभिप्रायः। अत्रौ निंदाप्रशंसादि
रूपा वाचो न प्रभाषत इति व्यतिरेकउक्तः।५८ इदानीं किमासीतेति प्रश्नस्योत्तरं वक्तुमारभते षड्भिः श्लोकैः तत्र प्रारब्ध ५८
कर्मवशाद्व्युत्थानेन विक्षिप्तानींद्रियाणि पुनरुपसंहृत्य समाध्यर्थमेव स्थितप्रज्ञस्योपवेशनमिति दर्शयितुमाह अयं व्युत्थि
तः सर्वशः सर्वाणींद्रियाणि इंद्रियार्थेभ्यः शब्दादिभ्यः सर्वेभ्यः चः पुनरर्थे यदा संहरते पुनरुपसंहरति संकोचयति तत्र दृष्टां

तः कूर्मोंगानीव तदा तस्य प्रज्ञा प्रतिष्ठितेति स्पष्टम्। पूर्वश्लोकाभ्यां व्युत्थानदशायामपि सकलतामसभाव उक्तः अधुना तु पु इत्य
नः समाध्यवस्थायां सकलवृत्त्यभाव इति विशेषः ५९ ननु मूढस्यापि रोगादिवशाद्विषयेभ्य इंद्रियाणामुपसंहरणं भवति
तत्कथं तस्य प्रज्ञा प्रतिष्ठितेत्युक्तमत आह निराहारस्येंद्रियैर्विषयाननाहरतो देहिनो देहाभिमानवतो मूढस्यापि रोगिणः
काष्ठतपस्विनो वा विषयाः शब्दादयो विनिवर्तंते किंतु रसवर्जं रसस्तृष्णा तं वर्जयित्वा अज्ञस्य विषया निवर्तंते न तद्विषयो रागस्त
न निवर्तत इत्यर्थः। अस्य तु स्थितप्रज्ञस्य परं पुरुषार्थं दृष्ट्वा तदेवाहमस्मीति साक्षात्कृत्य स्थितस्य रसोपि क्षुद्रसुखरागोपि

विषया विनिवर्तंते निराहारस्य देहिनः। रसवर्जं रसोप्यस्य परं दृष्ट्वा निवर्तते २। ६०
यततो ह्यपि कौंतेय पुरुषस्य विपश्चितः। इंद्रियाणि प्रमाथीनि हरंति प्रसभं मनः।१। ६१

निवर्तते अपिशब्दाद्विषयाश्च। तथा च यावानर्थ इत्यादौ व्याख्यातं। एवं च सरागविषयनिवृत्तिः स्थितप्रज्ञलक्षणमिति न
मूढे व्यभिचार इत्यर्थः। यस्मान्नासति परमात्मसम्यग्दर्शने सरागविषयोच्छेदः तस्मात्सरागविषयोच्छेदिकायाः सम्यग्दर्श
नात्मिकायाः प्रज्ञायाः स्थैर्यं महता यत्नेन संपादयेदित्यभिप्रायः ६० तत्र प्रज्ञास्थैर्ये बाह्येंद्रियनिग्रहो मनोनिग्रह
श्चासाधारणं कारणं तदुभयाभावे प्रज्ञानाशदर्शनादिति वक्तुं बाह्येंद्रियनिग्रहाभावे प्रथमं दोषमाह हे कौंतेय यत
तः भूयो भूयो विषयदोषदर्शनात्मकं यत्नं कुर्वतोपि चः हि कोऽपि कारणादनुदात्तेतो नावश्यकमात्मनेपदमिति ज्ञापनात्

परस्मै॰॰॰मविरुद्धं। विपश्चितः अत्यंतविवेकिनोऽपि पुरुषस्य मनः क्षणमात्रं निर्विकारं कृतमपि इंद्रियाणि हरंतिविकारं प्रापयंतीत्य
थ विरोधिविवेके सतिकुतोविकारप्राप्तिस्तत्राह प्रमाथीनि प्रमथनशीलानि अतिबलीयस्त्वाद्धि विवेकोपमर्दनक्षमाणि अतः अर्थस
मंप्रसह्यबलात्कारेणपश्यत्येवविपश्चितिस्वामिनि विवेके चरक्षकेसति सर्वप्रमाथित्वादेवेंद्रियाणि विवेकजप्रज्ञायां प्रविष्टंमन
स्ततः प्रच्याव्यस्वविषयाविष्टत्वेन हरंतीत्यर्थः। हिशब्दः प्रसिद्धिं द्योतयति प्रसिद्धो लोके ह्ययमर्थो यथा प्रमाथिनो दस्यवः
मेवधनिनं धनरक्षकं चाभिभूय तयोः पश्यतोरेव धनं हरंतितथेंद्रियाण्यपि विषयसन्निधानेमनोहरंतीति ६० एवं तर्हितत्
प्रतीकारः कइत्यत आह तानींद्रियाणि ज्ञानकर्मसाधनभूतानि संयम्य वशीकृत्य युक्तः समाहितः निगृहीतमनाः सन्नासीत

तानिसर्वाणिसयम्ययुक्तआसीतमत्परः वशेहियस्येंद्रियाणितस्यप्रज्ञाप्रतिष्ठिता ६१।।

निर्व्यापारस्तिष्ठेत् प्रमाथिनांकथंस्ववशीकरणमितिचेत्तत्राह मत्परइति। अहंसर्वात्मावासुदेव एव परस्तत्कृष्ट उपादेयो यस्य स
मत्परः एकांतमद्भक्तइत्यर्थः। तथाचोक्तं नवासुदेवभक्तानामशुभं विद्यते क्वचिदिति। यथाहिलोके बलवंतं राजानमाश्रित्य
दस्यवोनिगृह्यंते राजाश्रितोयमितिज्ञात्वाचतेस्वयमेव तद्वश्याभवंति तथैव भगवंतं सर्वांतर्यामिणमाश्रित्य तत्प्रभावेनैव
दुष्टानींद्रियाणिनिग्राह्याणिपुनश्च भगवदाश्रितोयमितिमत्वातानितद्वश्यान्येव भवंतीतिभावः। यथाच भगवद्भक्तेर्महाप्रभाव
त्वंतथाविस्तरेणाग्रेव्याख्यास्यामः। इंद्रियवशीकारे फलमाह वशेहीति। स्पष्टं। तदेवं वशीकृतेंद्रियः सन्नासीतेति स्थिता

॰ तु मनसो बाह्येंद्रियवत् निरोधः सर्वानर्थहेतुत्वं निगृहीतबाह्येंद्रियस्यापि तत्त्ववान् दर्शयति एवं मनसा निगृहीतेनापि न कापि क्षतिः। का
र्यस्योगाभावेनैवकृतार्थत्वेनवादतोयुक्तआसीतेति यदुक्तं तस्याशंक्य निगृहीतबाह्येंद्रियस्यापि युक्तत्वाभावे सर्वानर्थ
प्राप्तिमाह द्वाभ्यां निगृहीतबाह्येंद्रियस्यापि शब्दादीन्विषयान्ध्यायतो मनसा पुनः पुनश्चिंतयतः पुंसस्तेषु विषयेषु संग
आसंगः प्रमाणं सुखहेतुत्व एतद्धर्मतं पीनेनाध्यासलक्षणो प्रीतिविशेषः उपजायते संगात् सुखहेतुत्वज्ञानलक्षणात् सं
जायते कामः अयमेतैर्भवंतितितृष्णाविशेषः तस्मात्कामात्कुतश्चित् प्रतिहन्यमानात् तत्प्रतिघातकविषयः क्रोधोभिजा

ध्यायतोविषयान्पुंसः संगस्तेषूपजायते संगात्संजायतेकामः कामात्क्रोधोभिजायते ६२
क्रोधाद्भवतिसंमोहः संमोहात्स्मृतिविभ्रमः स्मृतिभ्रंशाद्बुद्धिनाशोबुद्धिनाशात्प्रणश्यति ६३।।

लनाशोभिजायते। क्रोधाद्भवतिसंमोहः कार्याकार्यविवेकाभावरूपः। संमोहात्स्मृतिविभ्रमः स्मृतेः शास्त्राचार्योपदिष्टार्थानु
६१ संधानस्य विभ्रमो विचलनं विभ्रंशः। तस्माच्च स्मृतिभ्रंशात् बुद्धेरेकात्म्याकारमनोवृत्तेर्नाशः। विपरीतभावनोपचयदो
षेणप्रतिबंधात् अनुत्पत्तिरुत्पन्नायाश्च फलयोग्यत्वेन विलयः। बुद्धिनाशात् प्रणश्यति तस्याश्च फलभूताया बुद्धेर्लो
पेप्राणधारणमात्रपर्यवसानि। सर्वपुरुषार्थायोग्यो भवति। योहिपुरुषार्थायोग्यो जातः समृत एवेति लोके व्यवह्रियते। अतः प्रणश्य
तीत्युक्तं यस्मादेवं मनसोनिग्रहाभावे निगृहीतबाह्येंद्रियस्यापि परमानर्थप्राप्तिस्तस्मात्तत्प्रयत्नेन मनोनिग्रहः कार्य इति
अभिप्रायः। अतो युक्तमुक्तं तानिसर्वाणि संयम्य युक्त आसीतेति ६४ श्रीवृंदावने राधाकृष्णौ जयतः

मनसि निगृहीते तु बाह्येंद्रियनिग्रहाभावेपि न दोष इति वदन्निंकिं वजेतेत्यस्योत्तरमाहाष्टभिः योगसमाहितचेताः स बाह्यें
द्रियाणि निगृह्यापि रागद्वेषदुष्टेन मनसा विषयांश्चिंतयन्पुरुषार्थाद्भ्रष्टो भवति विधेयात्मा तु तु शब्दः पूर्वस्माद्व्यतिरेका
र्थः वशीकृतांतःकरणस्तु आत्मवश्यैर्मनोधीनैः स्वाधीनैरिति वा रागद्वेषाभ्यां विमुक्तैर्विरहितैरिंद्रियैः श्रोत्रादिभिर्वि
षयान्शब्दादीननिषिद्धान्चरन्नुपलभमानः प्रसादं प्रसन्नतां चित्तस्य स्वच्छतां परमात्मसाक्षात्कारयोग्यतामधिगच्छ
ति रागद्वेषप्रयुक्तानि हींद्रियाणि दोषहेतुतां प्रतिपद्यंते मनसि स्ववशे तु रागद्वेषौ तयोरभावे च न तदधीनेंद्रियवृत्ति

रागद्वेषवियुक्तैस्तु विषयानिंद्रियैश्चरन् आत्मवश्यैर्विधेयात्मा प्रसादमधिगच्छति ६४

प्रसादे सर्वदुःखानां हानिरस्योपजायते प्रसन्नचेतसो ह्याशु बुद्धिः पर्यवतिष्ठते ६५

अवर्जनीयतया तु विषयोपलंभो न दोषमावहतीति न शुद्धिव्याघात इति भावः एतेन विषयाणां स्मरणमपि चेदनर्थका
रणं सुतरां तर्हि भोगः तेन जीवनार्थं विषयान्भुंजानः कथमनर्थं न प्रतिपद्येतेति शंका निरस्ता स्वाधीनेंद्रियैर्विषय
रणं सुतरां तर्हि भोगः तेन जीवनार्थं विषयान्भुंजानः कथमनर्थं न प्रतिपद्येतेति शंका निरस्ता ६४ प्रसादमधिगच्छतीत्युक्तं तत्र प्रसादे सति किं स्यादित्युच्यते चित्तस्य
आध्यात्मिकादीनामज्ञानविलसितानां हानिर्विनाशोऽस्य यतेरुपजायते हि यस्मात्
प्रसादे स्वच्छरूपे सति सर्वदुःखानामाध्यात्मिकादीनामज्ञानविलसितानां हानिर्विनाशोऽस्य यतेरुपजायते हि यस्मात्
सन्नचेतसो यतेराश्वेव बुद्धिर्ब्रह्मात्मैक्याकारा पर्यवतिष्ठते परिसमंतादवतिष्ठते स्थिरा भवति विपरीतभावनादि
प्रतिबंधाभावात् ततश्च प्रसादे सति बुद्धिपर्यवस्थानं ततस्तद्द्विरोध्यज्ञाननिवृत्तिः ततस्तत्कार्यसकलदुःखहानिरिति

कर्मयोगप्रसादे सति ज्ञानविषयमरुंगःस्य
कं तन्मिति नाविभषः ६५ ५३

इममेवार्थं व्यतिरेकमुखेन द्रढयति अयुक्तस्याजितचित्तस्य बुद्धिरात्मविषया श्रवणमननाभ्यां वेदांतविचारजन्या नास्ति नोत्प
द्यते तद्बुद्ध्यभावेन चायुक्तस्य भावना निदिध्यासनात्मिका विजातीयप्रत्ययानंतरितसजातीयप्रत्ययप्रवाहरूपा सर्वत्र नत्वो
स्तीत्यनेनान्वयः न चाभावयत आत्मानं शांतिः सकार्याविद्यानिवृत्तिरूपा वेदांतवाक्यजन्या ब्रह्मात्मैक्यसाक्षात्कृतिः अशांतस्या
त्मसाक्षात्काररहितस्य कुतः सुखं मोक्षानंद इत्यर्थः ६६ अयुक्तस्य कुतो नास्ति बुद्धिरित्यत आह चरतां स्वविषयेषु प्रवर्तमाना
नामवशीकृतानामिंद्रियाणां मध्ये यदेकमपींद्रियमनुलक्षीकृत्य मनो विधीयते प्रेर्यते इति यावत्तदेकमकर्तरि लकारः

नास्ति बुद्धिरयुक्तस्य न चायुक्तस्य भावना न चाभावयतः शांतिरशांतस्य कुतः सुखं ६६

इंद्रियाणां हि चरतां यन्मनोनुविधीयते तदस्य हरति प्रज्ञां वायुर्नावमिवांभसि ६७

तस्माद्यस्य महाबाहो निगृहीतानि सर्वशः इंद्रियाणींद्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता ६८

तदिंद्रियमेकं भूमिमनसानुसृतं अस्य साधकस्य मनसो वा प्रज्ञामात्मविषयां शास्त्रीयां हरति अपनयति मनसस्तद्विलया
विष्टत्वात् यदेकमपींद्रियं प्रज्ञां हरति तदा सर्वाणि हरंतीति किमु वक्तव्यमित्यर्थः दृष्टांतस्पष्टः अंभस्येव वायोर्नौका हर
णसामर्थ्यं न भुवीति तद्वत् वायुमंभसीत्युक्तं एवं दार्ष्टांतिके पंभस्थानीये मनश्चांचल्ये सत्येव प्रज्ञाहरणसामर्थ्यमिंद्रिय
स्य न तु भूस्थानीये मनसि स्थैर्य इत्युक्तं ६७ यस्मादेवं सर्वशः सर्वाणि समनस्कानींद्रियाणि महाबाहो इति संबोधयन्सर्वश
त्रुनिवारणक्षमत्वात् यथा शत्रुनिवारणेपि त्वं क्षमोसीति सूचयति स्पष्टमन्यत् तस्येति सिद्धस्य साधकस्य च परामर्शः
इंद्रियसंयमस्य स्थितप्रज्ञलक्षणत्वस्य मुमुक्षुं प्रति प्रज्ञासाधनत्वस्य चोपसंहरणीयत्वात् ६८

नदेवं मुमुक्षुणा प्रज्ञास्थैर्याय प्रयत्नपूर्वकं [illegible] संयमः कर्तव्य इत्युक्तं। स्थितप्रज्ञस्य तु स्वतः सिद्ध एव सर्वेन्द्रियसंयम इ
त्याह या निशेति [illegible] सा [illegible] सर्वभूतानामज्ञानां निशेव निशा [illegible] प्रकाशरू
पत्वात् तस्यां ब्रह्मनिष्ठायां सर्वभूतनिशायां जागर्ति अज्ञाननिद्रायाः प्रबुद्धः सन् सावधानो वर्तते संयमी इंद्रि
यसंयमवान् स्थितप्रज्ञ इत्यर्थः। यस्यां तु द्वैतदर्शनलक्षणायामविद्यानिद्रायां प्रसुप्ता एव भूतानि जाग्रति स्वप्नवद्व्यव
पश्य हरंति सा निशा [illegible] आत्मतत्त्वं [illegible] अपरोक्षतया मुनेः स्थितप्रज्ञस्य [illegible] प्रवृत्ते तावदेव स्वप्नदर्श
नं बाध्यत इति [illegible] ज्ञानकाले तु न [illegible] निमित्तः कश्चिद्व्यवहारः [illegible] कारकव्यवहारो हि शुद्ध

या निशा सर्वभूतानां तस्यां जागर्ति संयमी। यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः ७०

वस्तुन्यविद्याध्यस्ते [illegible] कारकव्यापृतिस्तथा। काकोलूकनिशेवायं संसारोऽज्ञात्मवेदिनोः। या निशा सर्वभू
तानामित्यवोचत्स्वयं हरिरिति। तथा च यस्य विपरीतदर्शनं तस्य न तत्त्वदर्शनं विपरीतदर्शनिनस्तु तत्त्वदर्शनं नास्त्येवा
त तस्य तत्त्वदर्शनं तस्य न विपरीतदर्शनं विपरीतदर्शनकारणस्य [illegible] तत्त्वदर्शनेन बाधितत्वात् त
था च श्रुतिः यत्र वा अन्यदिव स्यात्तत्रान्योऽन्यत्पश्येत् [illegible] केन कं पश्येदित्यविद्याविद्ययोर्व्यव
स्थामाह यथा काकस्य रात्र्यंधस्य दिनमुलूकस्य [illegible] निशा [illegible] रात्रिरेव सा का
कस्येति महदाश्चर्यं [illegible] दर्शिनः कथमाविधक्रियाकारकादिव्यवहारः [illegible] स्थितप्रज्ञस्येति व

एतादृशस्य स्थितप्रज्ञस्य सर्वविक्षेपशांतिरप्यर्थसिद्धेति सदृष्टांतमाह सर्वाभिर्नदीभिरापूर्यमाणं संतं दृष्टा
दिग्भ्यः वा अपि सर्वा आपः समुद्रं प्रविशंति। कीदृशं अचलप्रतिष्ठं अनतिक्रांतमर्यादं अचलानां मैनाकादीनां
प्रतिष्ठा यस्मिन् इति वा गांभीर्यातिशय उक्तः। यद्वत् येन प्रकारेण निर्विकारत्वेन तद्वत् तेनैव निर्विकारत्वप्रकारे
णायं स्थितप्रज्ञं निर्विकारमेव संतं कामाः अन्यैः लोकैः काम्यमानाः शब्दाद्याः सर्वे विषया अवर्जनीयतया प्रा
रब्धकर्मवशात् प्रविशंति न तु विकर्तुं शक्नुवंति स महासमुद्रस्थानीयः स्थितप्रज्ञः शांतिं सर्वलौकिकालौकि

आपूर्यमाणमचलप्रतिष्ठं समुद्रमापः प्रविशंति यद्वत् तद्वत्
कामा यं प्रविशंति सर्वे स शांतिमाप्नोति न कामकामी ७१

विक्षेप
ककर्मविक्षेपनिवृत्तिं बाधितानुवृत्त्या विद्याकार्यनिवृत्तिं वा प्राप्नोति ज्ञानबलेन। न कामकामी काम्यान् विषयान् कामयि
तुं शीलं यस्य स कर्मकाम्यः स तु शांतिं व्याख्यातां नाप्नोति। अपितु सर्वदा लौकिकालौकिककर्मविक्षेपेण महति
क्लेशार्णवे मग्नो भवतीति वाक्यार्थः। एतेन ज्ञानिन एव फलभूतो विद्वत्संन्यासः स्थितप्रज्ञस्यैव च सर्वविक्षेपनिवृ
त्तिरूपा जीवन्मुक्तिर्देहाधीनविषयभोगेऽपि निर्विकारत्वादिकमुक्तं वेदितव्यं ७१

२ गी॰टी॰ ६३


यस्मादेवं तस्मात्प्राप्तानपि सर्वान्बाह्यान्गृहक्षेत्रादीनांतरांश्च मनोराज्यरूपान्वासनामात्ररूपांश्च पृथग्भूतस्तृण
स्पर्शतुल्यान्कामांस्त्रिविधान्विहायोपेक्ष्य शरीरजीवनमात्रेपि निःस्पृहः सन् यतो निरहंकारः शरीरेंद्रियादावय
महमित्यभिमानशून्यः विद्यावत्त्वादिनिमित्तात्मसंभावनारहित इत्यर्थः अतो निर्ममः शरीरयात्रामात्रार्थेपि प्रा
रब्धकर्माक्षिप्ते कौपीनाच्छादनादौ ममेदमित्यभिमानवर्जितः सन्यः पुमांश्चरति प्रारब्धकर्मवशेन भोगान्भुंक्ते यादृच्छि
कतया यत्र क्वापि गच्छतीति वा स एवंभूतः स्थितप्रज्ञः शांतिं सर्वसंसारदुःखोपरमलक्षणामविद्यातत्कार्यनिवृत्ति

विहाय कामान्यः सर्वान्पुमांश्चरति निःस्पृहः निर्ममो निरहंकारः स शांतिमधिगच्छति ७१
एषा ब्राह्मी स्थितिः पार्थ नैनां प्राप्य विमुह्यति स्थित्वास्यामंतकालेपि ब्रह्मनिर्वाणमृच्छति ७२
इति श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे सांख्ययोगो नाम द्वितीयोध्यायः

मधिगच्छति ज्ञानबलेन प्राप्नोति। तदेतदीदृशं व्रजनं स्थितप्रज्ञस्येति चतुर्थप्रश्नस्योत्तरं परिसमाप्तं ७१
तदेवं चतुर्णां प्रश्नानामुत्तरव्याजेन सर्वाणि स्थितप्रज्ञलक्षणानि मुमुक्षुकर्तव्यतया कथितानि संप्रति कर्मयोगफल या
भूतां सांख्यनिष्ठां फलेन स्तुवन्नुपसंहरति एषा स्थितप्रज्ञलक्षणव्याजेन कथिता एवं तेभिहिता सांख्ये बुद्धिरि
ति च प्रागुक्ता स्थितिर्निष्ठा सर्वकर्मसंन्यासपूर्वकपरमात्मज्ञानलक्षणा ब्राह्मी ब्रह्मविषया हे पार्थ एनां स्थितिं प्राप्य

गी॰टी॰२ ६४

यः कश्चिदपि पुनर्न विमुह्यति नहि ज्ञानबाधितस्याज्ञानस्य पुनः संभवोस्ति अनादित्वेनोत्पत्त्यसंभवात्। अस्यां स्थितौ
अंतकालेपि अंत्येवयसि स्थित्वा ब्रह्मनिर्वाणं ब्रह्मणि निर्वाणं निर्वृतिं ब्रह्मरूपं निर्वाणमिति वा ऋच्छति गच्छत्यभेदे
न किमु वक्तव्यं यो ब्रह्मचर्यादेव संन्यस्य यावज्जीवमस्यां ब्राह्म्यां स्थितौ वर्तते स ब्रह्मनिर्वाणमृच्छतीत्य
पिशब्दार्थः। ज्ञानं तत्साधनं कर्म सत्त्वशुद्धिश्च तत्फलम्। तत्फलं ज्ञाननिष्ठेत्यध्यायेस्मिन्प्रकीर्तितम्
इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीविश्वेश्वरसरस्वतीश्रीपादशिष्यश्रीमधुसूदनसरस्वतीविरचिता
यां श्रीभगवद्गीतागूढार्थदीपिकायां सर्वगीतार्थसूत्रणं नाम द्वितीयोऽध्यायः ग्रंथ ९८


२ गीता·टी·
६४

गी॰टी॰ श्रीकृष्णायनमः ॥ एवंतावत्प्रथमेनाध्यायेनोपोद्घातितो द्वितीयेनाध्यायेन कृत्स्नशास्त्रार्थः सूत्रितः तथाहि आदौ निष्कामकर्मनिष्ठा
६५ ततोंतःकरणशुद्धिस्ततः शमदमादिसाधनपुरःसरः सर्वकर्मसंन्यासः ततो वेदांतवाक्यविचारसहिता भगवद्भक्तिनिष्ठा ततस्तत्त्वज्ञान
निष्ठा तस्याः फलं च त्रिगुणात्मिकाविद्यानिवृत्त्या जीवन्मुक्तिः आरब्धकर्मफलभोगपर्यंतं तदंते च विदेहमुक्तिः जीवन्मुक्तिदशायां च पर
मपुरुषार्थालंबनेन परवैराग्यप्राप्तिः दैवसंपदाख्या च शुभवासना [illegible] आसुरसंपदाख्या अशुभवासनात द्विरोधि
नी हेया दैवसंपदोऽसाधारणं कारणं सात्त्विकी श्रद्धा आसुरसंपदस्तु [illegible] तामसी चेति हेयोपादेयविभागेन कृत्स्नशास्त्रार्थपरि
समाप्तिः तत्र योगस्थः कुरु कर्माणीत्यादिना सूत्रिता सत्त्वशुद्धिसाधनभूता निष्कामकर्मनिष्ठा सामान्यविशेषरूपेण तृतीयच
तुर्थाभ्यां प्रपंचिता ततः शुद्धांतःकरणस्य शमदमादिसाधनसंपत्तिपुरःसरा विहाय कामान्यः [illegible] इत्यादिना सूत्रिता सर्वकर्मसंन्या
सनिष्ठा संक्षेपविस्तररूपेण पंचमषष्ठाभ्यां [illegible] एतावता त्वंपदार्थो निरूपितः ततो वेदांतवाक्यविचारसहिता युक्त आसीत मत्पर
इत्यादिना सूत्रिताऽनेकप्रकारा भगवद्भक्तिनिष्ठाऽध्यायषट्केन प्रतिपाद्यते तावता च तत्पदार्थोपि निरूपितः अष्टमाध्याये [illegible]
गतिमत्वांतरप्रयोजनभेद [illegible] दर्शयिष्यामः ततस्तत्त्वंपदार्थैक्यज्ञानरूपा वेदाविनाशिनं नित्यमित्यादिना सूत्रिता त[illegible]ने
ष्ठा त्रयोदशे प्रकृतिपुरुषविवेकद्वारा प्रपंचिता ज्ञाननिष्ठायाः फलं त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्जुनेत्यादिना सूत्रिता त्रै
गुण्यात्मिक [illegible] चतुर्दशे सैव जीवन्मुक्तिरिति गुणातीतलक्षणकथनेन प्रपंचिता तदा गंतासि निर्वेदमित्यादिना सूत्रिता परवैराग्य
[illegible] छेदद्वारेण पंचदशे दुःखेष्वनुद्विग्नमना इत्यादि स्थितप्रज्ञलक्षणेन सूत्रिता परवैराग्योपकारिणी दैवी संपद ६५
देया यामिमां पुष्पितां वाचमित्यादिना सूत्रिता तद्विरोधिन्यासुरी संपद्धेया षोडशे दैवसंपदोऽसाधारणकारणं च सात्त्विकी श्र
द्धा निर्द्वंद्वो नित्यसत्त्वस्थ [illegible] इत्यादिना सूत्रिता तद्वि [illegible] एवं सफलज्ञाननिष्ठाऽध्यायपंचकेन प्रतिपादिता अष्टा

[illegible] सप्तदशे कृत्स्नः सर्वोपसंहार इति कृत्स्नगीतार्थसंग्रहः [illegible] अध्याये सांख्यबुद्धिमाश्रित्य ज्ञाननिष्ठा भगवतोक्ता। एषा तेऽभिहिता
सांख्ये बुद्धिरित्यन्तया योगबुद्धिमाश्रित्य कर्मनिष्ठा [illegible] योगे त्विमां शृण्वित्यारभ्य कर्मण्येवाधिकारस्ते मा ते संगोऽस्त्वकर्मणि। एतेन न
[illegible] निष्ठाद्वयभेदः स्पष्टमुपदिष्टो [illegible] काधिकारिकत्वमेवोभयोः [illegible] विवक्षितवानिति वाच्यं। दूरेण ह्यवरं
कर्म बुद्धियोगाद्धनंजयेति। कर्मणि [illegible] यानि कृष्ट [illegible] अभिधानात्। [illegible]
तेन [illegible] स्थितप्रज्ञलक्षणमुक्त्वा एषा ब्राह्मी स्थितिः पार्थेति सप्रशंसं ज्ञानफलोपसंहारात्। अपि च [illegible]
[illegible] ज्ञानिनो द्वैतदर्शनाभावेन कर्मानुष्ठानासंभवात् [illegible] अविद्यानिवृत्ति [illegible] फले ज्ञानमात्रस्यैव लोकानुसारे [illegible]
न वक्तव्यत्वात्। तमेव विदित्वाऽतिमृत्युमेति नान्यः पंथा विद्यतेऽयनायेति श्रुतेश्च। न च तर्हि तेऽन्योन्यविरोधिनो [illegible]
[illegible] समुच्चयासंभवात्। भिन्नाधिकारिकत्वमेवास्तु सत्यमेवं संभवति। एकमर्जुनं [illegible] प्रत्युभयोपदेशो न युक्तः। न हि कर्माधिकारि
[illegible] ज्ञाननिष्ठोपदेशमुचितानवाज्ञानाधिकारिणं प्रति कर्मनिष्ठा। एकमेव प्रति विकल्पेन [illegible] उपदेश इति चेन्न। उत्कृष्टनि [illegible]
कल्पानुपपत्तेः। अविद्यानिवृत्त्युपलक्षिता [illegible] रूपे मोक्षे तारतम्यासंभवाच्च। तस्माद् [illegible] निष्ठयोर्भिन्नाधिकारिक [illegible]
६५ पदेशायोगा [illegible] रिकत्वे च विरुद्धयोः समुच्चया संभवात्। कर्मापेक्षया ज्ञानप्रशस्त्यानुपपत्ते [illegible] विकल्पा [illegible]
[illegible] साधनता [illegible] काया सब [illegible] निष्ठा [illegible] मिति [illegible] कुर्वन्तु बुद्धिः ॥ हे [illegible]
[illegible] ते याच्या [illegible] निश्चयार्थं याच्चा सरति नेवानुचितमिति सं [illegible]

कर्मणो निष्कामादपि बुद्धिरात्मतत्त्वविषया ज्यायसी प्रशस्ततरा चेद्यदि ते तव मता तत्तर्हि किं कर्मणि घोरे हिंसाद्यनेकायासबहुले
मामतिजनं नियोजयसि कर्मण्येवाधिकारस्त इत्यादिना विशेषणेन प्रेरयसि हे केशव सर्वेश्वरस्य सर्वेष्टदायिनस्तव मां प्रति शिष्यं त्वे
त्वां शाधि मामित्यादिना त्वदेकशरणतयोपसन्नं प्रति प्रतारणा नोचितेत्यभिप्रायः। २ ननु नाहं किंचिदपि प्रतारयामि किं पुनस्त्वामि
ति प्रियं त्वं तु किं मे प्रतारणा विवक्षुः पश्यसीति चेत्तत्राह। तव वचनं व्यामिश्रं संभवत्येव मम मन्दबुद्धेः कर्माधिकारिकवद्भिन्नाधिकारिकवत्संदेहा
द्व्यामिश्रं संकीर्णार्थमिव ते यद्वाक्यं सांप्रति ज्ञानकर्मनिष्ठाद्वयप्रतिपादकं तेन वाक्येन बुद्धिं मे मम मन्दबुद्धेर्वाक्यतात्पर्यापरिज्ञानाद्बु
द्धिमन्तःकरणं मोहयसीव भ्रान्त्या योजयसीव परमकारुणिकत्वान्न मोहयस्येव मम तु स्वाशयदोषान्मोहो भवतीतीवशब्दार्थः।

अर्जुन उवाच १ ज्यायसी चेत्कर्मणस्ते मता बुद्धिर्जनार्दन तत्किं कर्मणि घोरे मां नियोजयसि केशव २

व्यामिश्रेणेव वाक्येन बुद्धिं मोहयसीव मे तदेकं वद निश्चित्य येन श्रेयोऽहमाप्नुयाम् ३

एकाधिकारित्वे विरुद्धयोः समुच्चयानुपपत्तेरेकार्थत्वाभावेन च विकल्पानुपपत्तेः प्रागुक्तेऽर्थे अधिकारिभेदं मन्यसे तदेकं मां प्रति वि
रुद्धयोर्निश्चयोरुपदेशायोगात्। तत्तु ज्ञानं वा कर्म वा एकमेवाधिकारं मे निश्चित्य वद येनाधिकारनिश्चयपुरःसरमुक्तेन त्वया बो
ध्येन श्रेयो मोक्षमहमाप्नुयां प्राप्तुं योग्यः स्याम्। एवं ज्ञानकर्मनिष्ठयोरेकाधिकारित्वे विकल्पसमुच्चययोः
संभवादधिकारिभेदज्ञानायार्जुनस्य प्रश्न इति स्थितं इह केचिदाहुः कुमतं मम तत्क्षितिमस्मृतिन्यायबलान्निरस्तं पुनः पुनर्भाष्यकृता
तिरस्कृतं तत्कर्तुं महं प्रवृत्तः। भाष्यकारमतसारदर्शिना ग्रन्थमात्रमिह योऽस्ति मया। आशयो भगवतः प्रकाश्यते केवलं स्व
वचसो विशुद्धये ३

एवमधिकारिभेदेऽर्जुनेन पृष्टे तदनुरूपं प्रतिवचनं अस्मिन्नधिकारित्वाभिमते लोके शुद्धाशुद्धान्तःकरणभेदेन द्विविधे जने द्विवि
धा द्विप्रकारा निष्ठा स्थितिः ज्ञानपरता कर्मपरता च पुरा पूर्वाध्याये मया तव त्यन्तहितकारिणा प्रोक्ता प्रकर्षेण स्पष्टत्वलक्षणेनोक्ता
तथा चाधिकारैक्यशंकया मा ग्लासीरिति भावः। हे अनघ अपापेति संबोधयन्नुपदेशयोग्यतामर्जुनस्य सूचयति। एके
वा निष्ठा साध्यसाधनावस्थाभेदेन द्विप्रकारा न तु द्वे एव स्वतन्त्रे निष्ठे इति कथयितुं निष्ठेत्येकवचनं तथा च वक्ष्यति। एकं सांख्यं
च योगं च यः पश्यति स पश्यतीति तामेव निष्ठां द्वैविध्येन दर्शयति संख्या सम्यगात्मबुद्धिस्तां प्राप्तवतां ब्रह्मचर्यादेव कृतसं

श्रीभगवानुवाच लोकेऽस्मिन्द्विविधा निष्ठा पुरा प्रोक्ता मयानघ

ज्ञानयोगेन सांख्यानां कर्मयोगेन योगिनाम् ४

न्यासानां वेदान्तविज्ञानसुनिश्चितार्थानां ज्ञानभूमिमारूढानां शुद्धान्तःकरणानां सांख्यानां ज्ञानयोगेन ज्ञानमेव युज्यते
ब्रह्मणाऽनेनेति व्युत्पत्त्या योगस्तेन निष्ठोक्ता तानि सर्वाणि संयम्य युक्त आसीत मत्पर इत्यादिना अशुद्धान्तःकरणानां तु ज्ञा
नभूमिमनारूढानां योगिनां कर्माधिकारयोगिनां कर्मयोगेन कर्मैव युज्यतेऽन्तःकरणशुद्ध्याऽनेनेति व्युत्पत्त्या योगस्तेन
निष्ठोक्ता अन्तःकरणशुद्धिद्वारा ज्ञानभूमिकारोहणार्थं धर्म्याद्धि युद्धाच्छ्रेयोऽन्यत्क्षत्रियस्य न विद्यत इत्यादिना। अत एव न
ज्ञानकर्मणोः समुच्चयो विकल्पो वा किं तु निष्कामकर्मणा शुद्धान्तःकरणानां सर्वकर्मसंन्यासेनैव ज्ञानमिति विशुद्धयशु

द्धिरूपावस्थाभेदेनैकमेव त्वांप्रति द्विविधा निष्ठोक्ता पूर्वात्तेभिहिता सांख्ये बुद्धियोगे त्विमां शृणु इति। अतो भूमिकाभेदेनैक मेवैतद्भयोपयोगात्अधिकारभेदेनपदेशाद्वैयर्थ्यमित्यभिप्रायः। एतदेव दर्शयितुमशुद्धचित्तस्य चित्तशुद्धिपर्यंतं कर्मानुष्ठानं न कर्मणामनारंभादित्यादि भिर्भगवदा पर्थसन्नीवनीत्यंतेस्त्रयोदशभिर्दर्शयति। शुद्धचित्तस्यतु ज्ञाननिष्ठानकिंचि दपिकर्मापेक्षितमित्येतद्दर्शयति यस्त्वात्मरतिरित्यादिश्लोकाभ्यां। तस्मादसक्तइत्यारभ्य तु बंधहेतोरपिकर्मणो मोक्षहेतुत्वं स त्वशुद्धिज्ञानोत्पत्तिद्वारेण संभवतिफलाभिसंधिराहित्येनपकौशलेनेति दर्शयति। ततः परं तु अथकेनेति प्रश्नमुत्थाप्य का मदोषेणैव काम्यकर्मणः शुद्धिहेतुत्वं नास्ति अतः कामराहित्येनैव कर्माणिकुर्वन्नंतःकरणशुद्ध्या ज्ञानी भविष्यसीति यावद ध्यायसमाप्तिं वदिष्यति भगवान् ८ तत्रकारणाभावेकार्यानुपपत्तेः कर्मणामित्येतं वेदानुवचनेन ब्राह्मणाविवि

न कर्मणामनारंभान्नैष्कर्म्यं पुरुषोऽश्नुते न च संन्यसनादेव सिद्धिं समधिगच्छति ५

दिषंतियज्ञेनदानेन तपसाऽनाशकेनेतिश्रुत्यात्मज्ञाने विनियुक्तानारंभादननुष्ठानान्चित्तशुद्ध्यभावेन ज्ञानयोगो नहि पुरुषः पुरुषो नैष्कर्म्यं सर्वकर्मशून्यत्वं ज्ञानयोगेन निष्ठामिति यावत्। नाश्नुते न प्राप्नोति। नन्वेतमेव प्रव्राजिनो लोकमिच्छंतः प्रव्रजंतीतिश्रुतेः सर्वकर्मसंन्यासादेव ज्ञाननिष्ठोपपत्तेः कृतं कर्मभिरित्यत आह। न च संन्यसनादेव चित्तशुद्धिं विना कृतात्सिद्धिं ज्ञाननिष्ठालक्षणां सम्यक्फलपर्यवसायिनीं नाधिगच्छति नैव प्राप्नोतीत्यर्थः कर्मजन्यां चित्तशुद्धिमं तरेण संन्यास एव न संभवति। यथाकथंचिदौत्सुक्यमात्रेण कृतोपि न फलपर्यवसायीति भावः॥ ॥५॥

तथा कर्मजन्यशुद्ध्यभावे बहिर्मुखः। हि यस्मात्क्षणमपि कालं जातु कदाचित् कश्चिदप्यजितेंद्रियो कर्मकृत् सन्न तिष्ठति अपि तु लौकिके वैदिके वा कर्मानुष्ठानव्यग्र एव तिष्ठति तस्मादशुद्धचित्तस्य संन्यासो न संभवतीत्यर्थः। कस्मात्पुनरविद्वान्कर्मा ण्यकुर्वाणो न तिष्ठति हि यस्मात्सर्वः प्राणी चित्तशुद्धिरहितः अवशः अस्वतंत्र एव सन्प्रकृतिजैः प्रकृतितो जातैरभि व्यक्तैः कार्याकारेण सत्त्वरजस्तमोभिः स्वभावप्रभवैर्वा रागद्वेषादिभिर्गुणैः कर्म लौकिकं वैदिकं वा कार्यते। अतः कर्माण्यकुर्वाणो न कश्चिदपि तिष्ठतीत्यर्थः। यतः स्वाभाविका गुणाश्चालकाः अतः परवशतया सर्वदा कर्माणि कुर्वतोऽशुद्धबुद्धेः सर्वकर्मसंन्यासो

नहि कश्चित्क्षणमपि जातु तिष्ठत्यकर्मकृत् कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणैः ६
कर्मेंद्रियाणि संयम्य य आस्ते मनसा स्मरन् इंद्रियार्थान्विमूढात्मा मिथ्याचारः स उच्यते ७

न संभवतीति न संन्यासनिबंधना ज्ञाननिष्ठा संभवतीत्यर्थः। ६ यथाकथंचिदौत्सुक्यमात्रेण कृतसंन्यासस्त्वशुद्धचित्त त्वात्फलभाङ्न भवतीत्याह। यो विमूढात्मा रागद्वेषादिदूषितांतःकरणः औत्सुक्यमात्रेण कर्मेंद्रियाणि वाक्पाण्यादी नि संयम्य निगृह्य बहिरिंद्रियैः कर्माण्यकुर्वन्निति यावत् मनसा रागादिप्रेरितेन इंद्रियार्थान् शब्दादीन् स्मरन्नात्म तत्त्वं स्मरन् आस्ते कृतसंन्यासोहमित्यभिमानेन कर्मशून्यस्तिष्ठति स मिथ्याचारः सत्त्वशुद्ध्यभावेन फलायोग्यत्वात् पापाचार उच्यते। त्वंपदार्थविवेकाय संन्यासः सर्वकर्मणां। श्रुत्येह विहितो यस्मात्तत्त्यागी पतितो भवेदित्यादि वचनात्। अत उपपन्नं न च संन्यसनादेव अशुद्धांतःकरणः शुद्धिं समधिगच्छतीति ७

गी॰टी॰ २८

औत्सुक्यमात्रेण सर्वकर्माणि संन्यस्यापि लघुद्धये निष्कामकर्माण्येव यथाशास्त्रं कुर्यादित्यस्मात् तु शब्दोऽशुद्धांतःकरणसं
न्यासि व्यतिरेकार्थः इंद्रियाणि ज्ञानेंद्रियाणि श्रोत्रादीनि मनसा सह नियम्य पापहेतुशब्दादिविषयासक्तेर्निवर्त्य मनसा विवे
कयुक्तेन नियम्येति वा कर्मेंद्रियैर्वाक्पाण्यादिभिः कर्मयोगं शुद्धिहेतुतया विहितं कर्मारभते करोत्यसक्तः फलाभिलाष
शून्यः सन् अविवेकी स इतरस्मान्मिथ्याचाराद्विशिष्यते परिश्रमसाम्येपि फलातिशयभाक्त्वेन श्रेष्ठो भवतीत्यर्थः हे अर्जुन आश्च
र्यमिदं पश्य यदेकः कर्मेंद्रियाणि व्यापारयन् पुरुषार्थशून्योऽपरस्तु ज्ञानेंद्रियाणि निगृह्य कर्मेंद्रियाणि व्यापारयन् परम
× निगृह्य ज्ञानेंद्रियाणि ×

यस्त्विंद्रियाणि मनसा नियम्यारभतेऽर्जुन कर्मेंद्रियैः कर्मयोगमसक्तः स विशिष्यते ७
नियतं कुरु कर्म त्वं कर्म ज्यायो ह्यकर्मणः शरीरयात्रापि च ते न प्रसिद्ध्येदकर्मणः ८

पुरुषार्थभाग्भवति ७ यस्मादेवं तस्मान्मनसा ज्ञानेंद्रियाणि निगृह्य कर्मेंद्रियैः त्वं प्रागननुष्ठितसिद्धिहेतुकर्मा निय
तं विध्युद्देशे फलसंबंधशून्यतया नियतं निमित्तेन विहितं कर्म श्रौतं स्मार्तं च नित्यमिति प्रसिद्धं कुरु । कुर्विति मध्यमपुरुषप्र
योगेणैव त्वमिति लब्धे त्वमिति पदमर्थांतरसंक्रमितं । कस्मात् अशुद्धांतःकरणेन कर्मैव कर्तव्यं हि यस्मात् अकर्मणोऽ २८
करणात् कर्मैव ज्यायः प्रशस्यतरं न केवलं कर्माभावेनांतःकरणशुद्धिरेव न सिद्ध्येत् । किंतु अकर्मणो युद्धादिकर्मरहि
शा॰र॰ तस्य ते तव शरीरयात्रा शरीरस्थितिरपि न प्रकर्षेण सा[illegible] न सिद्ध्येत् । तथा च प्रागुक्तं । अपि चेत्यंतःकरण
तं
शुद्धिसमुच्चयार्थः ८

कर्मणा बध्यते जंतुरिति स्मृतेः सर्वं कर्म बंधात्मकत्वात् मुमुक्षुणा न कर्तव्यमिति [illegible] मतं तस्योत्तरमाह । यज्ञः परमेश्वरः यज्ञो वै विष्णु
रिति श्रुतेः तदाराधनार्थं यत् क्रियते कर्म तत् यज्ञार्थं । तस्मात् कर्मणोऽन्यत्र कर्मणि प्रवृत्तो लोकः कर्माधिकारी कर्मबंधनः कर्मणा ब
ध्यते न त्वीश्वराराधनार्थेन । अतस्तदर्थं यज्ञार्थं कर्म हे कौंतेय त्वं कर्मण्यधिकृतो मुक्तसंगः सन् समाचर सम्यक् श्रद्धाशुद्धः समाच
र १० प्रजापतिवचनादप्यधिकृतेन कर्म कर्तव्यमित्याह सहयज्ञा इत्यादि चतुर्भिः सहयज्ञेन विहितकर्मकलापेन वर्तंत इति स
हयज्ञाः कर्माधिकृता इति यावत् उपसर्जनस्यापि सहेः सादेशाभावः । प्रजाः त्रीन् वर्णान् पुराकल्पादौ सृष्ट्वोवाच प्रजानां पतिः ब्र

यज्ञार्थात्कर्मणोऽन्यत्र लोकोऽयं कर्मबंधनः तदर्थं कर्म कौंतेय मुक्तसंगः समाचर १०
सहयज्ञाः प्रजाः सृष्ट्वा पुरोवाच प्रजापतिः अनेन प्रसविष्यध्वमेष वोऽस्त्विष्टकामधुक् ११

ह्मा किं उवाचेत्याह । अनेन यज्ञेन स्वाश्रमोचितधर्मेण प्रसविष्यध्वं प्रसूयध्वं प्रसवो वृद्धिः उत्तरोत्तरामभिवृद्धिं लभध्वमित्यर्थः
कथमनेन वृद्धिः स्यादत आह । एष यज्ञाख्यो धर्मः वो युष्माकं इष्टकामधुक् । इष्टानभिमतान् कामान् काम्यानि फलानि दोग्धि
प्रापयतीति तथा अभीष्टभोगप्रदोऽस्त्वित्यर्थः । अत्र यद्यपि यज्ञग्रहणमावश्यककर्मोपलक्षणार्थं अकरणे प्रत्यवायस्यार्थक
थनात् काम्यकर्मणां च प्रकृते प्रस्तावो नास्त्येव मा कर्मफलहेतुर्भूरित्यनेन निराकृतत्वात् तथापि नित्यकर्मणामप्यानुषं
गिकफलसद्भावादेष वोऽस्त्विष्टकामधुगित्युपपद्यते तथा चापस्तंबः स्मरति तद्यथा आम्रे फलार्थे निर्मिते छायागंध इत्यनू
त्पद्येते एवं धर्मं माणमर्था अनूत्पद्यंते नो चेदनूत्पद्यंते न धर्महानिर्भवतीति । फलसद्भावेपि तदभिसंधानभिसंधिभ्यां काम्य
चर्य

नित्ययोर्विशेषः अनभिसंहितस्यापि वस्तुस्वभावा
उत्पत्तौ न विरोधः [illegible] विस्तरेणाग्रे प्रतिपादयिष्यते २९
भ॰ धा॰

गी॰टी॰
६९

कथमिष्टकामदोग्धृत्वं यज्ञस्येति तदाह अनेनेति अनेन यज्ञेन यूयं यजमाना देवान् इन्द्रादीन् भावयत हविर्भागैः संवर्द्धयत तर्पयतेत्यर्थः।
ते देवाः युष्माभिर्भाविताः सन्तो वो युष्मान् भावयन्तु वृष्ट्यादिना अन्नोत्पत्तिद्वारेण संवर्द्धयन्तु। एवमन्योन्यं संवर्द्धयन्तो देवाश्च यूयं च
परस्परं योऽभिमतमर्थं प्राप्स्यथ देवास्तृप्तिं प्राप्स्यन्ति यूयं च स्वर्गाख्यं परं श्रेयः प्राप्स्यथेत्यर्थः। १२ न केवलं पारत्रिकमेव फलं
यज्ञात् किं त्वैहिकमपीत्याह इष्टानिति अभिलषितान् भोगान् पश्वन्नहिरण्यादीन् वो युष्मभ्यं देवा दास्यन्ते वितरिष्यन्ति हि यस्मात् य
ज्ञैर्भाविताः तोषितास्ते यस्मात् ऋणवद्भवद्भ्यो दत्ता भोगास्तस्मात् तैर्देवैर्दत्तान् भोगान् एभ्यो देवेभ्योऽप्रदाय यज्ञेषु देवो — य

देवान्भावयतानेन ते देवा भावयन्तु वः परस्परं भावयन्तः श्रेयः परमवाप्स्यथ १२
इष्टान्भोगान्हि वो देवा दास्यन्ते यज्ञभाविताः तैर्दत्तानप्रदायैभ्यो यो भुङ्क्ते स्तेन एव सः १३

द्देशेनाहुतीरसंपाद्य यो भुङ्क्ते देहेन्द्रियाण्येव तर्पयति स्तेन एव तस्करः एव सः देवस्वापहारी देवऋणानपाकरणात् १३
यज्ञशिष्टाशिनः — वैश्वदेवादियज्ञावशिष्टममृतं ये भुञ्जते ते सन्तः शिष्टा वेदोक्तकारिणः देवाद्यृणापाकरणादतस्ते मुच्यन्ते सर्वैर्विहिताक
इति — रणनिमित्तैः पूर्वकृतैश्च पञ्चसूनानिमित्तैः किल्बिषैर्भूतभाविपातकसंसर्गिणस्ते भवन्तीत्यर्थः। एवमन्वये भूतभावि — ६९
पापाभावमुक्त्वा व्यतिरेके दोषमाह। भुञ्जते ते वैश्वदेवाद्यकारिणः अघं पापमेव तु अघावधारणे ते पापाः पञ्चसूनानिमित्तं
प्रमादकृतहिंसानिमित्तं च कृतपापाः सन्तः आत्मकारणादेव पचन्ति न तु वैश्वदेवाद्यर्थम्। तथा च पञ्चसूनादिकृतपापविद्ध

[illegible] एव ते [illegible] देवादिनिमित्तं [illegible] भुञ्जते ते त्वघं पापं भुञ्जते [illegible] तथा च स्मृतिः [illegible] लोपेषु
[illegible] कण्डनी [illegible] पञ्चसूना गृहस्थस्य ताभिः स्वर्गं न विन्दति। पञ्चसूनाकृतं पापं पञ्चयज्ञैर्व्यपोहतीति। श्रुति
[illegible] मेवास्य तत् साधारणमन्नं यदिदमद्यते स य एतदुपास्ते न स पाप्मनो व्यावर्त्तते मिश्रं ह्येतदिति। मन्त्रवर्णोऽपि मोघमन्नं
विन्दते [illegible] चेताः [illegible] ब्रवीमि वध इत्स तस्य नार्यमणं पुष्यति नो सखायं केवलाघो भवति केवलादीति। इदं चोपलक्षणं पञ्चम
हायज्ञानां [illegible] नाचनिरतकर्मणां। अधिकृतेन नित्यानि कर्माण्यवश्यमनुष्ठेयानीति प्रजापतिवचनार्थः १४

यज्ञशिष्टाशिनः सन्तो मुच्यन्ते सर्वकिल्बिषैः भुञ्जते ते त्वघं पापा ये पचन्त्यात्मकारणात् १४
अन्नाद्भवन्ति भूतानि पर्जन्यादन्नसंभवः यज्ञाद्भवति पर्जन्यो यज्ञः कर्मसमुद्भवः १५

न केवलं प्रजापतिवचनादेव कर्म कर्तव्यमपि तु जगच्चक्रप्रवृत्तिहेतुत्वादपीत्याह त्रिभिः अन्नादिति अन्नाद्भुक्ताद्रेतो लोहित
रूपेण परिणताद्भूतानि प्राणिशरीराणि भवन्ति जायन्ते अन्नस्य संभवो जन्म अन्नसंभवः पर्जन्याद्वृष्टेः अन्नस्य सि
द्धेः [illegible] यज्ञात् कारीर्यादेरग्निहोत्रादेश्चापूर्वाख्याद्धर्माद्भवति पर्जन्यः तथा चाग्निहो
त्र [illegible] तथा चाश्वलायन शाखायां श्रीकाण्डे जनकयाज्ञवल्क्यसंवादरूपा ब्राह्मणप्रश्नाः। मनुना चोक्तम्। अग्नौ
प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते। आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजा इति। स च यज्ञो धर्माख्यः सूक्ष्मः क
[illegible] कर्मसमुद्भवः ऋत्विग्यजमानव्यापारसाध्यः यज्ञस्य हि अपूर्वस्य विहितं कर्म कारणं १५

[illegible]पाद

गी० टी० ३ तत्राप्यपूर्वोत्पादकं ब्रह्मोद्भवं ब्रह्म वेदः स एवोद्भवः प्रमाणं यस्य तत्तथा वेदविहितमेव कर्मापूर्वसाधनं जानीहि न
७० बन्धपाखंडप्रतिपादितमित्यर्थः। ननु पाखंडशास्त्रापेक्षया वेदस्य किं वैलक्षण्यं यतो वेदप्रतिपादित एव धर्मो ना
न्य इत्यत आह ब्रह्म वेदाख्यमक्षरसमुद्भवं अक्षरात्परमात्मनो निर्दोषात्पुरुषान्निश्वासन्यायेनाबुद्धिपूर्वं समुद्भव
२ आविर्भावो यस्य तदक्षरसमुद्भवं तथा चापौरुषेयत्वेन निरस्तसमस्तदोषाशंकं वेदवाक्यं प्रमितिजनकतया
प्रमाणमतीन्द्रियार्थे ननु भ्रमप्रमादकरणापाटवविप्रलिप्सादिदोषवत्प्रणीतं पाखंडवाक्यं प्रमितिजनकमिति

कर्म ब्रह्मोद्भवं विद्धि ब्रह्माक्षरसमुद्भवं तस्मात्सर्वगतं ब्रह्म नित्यं यज्ञे प्रतिष्ठितं १६
एवं प्रवर्तितं चक्रं नानुवर्तयतीह यः अघायुरिन्द्रियारामो मोघं पार्थ स जीवति १७

भावः। तथा च श्रुतिः अस्य महतो भूतस्य निश्वसितमेतद्यदृग्वेदो यजुर्वेदः सामवेदोऽथर्वांगिरस इतिहासः पुरा
णं विद्या उपनिषदः श्लोकाः सूत्राण्यनुव्याख्यानानि व्याख्यानान्यस्यैवैतानि निश्वसितानीति। तस्मात्साक्षात्पर
मात्मसमुद्भवतया सर्वगतं सर्वप्रकाशकं नित्यमविनाशि च ब्रह्म वेदाख्यं यज्ञे धर्माख्येऽतीन्द्रिये प्रतिष्ठितं तात्पर्ये
णातः पाखंडप्रतिपादितो य धर्मपरित्यागेन वेदबोधित एव धर्मोऽनुष्ठेय इत्यर्थः १६ भवत्वेवं ततः किं फलितमित्यत ७०
ह आदौ परमेश्वरात्सर्वावभासकान्नित्यनिर्दोषवेदाविर्भावः ततः कर्मपरिज्ञानं ततोऽनुष्ठानाद्धर्मोत्पादः ततः प

र्जन्यः ततोऽन्नं ततो भूतानि पुनस्तथैव भूतानां कर्मप्रवृत्तिरित्येवं परमेश्वरेण प्रवर्तितं चक्रं सर्वजगन्निर्वाहकं यो नानुवर्तयति नानु
तिष्ठति स अघायुः पापजीवनो मोघं व्यर्थमेव जीवति हे पार्थ। तस्य जीवनान्मरणमेव वरं जन्मांतरे धर्मानुष्ठानसंभवादित्यर्थः। तथा
च श्रुतिः अथो अयं वा आत्मा सर्वेषां भूतानां लोकः स यज्जुहोति यद्यजते तेन देवानां लोकोऽथ यदनुब्रूते तेन ऋषीणामथ यत्पितृ
भ्यो निपृणाति यत्प्रजामिच्छते तेन पितॄणामथ यन्मनुष्यान्वासयते यदेभ्योऽशनं ददाति तेन मनुष्याणामथ यत्पशुभ्यस्तृणोद
कं विंदति तेन पशूनां यदस्य गृहेषु श्वापदा वयांस्या पिपीलिकाभ्य उपजीवंति तेन तेषां लोक इति ब्रह्मविदं च्यावयति। इन्द्रिया
राम इति यत इन्द्रियैर्विषयेष्वारमति अतः कर्माधिकारी संस्तदकरणात्पापमेवाचिन्वन्व्यर्थमेव जीवतीत्यभिप्रायः १७
यस्त्विन्द्रियारामो न भवति परमार्थदर्शी स एवं जगच्चक्रप्रवृत्तिहेतुभूतं कर्माननुतिष्ठन्नपि न प्रत्यवैति कृतकृत्यत्वादित्याह
द्वाभ्याम् यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मानवः आत्मन्येव च संतुष्टस्तस्य कार्यं न विद्यते १८ इन्द्रियारामो
हि स्रक्चंदनवनितादिषु रतिमनुभवति मनोज्ञान्नपानादिषु तृप्तिं पशुपुत्रहिरण्यादिलाभेन रोगाद्यभावेन च तुष्टिं उक्तविषया
२ भावे रागिणां मत्स्यतृप्त्यतुष्टिदर्शनाद्रतितृप्तितुष्टयो मनोवृत्तिविशेषाः साक्षिसिद्धाः लब्धपरमानंदस्तु द्वैतदर्शनाभावाद
तिफल्गुत्वाच्च विषयसुखं न कामयत इत्युक्तं यावानर्थ उदपान इत्यत्र अतोऽनात्मविषयकरतितृप्तितुष्ट्यभावादात्मानं पर
मानंदमद्वयं साक्षात्कुर्वन्नुपचारादेवमुच्यते आत्मरतिरात्मतृप्त आत्मसंतुष्ट इति। तथा च श्रुतिः आत्मक्रीड आत्मरति
क्रियावानेष ब्रह्मविदां वरिष्ठ इति आत्मतृप्तश्चेति चकार एवकारानुकर्षणार्थः। मानव इति यः कश्चिदपि मनुष्य एवंभूतः
स एव कृतकृत्यो न तु ब्राह्मणत्वादिप्रकर्षेणेति कथयितुं आत्मन्येव च संतुष्ट इत्यत्र चकारः समुच्चयार्थः य एवंभूतस्तस्या
धिकारहेत्वभावात्किमपि कार्यं वैदिकं लौकिकं वा न विद्यते १८

नृत्वात्मविदोपि अभ्युदयार्थं निःश्रेयसार्थं प्रत्यवायपरिहारार्थं वा कर्म स्यादित्यत आह तस्यात्मरतेः कृतेन कर्मणाऽभ्युदयलक्ष
णो निःश्रेयसलक्षणो वाऽर्थः प्रयोजनं नैवास्ति तस्य स्वर्गाद्यभ्युदयानर्थित्वात् निःश्रेयसस्य च कर्मासाध्यत्वात्। तथा च श्रु
तिः परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो निर्वेदमायान्नास्त्यकृतः कृतेनेति। अकृतो नित्यो मोक्षः कृतेन कर्मणा नास्तीत्यर्थः। ज्ञा
नसाध्यस्यापि व्यावृत्तिरेवकारेण सूचिता। आत्मरूपस्य हि निःश्रेयसस्य नित्यप्राप्तस्याज्ञानमात्रमप्राप्तिः। तच्च तत्त्वज्ञानमात्रा
पनोद्यं। तस्मिंश्च तत्त्वज्ञानेनापनुन्ने तस्यात्मविदो न किंचित्कर्मसाध्यं ज्ञानसाध्यं वा प्रयोजनमस्तीत्यर्थः एवंभूतेनापि प्रत्य

नैव तस्य कृतेनार्थो नाकृतेनेह कश्चन न चास्य सर्वभूतेषु कश्चिदर्थव्यपाश्रयः ॥१८॥

वायपरिहारार्थं कर्माण्यनुष्ठेयान्येवेत्यत आह नाकृतेनेति भावे निष्ठा नित्यकर्माकरणेन इह लोके गर्हितत्वरूपः प्रत्यवायप्रा
प्तिरूपो वा कश्चनार्थो नास्ति। सर्वत्रोपपत्तिमाह ग्नराद्वेनवो हेतो। यस्मादस्यात्मविदः सर्वभूतेषु ब्रह्मादिस्थावरान्तेषु को
पि अर्थव्यपाश्रयः प्रयोजनसंबंधो नास्ति कंचिद्भूतविशेषमाश्रित्य कोपि क्रियासाध्योऽर्थो नास्तीति वाक्यार्थः अस्येतोऽ
कृताकृते निष्प्रयोजने नैनं कृताकृते तपत इति श्रुतेः। तस्य ह न देवाश्चनाभूत्या ईशत आत्मा ह्येषां स भवतीति श्रुतेर्देवा अ
पि तस्य मोक्षाभिवनायन समर्था इत्युक्तेर्न विघ्नाभावार्थमपि देवाराधनरूपकर्मानुष्ठानमित्यभिप्रायः। एतादृशो ब्रह्म
विद्भूमिकासप्तकभेदेन निरूपितो वसिष्ठेन। ज्ञानभूमिः शुभेच्छाख्या प्रथमा परिकीर्तिता। विचारणा द्वितीया स्यात्तृतीया
तनुमानसा। सत्त्वापत्तिश्चतुर्थी स्यात्ततोऽसंसक्तिनामिका। पदार्थाभावनी षष्ठी सप्तमी तुर्यगा स्मृतेति। तत्र नित्यानि ७३

त्यवस्तुविवेकादिपुरःसरा फलपर्यवसायिनी मोक्षेच्छा प्रथमा। ततो गुरुमुपसृत्य वेदान्तवाक्यविचारः श्रवणमननात्मको द्विती
या। ततो निदिध्यासनाभ्यासेन मनस एकाग्रतया सूक्ष्मवस्तुग्रहणयोग्यत्वं तृतीया। एतद्भूमिकात्रयं साधनरूपं जाग्रदव
स्थोच्यते योगिभिः भेदेन जगतो भानात्। तदुक्तं। भूमिकात्रितयं त्वेतद्राम जाग्रदिति स्थितं। यथावद्भेदबुद्ध्येदं जगज्जाग्रति
दृश्यत इति। ततो वेदान्तवाक्यान्निर्विकल्पको ब्रह्मात्मैक्यसाक्षात्कारश्चतुर्थी भूमिका फलरूपा सत्त्वापत्तिः स्वप्नावस्थो
च्यते सर्वस्यापि जगतो मिथ्यात्वेन स्फुरणात्। तदुक्तं। अद्वैते स्थैर्यमायाते द्वैते प्रशममागते। पश्यन्ति स्वप्नवल्लोकं चतुर्थी भू
मिकामिता इति। सोयं चतुर्थभूमिं प्राप्तो योगी ब्रह्मविदित्युच्यते। पंचमीषष्ठीसप्तम्यस्तु भूमिका जीवन्मुक्तेरेवावान्तरभेदाः।
अत्र सविकल्पकसमाध्यभ्यासेन निरुद्धे मनसि या निर्विकल्पकसमाध्यवस्था साऽसंसक्तिरिति सुषुप्तिरिति चोच्यते।
ततः स्वयमेव व्युत्थानात् सोयं योगी ब्रह्मविद्वरः। ततस्तदभ्यासपरिपाकेण चिरकालावस्थायिनी सा पदार्थाभावनीति गा
ढसुप्तिरिति चोच्यते। ततः स्वयमनुत्थितस्य योगिनः परप्रयत्नेनैव व्युत्थानात्। सोयं ब्रह्मविद्वरीयान्। उक्तं हि। पंचमीं भू
मिकामेत्य सुषुप्तिपदनामिकां। षष्ठीं गाढसुषुप्त्याख्यां क्रमात्पतति भूमिकामिति। यस्यास्तु समाध्यवस्थाया न स्वतो न वा
परतो व्युत्थितो भवति सर्वथा भेददर्शनाभावात् किंतु सर्वदा तन्मय एव स्वप्रयत्नमन्तरेणैव परमेश्वरप्रेरितप्राणवायुव
शादन्यैर्निर्वाह्यमानदैहिकव्यवहारः परिपूर्णपरमानंदघन एव सर्वतस्तिष्ठति सा सप्तमी तुरीयावस्था तां प्राप्तो ब्र

गी॰टी॰ ३
७२
लविद्वरिष्ठ इत्युच्यते। उक्तं हि षष्ठ्यां भूम्यामसौ स्थित्वा सप्तमीं भूमिमाप्नुयात्। किं विदेवेषसंपन्नस्त्वथ वेषनकिंचन
विदेहमुक्तता तूक्ता सप्तमी योगभूमिका। अगम्या वचसां शांता सा सीमा योगभूमिष्विति। यामधिकृत्य श्रीभागवते स्मर्य
ते। देहं चनश्वरमवस्थितमुत्थितं वा सिद्धो न पश्यति यतोध्यगमत्स्वरूपं। दैवादुपेतमथ दैववशादपेतं वासो यथा परिह
तं मदिरामदांधः। देहोपि दैववशगः खलु कर्म यावत्स्वारंभकं प्रतिसमीक्षत एव सासुः। तं सप्रपंचमधिरूढसमाधि
योगः स्वाप्नं पुनर्न भजते प्रतिबुद्धवस्तुरिति। श्रुतिश्च। तद्यथाहिनिर्ल्वयनी वल्मीके मृता प्रत्यस्ता शयीतैवमेवेदं शरीरं
शेतेऽथायमशरीरोऽमृतः प्राणो ब्रह्मैव तेज एवेति। तत्रायं संग्रहः। चतुर्थी भूमिका ज्ञानं तिस्रः स्युः साधनं पुरा। जीवन्मु
क्तेरवस्थास्तु परास्तिस्रः प्रकीर्तिताः। अत्र प्रथमभूमित्रयमारूढोऽज्ञोपि न कर्माधिकारी किं पुनस्तत्त्वज्ञानी तद्विशि
ष्टो जीवन्मुक्तो वेत्यभिप्रायः। १८ यस्मान्नत्वमेवंभूतो ज्ञानी किंतु कर्माधिकृत एव मुमुक्षुः। तस्मादसक्तः सततं कार्यं
कर्म समाचर असक्तो ह्याचरन्कर्म परमाप्नोति पूरुषः १९ असक्तः फलकामनारहितः सततं सर्वदा नतु कदाचित्
कार्यमवश्यकर्तव्यं यावज्जीवादिश्रुतिचोदितं नित्यं कर्म तमेतं वेदानुवचनेन ब्राह्मणा विविदिषंति यज्ञेन दानेन तपसानाशकेने ३९
तिश्रुत्या ज्ञाने विनियुक्तं कर्म नित्यनैमित्तिकं लक्षणं सम्यगाचार यथाशास्त्रं निर्वर्तय। असक्तो हि यस्मादाचरन्नी
श्वरार्थं कर्म कुर्वन्सत्वशुद्धिज्ञानप्राप्तिद्वारेण परं मोक्षं प्राप्नोति। पूरुषः पुरुषः स एव सत्पुरुषो नान्य इत्यभिप्रायः
२०

ननु विविदिषोरपि ज्ञाननिष्ठाप्राप्त्यर्थं श्रवणमनननिदिध्यासनानुष्ठानाय सर्वकर्मत्यागलक्षणः संन्यासो विहितः तथा
च न केवलं ज्ञानिन एव कर्मानधिकारः किंतु ज्ञानार्थिनोपि विरक्तस्य तथा च मयापि विरक्तेन ज्ञानार्थिना कर्म त्याज्यमेवे
त्यर्जुनाशंकां क्षत्रियस्य संन्यासानधिकारप्रतिपादनेनापनुदति भगवान् जनकादयो जनकाजातशत्रुप्रभृतयः श्रु
तिस्मृतिप्रसिद्धाः क्षत्रिया विद्वांसोपि कर्मणैव सह न तु कर्मत्यागेन सह संसिद्धिं श्रवणादिसाध्यां ज्ञाननिष्ठामास्थि
ताः प्राप्ताः हि यस्मादेवं तस्मात्त्वमपि क्षत्रियो विविदिषुर्विद्वान्वा कर्म कर्तुमर्हसीत्यनुषंगः। ब्राह्मणाः पुत्रैषणायाश्च
कर्मणैव हि संसिद्धिमास्थिता जनकादयः लोकसंग्रहमेवापि संपश्यन्कर्तुमर्हसि २१
वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरंतीति संन्यासविधायके वाक्ये ब्राह्मणत्वस्य विव
क्षितत्वात् स्वाराज्यकामो राजा राजसूयेन यजेतेत्यत्र क्षत्रियत्ववत् चत्वार आश्रमा ब्राह्मणस्य त्रयो राजन्यस्य द्वौ
वैश्यस्येति च स्मृतेः। पुराणेपि। मुखजानामयं धर्मो यद्विष्णोर्लिंगधारणं। बाहुजातोरुजातानां नायं धर्मः प्रश
स्यत इति। क्षत्रियवैश्ययोः संन्यासाभाव उक्तः। तस्माद्युक्तमेवोक्तं भगवता कर्मणैव हि संसिद्धिमास्थिता
जनकादय इति। सर्वे राजाश्रिता धर्मा राजा धर्मस्य धारक इत्यादिस्मृते वर्णाश्रमधर्मप्रवर्तकत्वेनापि क्षत्रि

गी०टी०३
७२

ऽवश्यं कर्म कुर्यादित्याह लोकेति लोकानां स्वे स्वे धर्मे प्रवर्त्तनमुन्मार्गान्निवर्त्तनं च लोकसंग्रहस्तं पश्यन्नपि शास्त्रा
ऽज्ञ जनकादिशिष्टाचारमपि पश्यन् कर्म कर्त्तुमर्हस्येवेत्यन्वयः। क्षत्रियजन्मप्रापकेण कर्मणारब्धशरीरस्त्वं विद्वान
पि जनकादिवत्प्रारब्धकर्मबलेन लोकसंग्रहार्थं कर्म कर्त्तुं योग्यो भवसि न तु त्यक्तुं ब्राह्मणजन्मालाभादित्यभि
प्रायः। एतादृशभगवदभिप्रायविदा भगवता भाष्यकृता ब्राह्मणस्यैव संन्यासो नान्यस्येति निर्णीतं। वार्त्तिककृ
ता तु प्रौढिवादमात्रेण क्षत्रियवैश्ययोरपि संन्यासोऽस्तीत्युक्तमिति द्रष्टव्यं २० ननु मया कर्माणि क्रियमाणेऽपि

यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः। स यत्प्रमाणं कुरुते लोकस्तदनुवर्त्तते २१

लोकः किमिति तत्संगृह्णीयादित्याशंक्य श्रेष्ठाचारानुविधायित्वादित्याह श्रेष्ठः प्रधानभूतो राजादिः यद्यत्कर्मा
चरति शुभमशुभं वा तत्तदेवाचरतीतरः प्राकृतस्तदनुगतो जनः न तु स्वातंत्र्येणेत्यर्थः। ननु शास्त्रमवलोक्या
शास्त्रीयं श्रेष्ठाचारं परित्यज्य शास्त्रीयमेव कुतो नाचरति लोक इत्याशंक्याचारवत्प्रतिपत्तावपि श्रेष्ठानुसारि
तामितरस्य दर्शयन् स यदिति स श्रेष्ठो यल्लौकिकं वैदिकं वा प्रमाणं कुरुते प्रमाणत्वेन मन्यते तदेव लोकोऽप्यनुवर्त्तते
प्रमाणं कुरुते न तु स्वातंत्र्येण किंचिदित्यर्थः। तथा च प्रधानभूतेन त्वया राज्ञा लोकसंरक्षणार्थं कर्म कर्त्तव्यमेवेत्य

अत्र चाहमेव दृष्टांत इत्याह त्रिभिः हे पार्थ मे मम परमेश्वरस्य त्रिष्वपि लोकेषु किमपि कर्त्तव्यं नास्ति यतोऽनवाप्तं फलं
किंचिन्ममावाप्तव्यं नास्ति तथापि वर्त्त एव कर्मण्यहं कर्म करोम्येवेत्यर्थः। पार्थेति संबोधयन्विशुद्धक्षत्रियवंशोद्भ
वस्त्वं भूरापत्यापत्यत्वेन वात्यंतं मत्समोऽहमिव वर्त्तितुमर्हसीति दर्शयति २२ लोकसंग्रहोऽपि न ते कर्त्तव्यो विफल
त्वादित्याशंक्याह यदि पुनरहमतंद्रितोऽलसः सन्कर्मणि जातु कदाचिन्न वर्त्तेयं नानुतिष्ठेयं कर्माणि तदा मम श्रेष्ठ

न मे पार्थास्ति कर्त्तव्यं त्रिषु लोकेषु किंचन। नानवाप्तमवाप्तव्यं वर्त्त एव च कर्मणि २३
यदि ह्यहं न वर्त्तेयं जातु कर्मण्यतंद्रितः। मम वर्त्मानुवर्त्तंते मनुष्याः पार्थ सर्वशः २४
उत्सीदेयुरिमे लोका न कुर्यां कर्म चेदहं। संकरस्य च कर्त्ता स्यामुपहन्यामिमाः प्रजाः २५

स्य सतो वर्त्म मार्गं हे पार्थ मनुष्याः कर्माधिकारिणः संतः अनुवर्त्तंते अनुवर्त्तेरन् सर्वशः सर्वप्रकारैः २४ श्रेष्ठस्य
त्वन्मार्गानुवर्त्तित्वं मनुष्याणामुचितमेव को दोष इत्यत आह अहमीश्वरश्चेद्यदि कर्म न कुर्यां तदा सदनुवर्त्तिनां म
न्वादीनामपि कर्मानुपपत्तेः लोकस्थितिहेतोः कर्मणो लोपेन मे सर्वे लोका उत्सीदेयुर्विनश्येयुः ततश्च वर्णसं
करस्य कर्त्ताहमेव स्यां तेन चेमाः सर्वाः प्रजा अहमेवोपहन्यां धर्मलोपेन विनाशयेयं कथं च प्रजानामनुग्रहार्थं

भ॰टी॰३
१४
प्रवृत्तईश्वरोऽहं ताः सर्वविनाशायैवक्षिप्तमित्याशयः अद्यदावर्त्तीत्यादेरप्रयोजना नकेवलं लोकसंग्रहं पश्यन् कर्तुमर्ह
सि अपितु श्रेष्ठाचारत्वादपीत्याह यद्यदिति तथा च मम श्रेष्ठस्य यादृशआचारस्तादृशमेव मदनुवर्त्तिना अयं तु श्रे
यो न स्यात् अन्येनान्यदृ इत्यर्थः। कीदृशस्तवाचारो यो मयानुवर्त्तनीय इत्याकांक्षायां न मे पार्थेत्यादि त्रिभिः श्लोकै
स्तत्प्रदर्शनमिति २५ ननु तवेश्वरस्य लोकसंग्रहार्थं कर्माणि कुर्वाणस्यापि कर्तृत्वाभिमानाभावान्न काचित् क्षतिः
मम तु जीवस्य लोकसंग्रहार्थं कर्माणि कुर्वाणस्य कर्तृत्वाभिमानेन ज्ञानाभिभवः स्यादित्यत आह सक्ताः कर्तृत्वा

सक्ताः कर्मण्यविद्वांसो यथा कुर्वन्ति भारत कुर्याद्विद्वांस्तथासक्तश्चिकीर्षुर्लोकसंग्रहम् २६

न बुद्धिभेदं जनयेदज्ञानां कर्मसंगिनां जोषयेत्सर्वकर्माणि विद्वान्युक्तः समाचरन् २७

भिमानेन फलाभिसंधिना च कर्मण्यभिनिविष्टा अविद्वांसो अज्ञा यथा कुर्वन्ति कर्म लोकसंग्रहं कर्तुमिच्छुर्विद्वान
पि तथैव कुर्यात्। किंतु असक्तः सन् कर्तृत्वाभिमानं फलाभिसंधिं वा कुर्वन्नित्यर्थः। भारतेति भरतवंशोद्भ
वत्वेन महाज्ञानं स्यां रतत्वेन वा त्वं यथोक्तशास्त्रार्थबोधयोग्योसीति दर्शयति २६ ननु कर्मानुष्ठानेनैव लोकसंग्र
हः कर्तव्यो न तु तत्त्वज्ञानोपदेशेनेति को हेतुरत आह अज्ञानां अविवेकिनां कर्तृत्वाभिमानेन फलाभिसंधिना १४

च कर्मसंगिनां कर्मण्यभिनिविष्टानां या बुद्धिरहमेतत् कर्म कृत्वा एतत्फलं भोक्ष्य इति तस्या भेदं विचालनं अक र्त्तात्मे
त्युपदेशेन न कुर्यात्। किंतु युक्तोऽवहितः सन् विद्वान् लोकसंग्रहं चिकीर्षुः अविद्वदधिकारिकाणि सर्वकर्माणि समाचरन्
तेषां श्रद्धामुत्पाद्य जोषयेत् प्रीत्या सेवयेत् अनधिकारिणामुपदेशेन बुद्धिविचालने कृते कर्मसु श्रद्धानिवृत्तेर्ज्ञानस्य चानु
त्पत्तेरुभयभ्रष्टत्वं स्यात् तथा चोक्तं अज्ञस्यार्द्धप्रबुद्धस्य सर्वं ब्रह्मेति यो वदेत्। महानिरयजालेषु स तेन विनियोजित इति
२७ विद्वदविदुषोः कर्मानुष्ठानसाम्येपि कर्तृत्वाभिमानतदभावाभ्यां विशेषं दर्शयन् सक्ताः कर्मणीति श्लोकार्थं विवृणोति

प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः अहंकारविमूढात्मा कर्ताहमिति मन्यते २८

प्रकृतेर्गुणैः प्रकृतिर्नाम सत्वरजस्तमोगुणमयी मिथ्याज्ञानात्मिका पारमेश्वरी शक्तिः मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्व
रमिति श्रुतेः तस्याः प्रकृतेर्गुणैर्विकारैः कार्यकरणरूपैः क्रियमाणानि लौकिकानि वैदिकानि च कर्माणि सर्वशः
सर्वप्रकारैः अहंकारेण कार्यकरणसंघातात्मप्रत्ययेन विमूढः स्वरूपविवेकासमर्थः आत्मान्तःकरणं यस्य सोऽहंका
रविमूढात्मा अनात्मन्यात्माभिमानी तानि कर्माणि कर्ताहमिति करोम्यहमिति मन्यते कर्तृत्वाध्यासेन कर्ताहमिति तत्र
त्ययः। तेन न लोकाव्ययनिष्ठाश्वलत्वं अहं नामिति षष्ठीप्रतिषेधः २८ विद्वांस्तु तथा न मन्यत इत्याह ॥ ॥ ॥

तत्त्ववित् स्वं वेत्तीति तत्त्ववित् तुशब्देन तस्याज्ञाद्वैशिष्ट्यमाह कस्य तत्त्ववित् इत्यत आह। गुणकर्मविभागयोर्गुणा देहेन्द्रियान्तःक-
रणान्यहंकारास्पदानि कर्माणि च तेषां व्यापारभूतानि ममकारास्पदानीति गुणकर्मणी तिद्वै एकवद्भावः विभज्यते सर्वेषां ज-
डानां विकारिणां भासकत्वेन पृथग्भवतीति विभागः स्वप्रकाशज्ञानरूपोऽसंग आत्मा गुणकर्म च विभागश्चेति द्वंद्वः तयोर्गु-
णकर्मविभागयोर्भास्यभासकयोर्जडचैतन्ययोर्विकारिनिर्विकारयोस्तत्त्वं याथात्म्यं यो वेत्ति स गुणाः करणात्मका गुणे-
षु विषयेषु प्रवर्त्तन्ते विकारित्वान्न तु निर्विकार आत्मेति मत्वा न सज्जते स किं कर्तृत्वाभिनिवेशमतत्त्वविदिव न करोति हे महा

तत्त्ववित्तु महाबाहो गुणकर्मविभागयोः गुणा गुणेषु वर्त्तन्त इति मत्वा न सज्जते २८

प्रकृतेर्गुणसम्मूढाः सज्जन्ते गुणकर्मसु तानकृत्स्नविदो मन्दान्कृत्स्नविन्न विचालयेत् ३०

बाहो इति संबोधयन्सामुद्रिकोक्तसत्पुरुषलक्षणयोगित्वान्नष्टपृथग्जनसाधारण्येन त्वमा विवेकी भवितुमर्हसीति सूच-
यति गुणविभागस्य कर्मविभागस्य च तत्त्ववित् इति वा अस्मिन्पक्षे गुणकर्मणोरित्येतावतैवार्थलाभे विभागपदस्य प्र-
योजनं चिंत्यं २९ तदेवं विद्वदविदुषोः कर्मानुष्ठानसाम्येन विद्वानविदुषो बुद्धिभेदं न कुर्यादित्युक्तमुपसंहरति प्रकृतेः
पूर्वोक्तायामायागुणैः कार्यतया धर्मैर्देहादिभिर्विकारैः सम्यक् मूढाः स्वरूपास्फुरणेन तानेवात्मत्वेन मन्यमानास्तेषा-
मेव गुणानां देहेंद्रियान्तःकरणानां कर्मसु व्यापारेषु सज्जन्ते वयं कुर्मः तत्फलायेति दृढतरामीयबुद्धिं कुर्वन्ति

...तान् कर्मसंगिनोऽकृत्स्नविदोऽनात्मविदो मन्दान् ...शुद्धचित्तत्वेन ...कारमप्राप्तान् कृत्स्नवित् ...
...न विचालयेत् कर्मश्रद्धातो न प्रच्यावयेदित्यर्थः ते हि मंदाः अशुद्धान्तःकरणाः तेऽस्थिरमेव विवेकोदयेन निवर्त्तन्ते
ज्ञानाधिकारमप्राप्तात्स्वभिप्रायः कृत्स्न... आत्मानात्मपरतया ...त्यर्थानुसारेण वार्त्तिककृद्भिर्याख्यातो
...वेत्यादिवाक्येभ्यः कृत्स्नं वस्तु यतोऽद्वयं संभवस्तद्विरुद्धस्य नुत्तोऽकृत्स्नस्य वस्तुनः ...स्मिन्नृत्वे...
...शिष्यते। तथा दृष्टेपि दृष्टः स्यादकृत्स्नस्तत्र गुच्यते इति। अनात्मनः सावयवत्वादनेक धर्मवत्त्वाच्च केनचि-
द्वर्मेण केनचिदवयवेन वा विशिष्टे तस्मिन्नेकस्मिन् घटादौ ज्ञातेपि धर्मान्तरेणावयवान्तरेण वा विशिष्टः स एव ज्ञा
...विशिष्यते तदन्यश्चाप्यादिरज्ञातो ...एवं तथा तस्मिन् ...दावज्ञातेपि पटादिर्ज्ञातः स्यादिति ...
...स्य वाज्ञानात्तदज्ञानेप्यन्यज्ञानात् सोऽकृत्स्न इत्युच्यते। कृत्स्नस्त्वद्वयत्वात् नेकस्याविदशे षस्याभावा-
दिति श्लोकद्वयार्थः॥ ३० एवं कर्मानुष्ठानसाम्येपि तत्त्वविदज्ञयोः कर्तृत्वाभिनिवेशतदभावाभ्यां विशेष उक्तः इदानी-
मज्ञस्यापि मुमुक्षोरमुमुक्षुवैलक्षण्यं कुर्यात् भगवदर्पणं फलाभिसंध्यभावं च विशेषं वदन् अज्ञतयाऽशुद्धस्य कर्माधिकारं
द्रढयति मयि भगवति वासुदेवे परमेश्वरे सर्वज्ञे सर्वनियन्तरि सर्वात्मनि सर्वाणि कर्माणि लौकिकानि वैदिकानि

गी·टी·३ च सर्वविषयकाणि अध्यात्मचेतसा अहं कर्तेश्वराधीनस्तस्मा ईश्वराय राज्ञ इव भृत्यः कर्माणि करोमीत्यनया बुद्ध्या
७६ संन्यस्य समर्प्य निराशीर्निष्कामः निर्ममो देहपुत्रादिषु स्वीयेषु ममताशून्यः विगतज्वरः संतापहेतुत्वाच्छोक एव ज्वरश
ब्देनोक्तः ऐहिकपारत्रिकदुर्यशोनरकपातादिनिमित्तशोकरहितः भूत्वा त्वं मुमुक्षुर्युध्यस्वान्यान्यपि विहितानि कर्माणि कुर्वित्य
भिप्रायः। अत्र भगवदर्पणं निष्कामत्वं च सर्वकर्मसाधारणं मुमुक्षोर्निर्ममत्वं विगतशोकत्वं युद्धमात्रे प्रकृतमिति द्रष्टव्यं अ
न्यत्र ममताशोकयोरप्रसक्तत्वात् ३१ फलाभिसंधिराहित्येन भगवदर्पणबुद्ध्या विहितकर्मानुष्ठानं सत्त्वशुद्धिज्ञानप्रा

मयि सर्वाणि कर्माणि संन्यस्याध्यात्मचेतसा निराशीर्निर्ममो भूत्वा युध्यस्व विगतज्वरः ३१

ये मे मतमिदं नित्यमनुतिष्ठंति मानवाः श्रद्धावंतोनसूयंतो मुच्यंते तेपि कर्मभिः ३२

प्तिद्वारेण मुक्तिफलमित्याह ये इति फलाभिसंधिराहित्येन विहितकर्मानुष्ठानरूपं मम मतं नित्यं नित्यवेदबोधितत्वे
नानादिपरंपरागतं आवश्यकमिति वा ये केचिन्मानवाः मनुष्याः ये केचित् मनुष्याधिकारत्वात् कर्मणां। श्रद्धावंतः शा
स्त्राचार्योपदिष्टेर्थेनुभूतेप्येवमेवैतदिति विश्वासः श्रद्धा तद्वंतः अनसूयंतः गुणेषु दोषाविष्करणमसूया सा च दुःखा ७६
त्मके कर्मणि मां प्रवर्तयन् अकारुणिकोयमित्येवंरूपा प्रकृते प्रसक्ता तामसूयां मयि गुरौ वासुदेवे सर्वसुहृदि अकुर्व
तो येनुतिष्ठंति तेपि सत्त्वशुद्धिज्ञानप्राप्तिद्वारेण सम्यग्ज्ञानिवन्मुच्यंते कर्मभिर्धर्माधर्माख्यैः ३२

एवमन्वये गुणमुक्त्वा व्यतिरेके दोषमाह ये त्विति तुशब्दः श्रद्धावद्वैधर्म्यमश्रद्धां सूचयति तेन ये नास्तिक्यादश्रद्दधाना अभ्यसूयंतो दो
षमुद्भावयंतः एतन्मम मतं नानुवर्तंते तानचेतसो दुष्टचित्तानत एव सर्वज्ञानविमूढान् सर्वत्र कर्मणि ब्रह्मणि सगुणे निर्गुणे च
तञ्च यज्ज्ञानं तत्र विविधं प्रमाणतः प्रमेयतः प्रयोजनतः मूढान् सर्वप्रकारेणायोग्यान्नष्टान् सर्वपुरुषार्थभ्रष्टान् विद्धि जानीहि ३३ कस्मा
द्राज्ञ इव तव शासनातिक्रमे भयं पश्यंतः कथमसूयंतस्त्वन्मतं नानुवर्तंते कथं वा सर्वपुरुषार्थसाधने प्रतिकूला वर्तंते तत्रा
ह प्रकृतिर्नाम प्राग्जन्मकृतधर्माधर्मज्ञानेच्छादिसंस्कारो वर्तमानजन्मन्यभिव्यक्तः सर्वतो बलवान् तं विद्याकर्मणी सह

ये त्वेतदभ्यसूयंतो नानुतिष्ठंति मे मतं सर्वज्ञानविमूढांस्तान्विद्धि नष्टानचेतसः ३३

सदृशं चेष्टते स्वस्याः प्रकृतेर्ज्ञानवानपि प्रकृतिं यांति भूतानि निग्रहः किं करिष्यति ३४

इंद्रियस्येंद्रियस्यार्थे रागद्वेषौ व्यवस्थितौ तयोर्न वशमागच्छेत्तौ ह्यस्य परिपंथिनौ ३५

त्वारभंते पूर्वप्रज्ञा चेति श्रुतिप्रमाणकः तस्याः स्वकीयायाः प्रकृतेः सदृशमनुरूपमेव सर्वोपि तु ज्ञानवान् ब्रह्मविदपि पश्वादि
भिश्चाविशेषादिति न्यायाद्गुणदोषज्ञानवानपि चेष्टते किमु मूर्खः तस्माद्भूतानि सर्वे प्राणिनः प्रकृतिं यांत्यनुवर्तंते पुरुषार्थभ्रं
शहेतुमपि तत्र मम वा राज्ञो वा निग्रहः किं करिष्यति रागो कष्टेन दुरितान्निवर्तितुं न शक्नोतीत्यर्थः। महानरकसाध
नत्वं जानन्नपि दुर्वासनाप्राबल्यात् पापेषु प्रवर्तमानान् महासनातिक्रमदोषाद्विभ्यतीति भावः ३४ ननु सर्वस्य प्राणिवर्ग
स्य प्रकृतिवशवर्तित्वे लौकिकवैदिकपुरुषकारस्यावकाशाभावाद्विधिनिषेधानर्थक्यं प्राप्तं न च प्रकृतिशून्यः कश्चिदस्ति यं प्रति

इंद्रियस्य

गी०टी०२ तदर्थं वर्त्मस्थादित्यत आह इंद्रियस्येति वीप्सया सर्वेषामिंद्रियाणामर्थे प्रत्येकमिंद्रियविषये शब्दस्पर्शरूपरसगंधे च एवं कर्मेंद्रियविषयेपि
७७ वचनादौ अनुकूले शास्त्रनिषिद्धेपि रागः प्रतिकूले शास्त्रविहितेपि द्वेष इत्येवं प्रतींद्रियार्थे रागद्वेषौ व्यवस्थितावानुकूल्यप्राति
कूल्यव्यवस्थया स्थितौ न त्वनियमेन सर्वत्र तौ भवतः तत्र पुरुषकारस्य शास्त्रस्य चायं विषयो यत्तयोर्वशं नागच्छेदिति कथं यथा
हि पुरुषस्य प्रकृतिः सा बलवदनिष्टानुबंधित्वज्ञानाभावसहकृतेष्टसाधनत्वज्ञाननिबंधनं रागं पुरस्कृत्यैव शास्त्रनिषिद्धे कलंजभ
क्षणादौ प्रवर्तयति तथा बलवदिष्टसाधनत्वज्ञानाभावसहकृतानिष्टसाधनत्वज्ञाननिबंधनं द्वेषं पुरस्कृत्यैव शास्त्रविहिता
दपि संध्यावंदनादेर्निवर्तयति तत्र शास्त्रेण प्रतिषिद्धस्य बलवदनिष्टानुबंधित्वे ज्ञापिते सहकार्यभावात् केवलं दृष्टेष्टसाधन
ताज्ञानं मधुविषसंपृक्तान्नभोजन इव तत्र न रागं जनयितुं शक्नोति। एवं विहितस्य शास्त्रेण बलवदिष्टानुबंधित्वे बोधिते सह
कार्यभावात् केवलमनिष्टसाधनत्वज्ञानं भोजनादाविव तत्र न द्वेषं जनयितुं शक्नोति ततश्चाप्रतिबंधं शास्त्रं विहितेषु पुरुषं प्र
वर्तयति निषिद्धाच्च निवर्तयति शास्त्रीयविवेकविज्ञानप्राबल्येन स्वाभाविकरागद्वेषयोः कारणोपमर्देनोपमर्दान्न कदा
विपरीतमार्गे पुरुषं शक्ता दृष्टिं प्रवर्तयितुं शक्नोतीति न शास्त्रस्य पुरुषकारस्य च वैयर्थ्यप्रसंगः तयो रागद्वेषयोर्वशं
हि तदधीनो प्रवर्तेत निवर्तेत वा किंतु शास्त्रीयतद्विपक्षज्ञानेन तत्कारणविघटनद्वारा तौ नाशयेत्। हि यस्मात्तौ रा ७७
स्वाभाविकौ रागद्वेषौ अस्य पुरुषस्य श्रेयोर्थिनः परिपंथिनौ शत्रू श्रेयोमार्गस्य विघ्नकर्तारौ दस्यू इव पथिकस्य इदं च
श्रुत्याह द्वया ह प्राजापत्या देवाश्चासुराश्च ततः कानीयसा एव देवा ज्यायसा असुरा त एषु लोकेष्वस्पर्धंत इत्यादिना स्वाभाविका
रागद्वेषनिमित्ता विपरीत प्रवृत्तिरसुरत्वेन शास्त्रीयप्रवृत्तिश्च देवत्वेन निरूपिता व्याख्यानमतिविस्तरेणोपरम्यते ३५

ननु स्वाभाविकरागद्वेषप्रयुक्तपश्वादिसाधारणप्रवृत्तिपरित्यागेन शास्त्रीयमेव कर्म कर्तव्यं चेत्तर्हि अहिंसकं भिक्षाघ्राणादि
क्रियतां किं क्रूरतरेण युद्धेनेत्यत आह श्रेयान् प्रशस्यतरः स्वधर्मः यं वर्णमाश्रमं वा प्रति यो विहितः स तस्य स्वधर्मो वि
गुणोऽपि सर्वांगोपसंहारमंतरेण कृतोऽपि परधर्मात् सम्यगनुष्ठितात् स्वनुष्ठितात् सर्वांगोपसंहारेण संपादितादपि न हि वेद
प्रतिक्रमानुगम्यो धर्मः येन परधर्मोऽप्यनुष्ठेयः धर्मत्वात् स्वधर्मवदित्यनुमानं तत्र मानं स्यात् चोदनालक्षणोऽर्थो धर्म इति न्याया
त्। अतः स्वधर्मे किंचिदंगहीनेऽपि स्थितस्य निधनं मरणमपि श्रेयः प्रशस्यतरं परधर्मस्थस्य जीवितादपि स्वधर्मस्थस्य नि

श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात्। स्वधर्मे निधनं श्रेयः परधर्मो भयावहः ३६

अर्जुन उवाच अथ केन प्रयुक्तोऽयं पापं चरति पूरुषः। अनिच्छन्नपि वार्ष्णेय बलादिव नियोजितः ३७

धनं हि इहलोके कीर्तिवहं परलोके च स्वर्गादिप्रापकं परधर्मस्तु इहाकीर्तिकरत्वेन परत्र नरकप्रदत्वेन च भयावहो यतः अतो
रागद्वेषादिप्रयुक्तस्वाभाविकप्रवृत्तिवत्परधर्मोऽपि हेय एवेत्यर्थः। एवं तावद्भगवता गीताकारिणां श्रेयःप्राप्तिसाधनं गी
कारिणां श्रेयोमार्गभ्रष्टत्वमुक्तं श्रेयोमार्गभ्रंशेन फलाभिसंधिपूर्वककाम्यकर्माचरणेन केवलपापमात्राचरणेन च इह
निकाघ्राणादिकथितानि येनेदं श्वानस्तु वंतयंत इत्यादिना तत्रायं संग्रहः श्लोकः। अहो हा निश्लथास्त्याद्दुष्टचित्तवमूढतो प्रकृते
वशवर्तित्वं रागद्वेषौ च पुष्कलौ। परधर्मरुचित्वं चेत्युक्ता दुर्मार्गवाहकाः ॥३६ श्रीनंदनंदनो जयति श्रीकृष्णः

गी०टी० तत्र काम्यप्रतिषिद्धप्रवृत्तिकारणमपनुद्य भगवन्मतमनुवर्तितुं न कारणं वधारणाय ध्यायतो विषयान्पुंसः इत्यादि
७ ना पूर्वमनर्थमूलमुक्तं सांप्रतं च प्रकृतेर्गुणसंमूढा इत्यादिना बहु विस्तरं कथितं तत्र किं सर्वाण्यपि समप्राधान्येन कार
णानि अथवैषामेकमेव मुख्यं कारणमिति शास्त्रतुल्यतत्कारीणि केवलं तत्र यदि सर्वेषां पृथग्विचारेण महाप्रयासः स्यात् यदि त्वे ये
कस्मिन्नेव निराकृते कृतकृत्यता स्यादित्यतो ब्रूहि मे केन हेतुना प्रयुक्तः प्रेरितोऽयं मन्यमानो नानुवर्तते सर्वज्ञानविमूढः पुरुषः पा

अर्जुन उवाच अथ केन प्रयुक्तोऽयं पापं चरति पूरुषः अनिच्छन्नपि वार्ष्णेय बलादिव नियोजितः ३७

पमनर्थानुबन्धि सर्वफलाभिसंधिपुरस्सरं काम्यं विकर्मादिशास्त्रवधसाधनं दर्शनादिप्रतिषिद्धं च कलंजभक्षणादि
अनिच्छन्कर्माकर्तुमनिच्छन्नपि विनश्यन्नपि अनर्थानुबन्धि वस्तु पापहेतुकं मन्वानो वार्ष्णेय तिन वपारतं
स्वल्पमपि भवति अतो येन बलादिव नियोजितो राजेव भृत्यः स्वल्पमनर्थं विरुद्धं सर्वानर्थानुबन्धि ज्ञानं न पिता दृशं कर्म ७
प्रवर्तकं मां प्रति ब्रूहि मम मुमुक्षोः हे वार्ष्णेय वृष्णिवंशे मातामहकुले कृपया अवतीर्णेति संबोध
नेन मामुनीहं च यातोपेक्षणीय इति सूचयति ३७॥

एवमर्जुनेन पृष्टे अथो खल्वाहुः काममयं पुरुष इति आत्मैवेदमग्र आसीदेक एव सोऽकामयत जाया मे स्यादथ प्रजायेया
अथ वित्तं मे स्यादथ कर्म कुर्वीयेत्यादिश्रुतिसिद्धमन्तरं यस्त्वया पृष्टो हेतुर्बलादनर्थमार्गप्रवर्तकः स एष काम एव म
हानशनोऽयं निमित्तमात्रं सर्वानर्थप्राप्तिः प्राणिनां ननु क्रोधोऽप्यभिचारादौ प्रवर्तकोऽस्ति इत्यत आह क्रोध एष काम एव
केनचिद्धेतुना प्रतिहतः क्रोधत्वेन परिणमते अतः क्रोधोऽप्येष काम एव एतस्मिन्नेव महावैरिणि निवारिते सर्वपुरुषा
र्थप्राप्तिरित्यर्थः तन्निवारणोपायज्ञानाय तत्कारणमाह रजोगुणसमुद्भवः दुःखप्रवृत्तिबलात्मको रजोगुणस्तत्समु

श्रीभगवानुवाच काम एष क्रोध एष रजोगुणसमुद्भवः महाशनो महापाप्मा विद्ध्येनमिह वैरिणं ३८

द्भवः कारणं यस्य अतः कारणानुविधायित्वात्कार्यस्य सोऽपि तथा यद्यपि तमोगुणोऽपि तस्य कारणं तथापि दुःखे प्रवृत्तौ
च रजस एव प्राधान्यात्तस्यैव निर्देशः एतेन सात्त्विक्या वृत्त्या रजसि क्षीणे सोऽपि परिक्षीयत इत्युक्तं। अथवा तत्स्वकथमन
र्थमार्गप्रवर्तकत्वमित्यत आह रजोगुणस्य प्रवृत्त्यादिलक्षणस्य समुद्भवो यस्मात् कामो हि विषयाभिलाषात्मकः स्व
यमुद्भूतो रजः प्रवर्तयन्पुरुषं दुःखात्मके कर्मणि प्रवर्तयति तेनायमवश्यं हन्तव्य इत्यभिप्रायः। ननु सामदानभेद
दण्डाश्चत्वार उपायास्तत्र प्रथमत्रिकस्यासंभवे चतुर्थो दण्डः प्रयोक्तव्यो ननु तत्र दानादेस्त्याज्यः कथं प्रयोगासंभवं

छ्द: साक्षी

गी०टी०२ बक्तुं विशिनष्टि महाशनो महापाप्मेति महदशनमस्येति महाशनः। यत्पृथिव्यां व्रीहियवं हिरण्यं पशवः स्त्रियः। ना
७९ लमेकस्य तत्सर्वमिति मत्वा शमं व्रजेदिति स्मृतेः। अतो न दानेन संधातुं शक्यः। नापि साम भेदाभ्यां यतो महापाप्माऽसु
ग्रः। तेन हि बलात्प्रेरितोऽनिष्टफलमपि जानन्नपि पापं करोति। अतो विद्धि जानीहि। एनं काममिह संसारे वैरिणं त
द्वेतत्सर्वविद्वत्तं वार्तिककारैरात्मैवेदमग्र आसीदिति श्रुतिव्याख्याने। प्रवृत्तौ च निवृत्तौ च यथोक्तस्याधिकारिणः।
स्वातन्त्र्ये सति संसारः स्वतोऽकस्मात्प्रवर्तते। न तु निःशेषविध्वस्तसर्वानर्थवर्त्मनि। निवृत्तिलक्षणो वाक्यैः केनार्थं रा
प्रेर्यतेऽवशः। अनर्थपरिपाकत्वमपि जानन्प्रवर्तते। पारतन्त्र्यमृते दृष्टा प्रवृत्तिर्नेदृशी क्वचित्। तस्माच्छ्रेयोऽर्थिनः
पुंसः प्रेरकोऽनिष्टकर्मणि। वक्तव्यस्तन्निरासार्थमित्यर्थोस्यालराङ्कतिः। अनात्मपुरुषार्थो यो निःशेषानर्थ
संकुलः। इत्यकामयतानात्मन्पुमर्थांश्चासाधनेऽर्जुनः। जिहासति तथानर्थान्विद्वानात्मनि निश्चितान्। अवि
द्योद्भूतकामः सन्ननर्थो खल्विति वक्ष्यति। अकामतः क्रियाः काश्चिद्दृश्यन्ते नेह कस्यचित्। यद्यद्धि कुरुते जन्तु
स्तत्तत्कामस्य चेष्टितम्। काम एष क्रोध एष इत्यादिवचनं स्मृतेः। प्रवर्तको नापरोऽतः कामादन्यः प्रतीयत ७९
इति। अकामत इति मनुवचनम्। अन्यत्स्पष्टम्। ३७

रा

तस्य महापाप्मत्वेन वैरित्वमेव दृष्टान्तैः स्पष्टयति। तत्र शरीरमात्मागन्तःकरणस्यालब्धवृत्तिको वासनारूपः कामः शरीरा
रंभकेण कर्मणा स्थूलशरीरावच्छिन्नेन लब्धवृत्तिकेन्तःकरणेऽभिव्यक्तिः सन्स्थूलो भवति स एव विषयस्य चिन्त्यमा
नतावस्थायां पुनः पुनरुद्दिच्यमानः स्थूलतरो भवति स एव पुनर्विषयस्य भुज्यमानतावस्थायां मत्यन्तोद्रेकं प्राप्तः स्थू या
लतमो भवति तत्र प्रथमावस्थायां दृष्टान्तः। यथा धूमेन सहजेनाप्रकाशात्मकेन प्रकाशात्मको वह्निरावियते द्वितीय
वस्थायां दृष्टान्तः यथादर्शो मलेनागन्तुकेन सहजेनादर्शोत्पत्त्यनन्तरमुद्भिन्नेन चकारोऽवान्तरवैधर्म्यसूचनार्थः। आवियत

धूमेनाव्रियते वह्निर्यथादर्शो मलेन च यथोल्बेनावृतो गर्भस्तथा तेनेदमावृतम् ३८

इति क्रियानुकर्षणार्थश्च। तृतीयावस्थायां दृष्टान्तः यथोल्बेन जरायुणा गर्भवेष्टनचर्मणाऽतिस्थूलेन सर्वतो निरुध्यावृ
तः तथा प्रकारत्रयेणापि तेन कामेनेदमावृतं अत्र धूमेनावृतोपि वह्निर्दाहादिलक्षणं स्वकार्यं करोति मलेनावृतस्त्वा
दर्शः प्रतिबिंबग्रहणलक्षणं स्वकार्यं न करोति स्वच्छताधर्ममात्रतिरोधानात्स्वरूपतस्तूपलभ्यत एव उल्बेनावृ
तस्तु गर्भो न हस्तपादादिप्रसारणरूपं स्वकार्यं करोति न वा स्वरूपत उपलभ्यत इति विशेषः ३८

श्रीटी.

८०

तथापि तेनेदमावृतमिति संग्रहवाक्यं विवृणोति आवृतमिति ज्ञानमंतःकरणं विवेकविज्ञानं वा इदं शब्दनिर्दिष्टमेतेन
कामेनावृतं। नन्वापातसुखहेतुत्वादुपादेय एव स्यादित्यत आह ज्ञानिनो नित्यवैरिणा अज्ञो हि विषयभोगकाले कामं मि
त्रमिव पश्यंस्तत्कार्ये दुःखे प्राप्ते वैरिणं जानाति कामेनाहं दुःखित्वमापादित इति ज्ञानी तु भोगकालेऽपि जानात्यनेनाहमनर्थे
प्रवेशित इत्यतो ज्ञानी अविवेकी दुःखी भवति भोगकाले च तत्परिणामे चानेनेति ज्ञानिनोऽसौ नित्यवैरीति सर्वथा तेन हंतव्य एवे
त्यर्थः तर्हि किंस्वरूपोऽसावित्यत आह कामरूपेण कामनमिच्छा सैव रूपं यस्य तेन हे कौंतेयेति संबंधाद्विकारेण

आवृतं ज्ञानमेतेन ज्ञानिनो नित्यवैरिणा। कामरूपेण कौंतेय दुष्पूरेणानलेन च ३९

प्रेमाणं सूचयति। ननु विवेकिनो हंतव्योऽप्यविवेकिन उपादेयः स्यादित्यत आह दुःपूरेणानलेन च चकार उपमार्थः न
विद्यते अलं पर्याप्तिर्यस्य यथानलो वह्निः सर्पिषा हविषा पूरयितुमशक्यस्तथायमपि भोगेनेत्यर्थः अतो निरंतरं संतापहे
तुत्वाद्विवेकिनइवाविवेकिनोऽपि हेय एवासौ तथा च स्मृतिः न जातु कामः कामानामुपभोगेन शाम्यति। हविषा कृष्ण
वर्त्मेव भूय एवाभिवर्द्धत इति। अथवा इच्छायाविषयासिद्धि निवर्त्यत्वादि आरूपः कामो विषयभोगेन स्वरूपेणैव निवर्ति
ष्यते किं तत्र ज्ञाननिर्बंधेनेत्यत उक्तं दुःपूरेणानलेन चेति। विषयसिद्धौ तात्कालिकं क्षणमात्रं तिरोधानेऽपि पुनः प्रादुर्भावात् विषय



सिद्धिरिच्छा[illegible]
[illegible]

८०

ज्ञाते हि शत्रोरधिष्ठाने सुखेन स जेतुं शक्यत इति तदधिष्ठानमाह इंद्रियाणि शब्दस्पर्शरूपरसगंधग्राहकाणि श्रोत्रादीनि
वचनादानगमनविसर्गानंदजनकानि वागादीनि च मनः संकल्पात्मकं बुद्धिरध्यवसायात्मिका च अस्य कामस्या
धिष्ठानमाश्रय उच्यते यतः एतैरिंद्रियादिभिः स्वस्वव्यापारवद्भिराश्रयैर्विमोहयतीति विविधं मोहयति एष कामो
ज्ञानं विवेकज्ञानमावृत्याच्छाद्य देहिनं देहाभिमानिनं ४० यस्मादेवं यस्मादिंद्रियाधिष्ठानः कामो देहिनं मोहयति
तस्मात्त्वमादौ मोहनात्पूर्वं कामनिरोधात्पूर्वमिति वा इंद्रियाणि श्रोत्रादीनि नियम्य वशीकृत्य तेषु हि वशीकृतेषु मनोबु

इंद्रियाणि मनो बुद्धिरस्याधिष्ठानमुच्यते एतैर्विमोहयत्येष ज्ञानमावृत्य देहिनम् ४१
तस्मात्त्वमिंद्रियाण्यादौ नियम्य भरतर्षभ पाप्मानं प्रजहिह्येनं ज्ञानविज्ञाननाशनम् ४२

द्धोरपि वशीकरणं सिध्यति संकल्पाध्यवसाययोर्बाह्येंद्रियप्रवृत्तिद्वारैवानर्थहेतुत्वादत इंद्रियाणि मनो बुद्धिरिति
हे पूर्वपद्यद्वि ईंद्रियाणींद्रियाणीत्येतावदुक्तं इंद्रियत्वेन तयोरपि संग्रहो वा हे भरतर्षभ महावंशप्रसूतत्वेन समर्थोऽसि
पाप्मानं सर्वपापमूलभूतमेनं कामं वैरिणं प्रजहिहि परित्यज हि स्फुटं प्रजहिहि प्रकर्षेण मारय इति वा जहि शत्रुमि
त्युपसंहाराच्च ज्ञानं शास्त्राचार्योपदेशजं परोक्षं विज्ञानमपरोक्षं तत्फलं तयोर्ज्ञानविज्ञानयोः श्रेयःप्राप्तिहेतुभूतयोर्नाशनं ४२

ननु यथा कथंचिद्बाह्येंद्रियनियमसंभवेप्यांतरतृष्णात्यागोतिदुष्कर इति चेत्। न। रसोप्यस्य परं दृष्ट्वा निवर्तत इत्यत्र परदर्शनस्य रसाभिधा
नीयकतृष्णात्यागसाधनस्य प्रागुक्तेः। तर्हि को सौ परो यद्दर्शनात्तृष्णानिवृत्तिरित्याशंक्य शुद्धमात्मानं परशब्दवाच्यं देहादिभ्यो विविच्य
दर्शयति श्रोत्रादीनि ज्ञानेंद्रियाणि पंच स्थूलं जडं परिच्छिन्नं बाह्यं च देहमपेक्ष्य पराणि सूक्ष्मत्वात्प्रकाशकत्वाद्व्यापकत्वादंतस्थ
त्वाच्च प्रकृष्टान्याहुः पंडिताः श्रुतयो वा तथेंद्रियेभ्यः परं मनः संकल्पविकल्पात्मकं तत्प्रवर्तकत्वात्। तथा मनसस्तु परा बुद्धिरध्यवसा
यात्मिका अध्यवसायो हि निश्चयस्तत्पूर्वक एव संकल्पादिर्मनोधर्मः। यस्तु बुद्धेः परतस्तद्भासकत्वेनावस्थितः यं देहिनमिंद्रिया
दिभिराश्रयैर्युक्तः कामो ज्ञानावरणद्वारेण मोहयतीत्युक्तं स बुद्धेर्द्रष्टा परमात्मा। स एष इह प्रविष्ट इति व्यवहितस्यापि देहिनस्त

इंद्रियाणि पराण्याहुरिंद्रियेभ्यः परं मनः मनसस्तु परा बुद्धिर्यो बुद्धेः परतस्तु सः ४२

त्पदपरामर्शः। अत्र श्रुतिः। इंद्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः। मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान्परः। महतः परम
इति व्यक्तमव्यक्तात्पुरुषः परः। पुरुषान्न परं किंचित्सा काष्ठा सा परा गतिः। अत्रात्मनः परत्वस्यैव वाक्यतात्पर्यविषयत्वादिं
द्रियादिपरत्वस्याविवक्षितत्वादिंद्रियेभ्यः परा ह्यर्था इति स्थाने अर्थेभ्यः पराणींद्रियाणीति विवक्षाभेदेन भगवदुक्तं न वि
रुध्यते। बुद्धेरस्मदादिव्यष्टिबुद्धेः सकाशान्महानात्मा समष्टिबुद्धिरूपः परः। मनो महान्मतिर्ब्रह्मा पूर्बुद्धिः ख्यातिरी ३
श्वर इति वायुपुराणवचनात् महतो हिरण्यगर्भबुद्धेः परमव्यक्तमव्याकृतं सर्वजगद्बीजं मायाख्यं मायां तु प्रकृतिं वि ८१
द्यादिति श्रुतेः। तदुक्तं तम आसीदिति च अव्यक्तात्सकाशात्सकलजडवर्गप्रकाशकः पुरुषः पूर्ण आत्मा परः। तस्मा

दपि कश्चिदन्यः परः स्यादित्यत आह पुरुषान्न परं किंचिदिति। कुत एवं यस्मात्सा काष्ठा समाप्तिः सर्वाधिष्ठानत्वात्सा परा ग
तिः सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदमित्यादिश्रुतिप्रसिद्धा परा गतिरपि सैवेत्यर्थः। तदेतत्सर्वं यो बुद्धेः परतस्तु
स इत्यनेनोक्तम् ४२ फलितमाह रसोप्यस्य परं दृष्ट्वा निवर्तत इत्यत्र यः परशब्देनोक्तस्तमेवंभूतं पूर्णमात्मानं बुद्धेः परं
बुद्ध्वा साक्षात्कृत्य संस्तभ्य स्थिरीकृत्यात्मानं मनः आत्मना एतादृशनिश्चयात्मिकया बुद्ध्या जहि मारय शत्रुं सर्वपुरुषार्थ

एवं बुद्धेः परं बुद्ध्वा संस्तभ्यात्मानमात्मना जहि शत्रुं महाबाहो कामरूपं दुरासदम् ४४

इति श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे कर्म
योगो नाम तृतीयोध्यायः ३

शातनं हे महाबाहो महाबाहो हि शत्रुमारणं सुकरमिति योग्यं संबोधनं। कामरूपं तृष्णारूपं दुरासदं दुःखेनासाद
नीयं दुर्विज्ञेयानेकविशेषमिति यत्नाधिक्याय विशेषणं उपायः कर्मनिष्ठात्र प्राधान्येनोपसंहृता उपे
या ज्ञाननिष्ठा तु तद्गुणत्वेन कीर्तिता इति श्रीपरमहंसपरिव्राजकाचार्यश्रीविश्वेश्वरसरस्वतीश्रीपादशिष्य
श्रीमधुसूदनसरस्वतीविरचितायां श्रीभगवद्गीतागूढार्थदीपिकायां तृतीयोऽध्यायः श्रीकृष्णः

टीकाग्रंथ ७५०

यद्यपिपूर्वाध्यायेषूपेयत्वेन ज्ञानयोगस्तदुपायत्वेन च कर्मयोग इति द्वौ योगौ कथितौ तथाप्येकं सांख्यं च योगं च यः पश्यति स
पश्यतीत्यनया दिशा साध्यसाधनयोः फलैक्यादैक्यमुपवर्ण्य साधनभूतं कर्मयोगं साध्यभूतं च ज्ञानयोगमनेकविधगु
णविधानाय स्तौतिवंशकथनेन भगवान् १ इममध्यायद्वयेनोक्तं योगं ज्ञाननिष्ठालक्षणं कर्मनिष्ठोपायलभ्यं विवस्व
ते सर्वक्षत्रियवंशबीजभूताय आदित्याय प्रोक्तवान् प्रकर्षेण सर्वसंदेहोच्छेदादिरूपेणोक्तवानहं भगवान् वासुदेवः सर्व
जगत्परिपालकः सर्गादिकाले राज्ञां बलाधानेन तदधीनं सर्वं जगत्पालयितुं कथमनेन बलाधानमिति विशेषणेन

भगवानुवाच १ इमं विवस्वते योगं प्रोक्तवानहमव्ययं विवस्वान्मनवे प्राह मनुरिक्ष्वाकवेऽब्रवीत् २

दर्शयति। अव्ययमिति। अव्ययवेदमूलत्वादव्ययं मोक्षफलत्वाद्वा न व्येति स्वफलादित्यव्ययमव्यभिचारिफलम्
तथा चैतादृशेन बलाधानं शक्यमिति भावः। स च मम शिष्यो विवस्वान् मनवे वैवस्वताय स्वपुत्राय प्राह स च मनुरि ८२
क्ष्वाकवे स्वपुत्राय आदिराजाय अब्रवीत्। यद्यपि प्रतिमन्वंतरं स्वायंभुवमन्वादिसाधारणोऽयं भगवदुपदेशस्तथापि
सांप्रतिकवैवस्वतमन्वंतराभिप्रायेणादित्यमारभ्य संप्रदायो गणितः २ श्लोका...

एवमादिमाराध्य परंपरया प्राप्तमिमं योगं राजानश्च ते ऋषयश्चेति राजर्षयः प्रभुत्वे सति सूक्ष्मार्थनिरीक्षणक्षमा निमिप्रमु
खाः स्वपित्रादिप्रोक्तं विदुः तस्मादनादिवेदमूलत्वेनानंतफलत्वेनानादिगुरुशिष्यपरंपराप्राप्तत्वेन च कृत्रिमत्वशंकानास्पदत्वात्महाप्रभा स्वे
वोऽयं योग इति श्रद्धातिशयाय स्तूयते स एवं महाप्रयोजनोऽपि योगः कालेन महता दीर्घेणाधर्मप्राबल्यकरेण इह इदानीमाव
योरव्यवहारकाले द्वापरांते दुर्बलानजितेंद्रियाननधिकारिणः प्राप्य कामक्रोधादिभिरभिभूयमानो नष्टः विच्छिन्नसंप्रदायो जातः तादृशं
पुरुषार्थाप्राप्तेः अहो दौर्भाग्यं लोकस्येति शोचति भगवान् हे परंतप परं कामक्रोधादिरूपं शत्रुगणं शौर्येण बलवता विवेकेन

एवं परंपराप्राप्तमिमं राजर्षयो विदुः स कालेनेह महता योगो नष्टः परंतप ३
स एवायं मया तेऽद्य योगः प्रोक्तः पुरातनः भक्तोऽसि मे सखा चेति रहस्यं ह्येतदुत्तमम् ४

तपसा च भानुरिव तापयतीति परंतपः शत्रुतापनो जितेंद्रिय इत्यर्थः। उर्वश्युपेक्षणादद्भुतकर्मदर्शनात् तस्मात्त्वं जितेंद्रियत्वाद
त्राधिकारीति सूचयति ३ य एवं पूर्वमुपदिष्टोऽप्यधिकार्यभावाद्विच्छिन्नसंप्रदायोऽभूत् यं विना च पुरुषार्थो न लभ्यते स एवायं पुरा
तनोऽनादिगुरुपरंपरागतो योगोऽद्य संप्रदायविच्छेदकाले मया तेतिस्निग्धेन तुभ्यं प्रकर्षेणोक्तः न त्वन्यस्मै कस्मैचित्। कस्मात् यतो
भक्तोऽसि मे सखा चेति इतिशब्दो हेत्वर्थे यस्मात्त्वं मम भक्तः शरणागतत्वे सत्यत्यंतप्रीतिमान् सखा च समानवयाः स्निग्धसहायो
ऽसि सर्वदा भवसि अतस्तुभ्यमुक्तमित्यर्थः। अन्यस्मै कुतो नोच्यते तत्राह हि यस्मादेतज्ज्ञानमुत्तमं रहस्यं अतिगोप्यम् ४

गीता मधुसू

गी॰टी॰४ या भगवति वासुदेवे मनुष्यत्वेनासर्वज्ञत्वानित्यत्वाशंका मूर्खाणां तामर्जुनमुखेनापनेतुं [illegible] शंकते [illegible] रमल्पकालीनमिदानींतनं व
सुदेवगृहे भवतो जन्म शरीरग्रहणं हीनमनुष्यत्वात् परं च [illegible] कालीनं सर्गादिभवं [illegible] देवत्वात् विवस्वतो [illegible] जन्मा
८३ नावस्थ प्राग्[illegible] त्वादिनवादे [illegible] नस्य प्रश्नः । अतः कथमेतद्विजानीयामविरुद्धार्थतया एतत् [illegible] थमेव विद्वत्तोति व
[illegible] त्वं प्रोक्तवानिति [illegible] दानीतनो मनुष्यः सर्वतः सर्गादौ पूर्वतनाय सर्वज्ञायादित्याय प्रोक्तवानितिविरुद्धार्थमेतदितिभावः । अ
तव [illegible] र्यं निर्गलितोर्थः एतद्देहानवच्छिन्नस्य [illegible] देहेन वा आदित्यं प्रत्युपदिष्टवानेतद्देहेन वा नाद्यः जन्मांतरानुभूतस्यासर्वज्ञेन
स्मर्तुमशक्यत्वात् [illegible] जन्मांतरानुभूत [illegible] तव मम च [illegible] नासर्वज्ञत्वाविशेषात् । तदुक्तमभियुक्तैः आतिय

अर्जुन उवाच [illegible] अपरं भवतो जन्म परं जन्म विवस्वतः कथमेतद्विजानीयां त्वमादौ प्रोक्तवानिति ५

जन्मानि श्रीभगवानुवाच [illegible] बहूनि मे व्यतीतानि जन्मानि तव चार्जुन तान्यहं वेद सर्वाणि न त्वं वेत्थ परंतप ६

[illegible] इति [illegible] द्वितीयः सर्गादावेदानींतनस्य देहस्यासद्भावात् देवं देहांतरेण सर्गादौ सद्भावे संभवेपीदानीं [illegible]
[illegible] देहेन [illegible] पपन्नत्वात् सर्गादौ सद्भावानुपपत्तिरिति सर्वज्ञत्वानित्यत्वाभ्यां द्वाभ्यामर्जुनस्य पूर्वपक्षो ५ तत्र
[illegible] लीलादेह [illegible] लोक [illegible] अभिप्रायेणादित्यस्योदय [illegible] बहूनि व्यतीतानि तव चा
[illegible] ग्रह [illegible] मपि जीवानां [illegible] भेदाभिप्रायेण हे अर्जुन [illegible] अर्जुन च
[illegible] सर्वज्ञः सर्वशक्तिरीश्वरो वेद जानामि सर्वाणि मदीयानि त्वं [illegible]

[illegible] तोजीवः [illegible] ज्ञानशक्तिर्वैभवत्वात् नास्मिरीत्या [illegible] यदि [illegible] परंतप [illegible] भेददृष्ट्यापि कल्प
हेतु [illegible] तद्दर्शि [illegible] अस्मीति सूचयाति [illegible] देहेन संबोधन द्वयेन [illegible] ६
[illegible] नः स्मरसि चेत्तर्हि जातिस्मरो [illegible] परजन्मज्ञानमपि योगिनः सार्वात्म्याभिमानेन [illegible]
[illegible] देववदिति न्यायेन [illegible] भवति तथा चाह वामदेवो [illegible] अहं मनुरभवं सूर्यश्चाहं कक्षीवानृषिरस्मि विप्र इत्यादि दाशतय्यां [illegible]
तस्य [illegible] मुख्यं सर्वज्ञत्वं तथा च कथमादित्यं सर्वज्ञमुपदिष्टवानस्य नीश्वरः सन्। नहि जीवस्य मुख्यं सार्वज्ञं संभवति । व्यष्ट्युपाधेः
परिच्छिन्नत्वेन सर्वसंबंधित्वाभावात् समष्ट्युपाधेरपि विशतः स्थूलभूतोपाधित्वेन सूक्ष्मभूतपरिणामविषयं च ज्ञा [illegible] नं न संभ मायापरिणा
वति । एवं सूक्ष्मभूतोपाधेरपि हिरण्यगर्भस्य तत्कारण [illegible] मायापरिणामाकाशादि सर्गक्रम [illegible] विषयज्ञानाभावः सिद्ध एव । मविषयं च द
[illegible] दीश्वर एव [illegible] कारणोपाधित्वात् अतीतानागतवर्तमानसर्वार्थविषयज्ञानवान् मुख्यः सर्वज्ञः अतीतानागतवर्तमानविषयमा
[illegible] केवलासर्वविषया मायावृत्तिरिष्यते [illegible] ईश्वरस्य सर्वज्ञत्व धर्माधर्माभावेन जन्मैव अनुपपन्नमतीता
नेकजन्मवत्त्वं तु दूरोत्सारितं [illegible] जीवत्वे सार्वज्ञानुपपत्तिरीश्वरत्वे च देहग्रहणानुपपत्तिरिति शंकाद्वयं परिहरन् नित्य
त्वपक्षस्यापरिहारमाह अज [illegible] पि सन्नव्ययात्मा भूतानामीश्वरोपि सन् प्रकृतिं स्वामधिष्ठाय संभवाम्यात्ममाय
या ७ अपूर्वदेहेंद्रियादि [illegible] पूर्वगृहीतदेहेंद्रियादिवियोगो व्ययः तदुभयं तार्किकैः प्रेत्यभाव इत्युच्यते । तदुक्तं ।
[illegible] स्य हि [illegible] स्य चेति । तदुभयं धर्माधर्मवशाद्भवति । धर्माधर्मवशत्वं च अज्ञस्य जीवस्य देहाभिमानि

गी॰टी॰४ नः कर्माधिकारित्वाद्भवति। तत्र यदुच्यते। सर्वज्ञस्येश्वरस्य सर्वकारणस्येदृग्देहग्रहणं नोपपद्यत इति तन्नैवं कथं यदि तस्य
८४ शरीरं स्थूलभूतकार्यं स्यात्तदा व्यष्टिरूपत्वेन जाग्रदवस्थास्मदादितुल्यत्वं। समष्टिरूपत्वे च विराट्जीवत्वं तस्य तदुपाधित्वात्।
अथ सूक्ष्मभूतकार्यं तदा व्यष्टिरूपत्वे स्वप्नावस्थास्मदादितुल्यत्वं समष्टिरूपत्वे च हिरण्यगर्भजीवत्वं च तदुपाधित्वात्। तथा च स्यात
भौतिकं शरीरं जीवानाविष्टं परमेश्वरस्य न संभवत्येवेति सिद्धं। न च जीवाविष्ट एव तादृशे शरीरे तस्य भूतावेशवत्तदावेश इति वा
स्पष्टोग्या च्यं तच्छरीरावच्छेदेन तज्जीवोऽभ्युपगमे ऽन्तर्यामिरूपेण सर्वशरीरप्रवेशस्य विद्यमानत्वेन शरीरविशेषाभ्युपगमवैयर्थ्यात् भोगा ना
भावे च जीवशरीरत्वानुपपत्तेः अतो न भौतिकं शरीरमीश्वरस्येति पूर्वार्द्धेनांगीकरोति। अजोपि सन्नव्ययात्मा भूतानामीश्वरोपि स
न्निति। अजोपि सन्नित्यपूर्वदेहग्रहणं अव्ययात्मापि सन्निति पूर्वदेहोच्छेदं। भूतानामभवनधर्माणां सर्वेषां ब्रह्मादिस्तंबपर्यंतानां
मीश्वरोपि सन्निति धर्माधर्मवशत्वं निवारयति। कथं तर्हि देहग्रहणमित्युत्तरार्द्धेनाह। प्रकृतिं स्वामधिष्ठाय संभवामि। प्रकृ
तिं मायाख्यां विचित्रानेकशक्तिमघटमानघटनापटीयसीं स्वां स्वोपाधिभूतामधिष्ठाय चिदाभासेन वशीकृत्य संभवामि त
त्परिणामविशेषैरेव देहवानिव जात इव च भवामि अनादिमायैव मदुपाधिभूता यावत्कालस्थायित्वेन च नित्या जगत्कारणत्व ८४
संपादिका मदिच्छयैव प्रवर्त्तमाना विशुद्धसत्वमयत्वेन मम मूर्त्तिस्तद्विशिष्टस्य चाजत्वमव्ययत्वमीश्वरत्वं चोपपन्नं। अतोऽनेन
नित्येनैव देहेन विवस्वंतं च त्वां च प्रतीमं योगमुपदिष्टवानहमित्युपपन्नं। तथा च श्रुतिः। आकाशशरीरं ब्रह्मेति आकाशोत्रा
व्याकृतं आकाश एव तदोतं च प्रोतं चेत्यादौ तथा दर्शनात्। आकाशस्तल्लिंगादिति न्यायाच्च। तर्हि भौतिकविग्रहाभावात्त

र्हि मनुष्यत्वादिप्रतीतिः कथमिति चेत्तत्राह। आत्ममाययेति। मन्माययैव मयि मनुष्यत्वादिप्रतीतिर्लोकानुग्रहाय न तु वस्तु
वृत्त्येति भावः। तथा चोक्तं मोक्षधर्मे। माया ह्येषा मया सृष्टा यन्मां पश्यसि नारद। सर्वभूतगुणैर्युक्तं नतु मां द्रष्टुमर्हसीति। सर्व
भूतगुणैर्युक्तं कारणोपाधिं मां चर्मचक्षुषा द्रष्टुं नार्हसीत्यर्थः। उक्तं च भगवता भाष्यकारेण। स च भगवान् ज्ञानैश्वर्यशक्ति
बलवीर्यतेजोभिः सदासंपन्नस्त्रिगुणात्मिकां वैष्णवीं स्वां मायां प्रकृतिं वशीकृत्याजोऽव्ययो भूतानामीश्वरो नित्यशुद्धबुद्ध
मुक्तस्वभावोपि सन् स्वमायया देहवानिव जात इव च लोकानुग्रहं कुर्वन्लक्ष्यते स्वप्रयोजनाभावेपि भूतानुजिघृक्षयेति
व्याख्यातं मिश्रैरुक्तं। स्वेच्छाविनिर्मितेन मायामयेन दिव्येन रूपेण संबभूवेति। नित्यो यः कारणोपाधिर्मायाख्योनेकशक्ति
मान्। स एव भगवद्देह इति भाष्यकृतां मतं। अन्ये तु परमेश्वरे देहदेहिभावं न मन्यंते य एव नित्यो विभुः सच्चिदानंदघनो भ
गवान्वासुदेवः परिपूर्णो निर्गुणः परमात्मा स एव तद्विग्रहो नान्यः कश्चिद्भौतिको मायिको वेति। अस्मिन्पक्षे योजना।
आकाशवत्सर्वगतश्च नित्यः अविनाशी वा अरेयमात्मानुच्छित्तिधर्मेत्यादिश्रुतेः। असंभवस्तु सतोऽनुपपत्तेः नात्माश्रु
तेर्नित्यत्वाच्च ताभ्य इत्यादिन्यायाच्च। वस्तुगत्या जन्मविनाशरहितः सर्वभासकः सर्वकारणमायाधिष्ठानत्वेन सर्वभूतेश्व
रोपि सन्नहं प्रकृतिं स्वभावं सच्चिदानंदघनैकरसं मायां व्यावर्त्तयति स्वामिति निजस्वरूपमित्यर्थः स भगवः कस्मिन्प्रति
ष्ठितः स्वे महिम्नि इति श्रुतेः। स्वस्वरूपमधिष्ठाय स्वरूपावस्थित एव सन् संभवामि। देहदेहिभावमंतरेणैव देहिवद्व

वहाविकथंतर्हिदेहेसच्चिदानंदघनेदेहवप्रतीतिरतआह। आत्ममायायेति। निर्गुणेशुद्धेसच्चिदानंदरसघनेमयिभगव
तिवासुदेवेदेहदेहिभावशून्येतद्रूपेणप्रतीतिर्मायामात्रमित्यर्थः। तदुक्तं। कृष्णमेनमवेहित्वमात्मानमखिलात्मनांजग
द्धिताय सोप्यत्र देहीवाभातिमाययेति। अहोभाग्यमहोभाग्यंनंदगोपव्रजौकसां। यन्मित्रंपरमानंदंपूर्णंब्रह्मसनातनमि
ति चाकेचित्तुनित्यस्यनिरवयवस्यनिर्विकारस्यापिपरमानंदस्यावयवावयविभावंवास्तवमेवेच्छंति। तन्निर्युक्तिकंश्रुवा
णा स्फुनाश्माभिर्विनिवार्यतइतिन्यायेननापवाद्याः। यदिसंभवेत्तथैवास्तु किमतिपल्लवितेनेत्युपरम्यते ७

यदायदाहिधर्मस्यग्लानिर्भवतिभारत अभ्युत्थानमधर्मस्यतदात्मानंसृजाम्यहम् ८

एवंसच्चिदानंदघनस्यतवकदाकिमर्थंवादेहिवद्व्यवहारइतितत्रोच्यते। धर्मस्यवेदविहितस्यप्राणिनामभ्युदयनिःश्रे
यससाधनस्यप्रवृत्तिनिवृत्तिलक्षणस्यवर्णाश्रमतदाचारव्यंग्यस्ययदायदाग्लानिर्हानिर्भवति। हेभारतभरतवंशो
द्भववेनभाग्वानंतत्ररतत्वेनवात्वंनधर्महानिंसोढुंशक्नोषीतिसंबोधनार्थः। एवंयदायदाभ्युत्थानमुद्भवोऽधर्म
स्यवेदनिषिद्धस्यनानाविधदुःखसाधनस्यधर्मविरोधिनः तदातदात्मानंदेहंसृजामिनित्यसिद्धमेवसृष्ट
मिवदर्शयामिमायया. ८ 

तत्किंधर्मस्यहानेरधर्मस्यचवृद्धिस्तवपरितोषकारणंयेनतस्मिन्नेवकालआविर्भवसीतितथा [illegible] नर्थंतहुतवावत
रस्यामीतितेनाह। धर्महान्याहीयमानानांसाधूनांपुण्यकारिणांवेदमार्गस्थानांपरित्राणायपरितःरक्षणाय
ऽधर्मवृद्ध्यावर्द्धमानानांदुष्कृतानांपापकारिणांवेदमार्गविरोधिनांविनाशायच। तदुभयंकथंस्यादितितत्राह। ध
र्मसंस्थापनार्थायधर्मस्यसम्यक्अधर्मनिवारणेनवैस्थापनंवेदमार्गपरिरक्षणंधर्मसंस्थापनंतदर्थंसंभवामि। पूर्ववत्
युगेयुगेप्रतियुगम्. ९ जन्मनित्यसिद्धस्यैवममसच्चिदानंदघनस्यलीलयातथानुकरणंकर्मचधर्मसंस्थापनेनजगत

परित्राणायसाधूनांविनाशायचदुष्कृताम्. धर्मसंस्थापनार्थायसंभवामियुगेयुगे ९
जन्मकर्मचमेदिव्यमेवंयोवेत्तितत्त्वतः त्यक्त्वादेहंपुनर्जन्मनैतिमामेतिसोऽर्जुन १०

त्परिपालनंममनित्यसिद्धेश्वरस्यदिव्यमप्राकृतमन्यैःकर्तुमशक्यमीश्वरस्यैवासाधारणंएवमजोपिसन्नित्यादिनाप्रति
पादितंयोवेत्तितत्त्वतोभ्रमनिवर्त्तनेनाम्. देहोहंमनुष्यत्वभ्रांत्याभगवतोपिगर्भवासादिरूपमेवजन्मस्वभोगार्थमेवकर्मत्यारो
पितंपरमार्थतःशुद्धसच्चिदानंदरूपत्वज्ञानेनतदपनुद्यअजस्यापिमायया जन्मानुकरणमकर्तुरपिपरानुग्रहायक
र्मानुकरणमित्येवंयोवेत्तिसआत्मनोपितत्वस्फुरणात्यक्त्वादेहमिमंपुनर्जन्मनैतिकिंतुमांभगवंतंवासुदेवमेवस
च्चिदानंदघनमेतिसंसारान्मुच्यतइत्यर्थः। हेऽर्जुन १०

मामेति सोऽर्जुनेत्युक्तं तत्र स्वस्य सर्वमुक्तप्राप्यतया पुरुषार्थत्वं अस्य मोक्षमार्गस्यानादिपरंपरागतत्वं च दर्शयति रागेत
त्यादिना रागः सर्वान्विषयान्परित्यज्य ज्ञानमार्गे कथं जीवितव्यमिति त्रासो भयं सर्वविषयोच्छेदके ज्ञानमार्गे कथं हितः स्या
दिति द्वेषः क्रोधः एते रागभयक्रोधा वीता विवेकेन विगता येभ्यस्ते वीतरागभयक्रोधाः शुद्धसत्वा मन्मयाः मां परमात्मानं पदार्थं त
त्वं पदार्थाभेदेन साक्षात्कृतवंतः मदेकचित्ता वा मामुपाश्रिताः एकांतप्रेमभक्त्या मामीश्वरं शरणं गताः बहवोऽनेके ज्ञानतपसा ज्ञा
नमेव तपः सर्वकर्मक्षयहेतुत्वात् नहि ज्ञानेन सदृशं पवित्रमिह विद्यत इति हि वक्ष्यति तेन पूताः क्षीणसर्वपापाः संतो निरस्ताज्ञा
नतत्कार्यमलाः मद्भावं मद्रूपं विशुद्धसच्चिदानंदघनं मोक्षमागताः अज्ञानमात्रापनयेन प्राप्ताः ज्ञानतपसा पूता जीवन्मुक्ता

वीतरागभयक्रोधा मन्मया मामुपाश्रिताः बहवो ज्ञानतपसा पूता मद्भावमागताः १०
ये यथा मां प्रपद्यंते तांस्तथैव भजाम्यहम् मम वर्त्मानुवर्तंते मनुष्याः पार्थ सर्वशः ११

संतो मद्भावं मम हि षयं भावं स्वास्थ्यं प्रेमाणमागता इति वा तेषां ज्ञानी नित्ययुक्त एकभक्तिर्विशिष्यत इति हि वक्ष्यति ११
निष्कामा ननु ये ज्ञानतपसा पूतास्ते त्वद्भावं गच्छंति ये त्वपूताः सकामास्ते न गच्छंतीति फलदातुस्तव वैषम्यनैर्घृण्ये स्यातामिति तत्राह
ये आर्ता अर्थार्थिनो जिज्ञासवो ज्ञानिनश्च यथा येन प्रकारेण सकामतया निष्कामतया वा मामीश्वरं फलदातारं प्रपद्यंते भ
जंति तांस्तथैव तदपेक्षितफलदानेनैव भजाम्यनुगृह्णाम्यहं नतु विपर्ययेण तत्र मुमुक्षून् आर्तानर्थार्थिनश्चार्तिहरणेना ८६
र्थदानेन चानुगृह्णामि जिज्ञासूनु विविदिषंति यज्ञेनेत्यादि श्रुतिविहितनिष्कामकर्मानुष्ठानेन ज्ञानदानेन ज्ञानि

नश्च मुमुक्षून् मोक्षदानेन ... अनुगृह्णामीत्यर्थः । ननु तथापि स्वभक्तानामेव फलं ददासि ... नान्यभक्तानामि
ति वैषम्यं स्थितं ... तत्राह मम सर्वात्मनो वासुदेवस्य वर्त्म भजनमार्गं कर्मज्ञानलक्षणं मनुवर्तंते ... सर्वप्र
कारैः इंद्रादीनप्यनुवर्तमाना मनुष्या इति कर्माधिकारिणः इंद्रं मित्रं वरुणमग्निमाहुरित्यादि ... मत्तत्पादे
शितान्यायाच्च सर्वरूपेणापि फलदाता भगवानेक एवेत्यर्थः । तथा च वक्ष्यति ये प्यन्यदेवताभक्ता इत्यादि ...
ननु तर्हि केऽपि भगवंतं वासुदेवं किमिति सर्वे न प्रपद्यंत इति तत्राह कर्मणां सिद्धिं फलनिष्पत्तिं कांक्षंत इह लोके देवता इज्य

कांक्षंतः कर्मणां सिद्धिं यजंत इह देवताः क्षिप्रं हि मानुषे लोके सिद्धिर्भवति कर्मजा १२

इंद्राद्या यान्यजंते पूजयंति अज्ञानप्रतिहतत्वान्न तु निष्कामाः संतो मां भगवंतं वासुदेवमिति शेषः । कस्मात् हि यस्मात्
इंद्रादिदेवतायाजिनां तत्फलकांक्षिणां कर्मणां सिद्धिः कर्मजं फलं क्षिप्रं शीघ्रमेव भवति मानुषे लोके ज्ञानफलं तु कर्मक
णाशुद्धिसापेक्षत्वान्न क्षिप्रं भवति मानुषे लोके कर्मफलं शीघ्रं भवतीति विशेषणादन्यलोकेऽपि वर्णाश्रमधर्मव्यतिरि
क्तकर्मफलसिद्धिर्भगवता सूचिता । यतस्ततः क्षुद्रफलसिद्ध्यर्थं सकामा मोक्षविमुखा अन्या देवता यजंते अतो न मुमु
क्षव इव मां वासुदेवं साक्षात्प्रपद्यंत इत्यर्थः । १२ शरीरारंभकगुणवैषम्यादपि न सर्वे समानस्वभावा इत्याह

गी॰टी॰४ चत्वारोवर्णाएवचातुर्वर्ण्यंस्वार्थेष्यञ्मयेश्वरेणसृष्टमुत्पादितंगुणकर्मविभागशःगुणविभागशःकर्मविभागशश्चतथा
८७ हिसत्वप्रधानाब्राह्मणास्तेषांचसात्विकानिशमदमादीनिकर्माणिसत्वोपसर्जनरजःप्रधानाःक्षत्रियास्तेषांचतादृशानि
शौर्यतेजःप्रभृतीनिकर्माणि।तमउपसर्जनरजःप्रधानावैश्यास्तेषांचकृष्यादीनितादृशानिकर्माणि।तमःप्रधानाःशूद्राः
स्तेषांचतामसानित्रैवर्णिकशुश्रूषादीनिकर्माणीतिमानुषेलोकेव्यवस्थितानि।एवंतर्हिविषमस्वभावचातुर्वर्ण्यस्रष्टृ
त्वेनतववैषम्यंदुर्वारमित्याशंक्यनेत्याह।तस्यविषमस्वभावस्यचातुर्वर्ण्यस्यव्यवहारदृष्ट्याकर्तारमपिमांपरमार्थदृष्ट्या

चातुर्वर्ण्यंमयासृष्टंगुणकर्मविभागशः तस्यकर्तारमपिमांविद्ध्यकर्तारमव्ययम् १४
नमांकर्माणिलिंपंतिनमेकर्मफलेस्पृहा इतिमांयोभिजानातिकर्मभिर्नसबध्यते १५

विद्ध्यकर्तारमव्ययम्निरहंकारत्वेनाक्षीणमहिमानं १४ कर्माणिविश्वसर्गादीनिमांनिरहंकारत्वेनकर्तृत्वाभिमानहीनं
भगवंतंनलिंपंतिदेहारंभकत्वेननबध्नंतिएवंकर्तृत्वंनिराकृत्यभोक्तृत्वंनिराकरोति।नमेममाप्तकामस्यकर्मफलेस्पृहा।तृ ८७
ष्णाआप्तकामस्यकास्पृहेतिश्रुतेः।कर्तृत्वाभिमानफलस्पृहाभ्यांहिकर्माणिलिंपंतितदभावान्नमांकर्माणिलिंपंतिएवंयो
न्योपिमामकर्तारमभोक्तारंचात्मत्वेनाभिजानातिकर्मभिर्नसबध्यतेअकर्त्रात्मज्ञानेनमुच्यतइत्यर्थः १५

अपराव्याख्या। कर्मणिज्ञानकर्मणिदृश्येजडेसद्रूपेणस्फुरणरूपेणवानुस्यूतंसर्वभ्रमाधिष्ठानंकर्मअवेद्यंस्वप्रकाश
चैतन्यंपरमार्थदृष्ट्यायःपश्येत्तथाअकर्मणिचस्वप्रकाशेदृग्वस्तुनिकल्पितंकर्मदृश्यंमायामयंनपरमार्थसत्दृग्दृ
श्ययोःसंबंधानुपपत्तेः।यस्तुसर्वाणिभूतान्यात्मन्येवानुपश्यति।सर्वभूतेषुचात्मानंततोनविजुगुप्सतइतिश्रुतेः।एवं
परस्पराध्यासेपिशुद्धंवस्तुयःपश्यतिमनुष्येषुमध्येसएवबुद्धिमान्नान्यःअस्यपरमार्थदर्शित्वान्नान्यस्यचापरमार्थ
दर्शित्वात्सचबुद्धिसाधनयोगयुक्तःअंतःकरणशुद्ध्याएकाग्रचित्तःअतःसएवांतःकरणशुद्धिसाधनकृत्स्नकर्मकृ
दितिवास्तवधर्मैरेवस्तूयते।यस्मादेवंतस्मात्त्वमपिपरमार्थदर्शीभव।तावतैवकृत्स्नकर्मकारित्वोपपत्तेरित्यभिप्रा
यः।अतोयदुक्तंयज्ज्ञात्वामोक्ष्यसेऽशुभादिति।यच्चोक्तंकर्मादीनांतत्त्वंबोद्धव्यमस्तीति।सबुद्धिमानित्यादिस्तुतिश्च।
तत्सर्वंपरमार्थदर्शनेसंगच्छते।अन्यथाज्ञानादशुभात्संसारान्मोक्षानुपपत्तेः।अतत्त्ववाक्यत्वंचान्यत्रबोद्धव्यं।नचात्मज्ञानेबु
द्धिमत्त्वमितियुक्तैवपरमार्थदर्शिनांव्याख्या।यत्तुव्याख्यानंकर्मणिनित्येपरमेश्वरार्थेनुष्ठीयमानेबंधहेतुत्वाभावाद
कर्मेदमितियःपश्येत्।तथाअकर्मणिचनित्यकर्माकरणेप्रत्यवायहेतुत्वेनकर्मेदमितियःपश्येत्सबुद्धिमानित्यादि
तदसंगतमेव।नित्यकर्मण्यकर्मेदमितिज्ञानस्याशुभमोक्षहेतुत्वाभावात्।मिथ्याज्ञानत्वेनतस्यैवाशुभत्वाच्च।नचैतादृशं
मिथ्याज्ञानंबोद्धव्यंतत्त्वंनाप्येतादृशज्ञानेबुद्धिमत्त्वादिस्तुत्युपपत्तिर्भ्रांतित्वात्।नित्यकर्मानुष्ठानंहिस्वरूपतोऽंतःकर
णशुद्धिद्वारोपयुज्यते।नतत्राकर्मबुद्धिःकुत्राप्युपयुज्यतेशास्त्रेणनामादिषुब्रह्मदृष्टिवदविहितत्वात्।नापीदमेव

गी०टी०४ दार्ढ्यं ...धायकमुपक्रमादिविरोधस्योक्तेः। एवं नित्यकर्माकरणमपि स्वरूपतो नित्यकर्मविरुद्धकर्मलक्षकत्वेनोपयुज्य
८९ ते। न तु तत्त्वकर्मदृष्टिः क्वाप्युपयुज्यते। नापि नित्यकर्माकरणात् प्रत्यवायः। अभावाद्भावोत्पत्त्ययोगात्। अन्यथा तदव
शेषेण सर्वदा कार्योत्पत्तिप्रसंगात्। भावार्थाः कर्मशब्दास्तेभ्यः क्रिया प्रतीयेतैष ह्यर्थो विधीयत इति न्यायेन भावार्थ
स्यैवापूर्वजनकत्वात्। अतिरात्रे षोडशिनं न गृह्णातीत्यादावपि संकल्पविशेषस्यैवापूर्वजनकत्वाभ्युपगमात्। नेक्षे
तोद्यंतमादित्यमित्यादि प्रजापतिव्रतवत्। अतो नित्यकर्मानुष्ठानार्हे काले तद्विरुद्धतया यदुपवेशनादिकर्म तदेव
नित्यकर्माकरणोपलक्षितं प्रत्यवायहेतुरिति वैदिकानां सिद्धांतः। अत एव अकुर्वन्विहितं कर्मेत्यत्र लक्षणार्थे शता
व्याख्यातः। लक्षणहेत्वोः क्रियाया इत्यविशेषस्मरणेऽप्यत्र हेतुत्वानुपपत्तेः। तस्मान्मिथ्यादर्शनापनोदप्रसक्ते मिथ्या
दर्शनव्याख्यानं। शोभनतरं नापि नित्यानुष्ठानपरमेवैतद्वाक्यं। नित्यानि कुर्यादित्यर्थे कर्मण्यकर्म यः पश्येदित्यादि
...कं वाक्यं प्रयुंजानस्य भगवतः प्रतारकत्वापत्तेरित्यादि भाष्य एव विस्तरेण व्याख्यातमित्युपरम्यते ॥१८॥
...परमार्थदर्शिनः कर्तृत्वाभिमानाभावेन कर्मालिप्तत्वं प्रपंचयन् अकर्मकर्मसमाधिने स्तौति तेन यस्य पूर्वोक्तपरमार्थ
दर्शिनः सर्वे यावंतो वैदिका लौकिका वा समारंभाः समारभ्यंत इति व्युत्पत्त्या कर्माणि कामसंकल्पवर्जिताः कामः ८९
फलतृष्णा संकल्पोऽहं करोमीति कर्तृत्वाभिमानस्ताभ्यां वर्जिताः लोकसंग्रहार्थं वा जीवनमात्रार्थं वा प्रारब्धकर्मवे

गी०टी०४ ...कीदृशं तर्हि कर्मादीनां तत्त्वमिति तदाह कर्मणि देहेंद्रियादिव्यापारे विहिते प्रतिषिद्धे वा अहं करोमीति धर्माध्यासेनात्मन्यारोपि
ते नौस्थेनाचलेषु तटस्थवृक्षादिषु समारोपिते चलनइव अकर्त्रात्मस्वरूपालोचनेन वस्तुतः कर्माभावं तटस्थवृक्षादिष्वि
व यः पश्येत् पश्यति तथा देहेंद्रियादिषु त्रिगुणमायापरिणामत्वेन सर्वदा सव्यापारेषु निर्व्यापारस्तूष्णीं सुखमास इत्यभि
मानेन समारोपिते कर्माभावे व्यापारोपरमे दूरस्थचक्षुःसन्निकृष्टपुरुषेषु गच्छत्स्वप्यगमनइव सर्वदा सव्यापारदेहेंद्रियादि
स्वरूपपर्यालोचनेन वस्तुगत्या कर्म निरंतरव्यापाररूपं व्यापारं यः पश्येत् दूरस्थपुरुषेषु गमनमिव। औदासीन्यावस्था
यामप्युदासीनोऽहमास इति अभिमान एव कर्म। एतादृशः परमार्थदर्शी स बुद्धिमानित्यादिना बुद्धिमत्त्वयोगयुक्तत्वसर्वा

कर्मण्यकर्म यः पश्येदकर्मणि च कर्म यः। स बुद्धिमान्मनुष्येषु स युक्तः कृत्स्नकर्मकृत् ॥१८॥

र्थकृत्त्वैः त्रिभिर्धर्मैः स्तूयते। अत्र प्रथमपादेन कर्मविकर्मणोः तत्त्वं कर्मशब्दस्य विहितप्रतिषिद्धपरत्वात् द्वितीयपादेन वा
कर्मणस्तत्त्वं दर्शितमिति द्रष्टव्यं तत्र यत्तु मन्यसे कर्मणो बंधहेतुत्वात् तूष्णीमेव मया सुखेन स्थातव्यमिति तन्मृषा अस्ति कर्तृत्वा
भिमाने विहितस्य प्रतिषिद्धस्य वा कर्मणो बंधहेतुत्वाभावात्। तथा च व्याख्यातं। न मां कर्माणि लिंपंतीत्यादिना सति च कर्तृ ८८
त्वाभिमाने तूष्णीमहमास इत्यौदासीन्याभिमानात्मकमपि कर्म तदपि बंधहेतुरेव वस्तुतत्त्वापरिज्ञानात्। तस्मात् कर्मविक
र्माकर्मणां तत्त्वमीदृशं ज्ञात्वा विकर्माकर्मणी परित्यज्य कर्तृत्वाभिमानफलाभिसंधिहानेन विहितं कर्मैव कुर्वित्यभिप्रायः

श्री।

यतो नाहं कर्त्ता न मे कर्मफलस्पृहेति ज्ञानात्कर्मभिर्न बध्यते अतः एवं आत्मनोऽकर्तृः कर्मालेपं ज्ञात्वा कृतं कर्म पूर्वैरिति क्रांतैरपि विश्र
स्मिन्युगे ययातियदुप्रभृतिभिर्मुमुक्षुभिरस्त्वात्मावमपि कर्मैव कुरु त्वं तूष्णीमासनं नापि संन्यासं यद्यतत्त्वविद्वात्मशुद्ध्यर्थं तत्त्व
विद्वांल्लोकसंग्रहार्थं पूर्वैर्जनकादिभिः पूर्वतरं अतिपूर्वयुगांतरेपि कृतं एतेनास्मिन्युगेन्ययुगे च पूर्वपूर्वतरैः कृतत्वादवश्यं
वया कर्तव्यं कर्मेति दर्शयति १६ ननु कर्मविषये किं कश्चित्संशयोप्यस्ति येन पूर्वैः पूर्वतरं कृतमित्यतिनिर्बंधमास्थ इत्येवे
त्याह नौस्थस्य निष्क्रिये षु पि तटस्थवृक्षेषु गमनभ्रमदर्शनात् तथा दूरे चक्षुः संनिकृष्टेषु गच्छत्स्वपि पुरुषेष्वगमनभ्र

एवं ज्ञात्वा कृतं कर्म पूर्वैरपि मुमुक्षुभिः कुरु कर्मैव तस्मात्त्वं पूर्वैः पूर्वतरं कृतम् १६
किं कर्म किमकर्मेति कवयोप्यत्र मोहिताः तत्ते कर्म प्रवक्ष्यामि यज्ज्ञात्वा मोक्ष्यसेऽशुभात् १७॥४

मद्दर्शनात्परमार्थतः किं कर्म किं वा परमार्थतोऽकर्मेति कवयो मेधाविनोपि अत्र अस्मिन्विषये मोहिता मोहं निर्णयासा
मर्थ्यं प्राप्ता अत्यंतदुर्निरूपत्वादित्यर्थः। तत्तस्मात्ते तुभ्यमहं कर्म अकारप्रश्लेषेण छेदादकर्म च। प्रवक्ष्यामि प्रकर्षेण संदे
होच्छेदेन वक्ष्यामि यत्कर्माकर्मस्वरूपं ज्ञात्वा मोक्ष्यसे मुक्तो भविष्यस्यशुभात्संसारात् १७ ननु सर्वलोकप्रसिद्धत्वाद
हमेवैतज्जानामि देहेंद्रियादिव्यापारः कर्म तूष्णीमासनमकर्मेति तत्र किं वक्तव्यमिति तत्राह हि यस्मात्कर्मणः शा
स्त्रविहितस्यापि तत्त्वं बोद्धव्यमस्ति विकर्मणश्च प्रतिषिद्धस्य अकर्मणश्च तूष्णीभावस्य अत्र वाक्यत्रये पि तत्त्वमस्तीत्य
ध्याहारः यस्मात् गहना दुर्ज्ञाना कर्मण इत्युपलक्षणं। कर्माकर्मविकर्मणां गतिस्तत्त्वमित्यर्थः। १८

२४ कर्मणो ह्यपि बोद्धव्यं बोद्धव्यं च विकर्मणः। अकर्मणश्च बोद्धव्यं गहना कर्मणो गतिः १८

ज्ञानं

गा हुत्या चेष्टारूपा भवति तं। कर्मादावकर्मादिदर्शनं तं देवाग्निस्तेन दग्धानि शुभाशुभलक्षणानि कर्माणि यस्य तदधिगम
उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशादिति न्यायात् ज्ञानाग्निदग्धकर्माणं तं बुधा ब्रह्मविदः परमार्थतः पंडितं आहुः
। सम्यग्दर्शी हि पंडित उच्यते न तु भ्रांत इत्यर्थः १० भवतु ज्ञानाग्निना प्राक्तनानामप्रारब्धकर्मणां दाहः आगामिनां चानु
त्पत्तिः ज्ञानोत्पत्तिकाले क्रियमाणं तु पूर्वोत्तरयोरनंतर्भावात्फलाय भवेदिति भवेत्कस्यचिदाशंका तामपनुदति कर्म
णि फले वा संगं कर्तृत्वाभिमानं भोगाभिलाषं च त्यक्त्वा अकर्त्रभोक्त्रात्मसम्यग्दर्शनेन बाधित्वा नित्यतृप्तः परमानंद ते

यस्य सर्वे समारंभाः कामसंकल्पवर्जिताः ज्ञानाग्निदग्धकर्माणं तमाहुः पंडितं बुधाः १०
त्यक्त्वा कर्मफलासंगं नित्यतृप्तो निराश्रयः कर्मण्यभिप्रवृत्तोपि नैव किंचित्करोति सः २२

स्वरूपलाभेन सर्वत्र निराकांक्षः निराश्रयः आश्रयो देहेंद्रियादिरद्वैतदर्शनेन निर्गतो यस्मात्स निराश्रयो देहेंद्रि
याद्यभिमानशून्यः फलकामनायाः कर्तृत्वाभिमानस्य निवृत्तौ हेतुगर्भं क्रमेण विशेषणद्वयं एवंभूतो जीवन्मुक्तो व्युत्था
नदशायां कर्मणि वैदिके लौकिके वा अभिप्रवृत्तोपि प्रारब्धकर्मवशाल्लोकदृष्ट्या अभितः सांगोपांगानुष्ठाना
य प्रवृत्तोपि स्वदृष्ट्या नैव किंचित्करोति सः निष्क्रियात्मदर्शनेन बाधितत्वादित्यर्थः २२ यदा त्वंतविक्षेपहेतोरवि
द्योपशमादेः सम्यग्ज्ञानवशात्फलाजनकत्वं तदा शरीरस्थितिमात्रहेतोरविक्षेपकस्याभिक्षाटनादेर्ना स्त्ये

गी॰टी॰४
८०

बंधहेतुत्वमिति कैमुत्यन्यायेनाह निराशीरिति त्यक्तः यतचित्तात्मा चित्तमंतःकरणं आत्मा बाह्येंद्रियसहितो देहस्तौ
संयतौ प्रत्याहारेण निगृहीतौ येन सः यतो जितेंद्रियोऽतो विगततृष्णत्वात्त्यक्तसर्वपरिग्रहः। त्यक्ताः सर्वे परिग्रहा
भोगोपकरणानि येन सः एतादृशोपि प्रारब्धकर्मवशात् शारीरं शरीरस्थितिमात्रप्रयोजनं कौपीनाच्छादनादि
ग्रहणभिक्षाटनादिरूपं यतिं प्रति शास्त्राभ्यनुज्ञातं कर्म कायिकं वाचिकं मानसं च तदपि केवलं कर्तृत्वाभिमानशून्यं
परैरध्यारोपितकर्तृत्वेन कुर्वन्नपरमार्थतोऽकर्त्रात्मदर्शनान्नाप्नोति न प्राप्नोति किल्बिषं धर्माधर्मफलभूतमनिष्टं

निराशीर्यतचित्तात्मा त्यक्तसर्वपरिग्रहः शारी
रं केवलं कर्म कुर्वन्नाप्नोति किल्बिषम् २१

संसारं पापवत्पुण्यस्याप्यनिष्टफलत्वेन किल्बिषत्वात्। ये तु शरीरनिर्वर्त्यं शारीरमिति व्याचक्षते। तन्मते केवलं क
र्म कुर्वन्नित्यतोऽधिकार्थालाभाद्व्यावर्तकत्वेन शारीरपदस्य वैयर्थ्यं। अथ वाचिकमानसिकव्यावर्तनार्थमिति ६०
हि ब्रूयात्तदा शारीरं कर्मपदस्य विहितमात्रपरत्वे शारीरं विहितं कर्म कुर्वन्नाप्नोति किल्बिषमित्यप्रसक्तप्रतिषेधोऽनर्थ
कः। वाचिकं मानसं च विहितं कर्म कुर्वन्प्राप्नोति किल्बिषमिति च शास्त्रविरुद्धमुक्तं स्यात्। विहितप्रतिषि
द्धसाधारणपरत्वे चैवमेव व्याघात इति भाष्य एव विस्तरः २१ श्रीकृष्णः

त्यक्तसर्वपरिग्रहस्य यतेः शरीरस्थितिमात्रप्रयोजनं कर्माभ्यनुज्ञातं तत्र ग्रासाच्छादनादिव्यतिरेकेण शरीरस्थितेर
संभवाद्ग्रासादिनापि स्वप्रयत्नेनान्नादिकं संपाद्यमिति प्राप्ते नियमायाह शास्त्रानुमतप्रयत्नव्यतिरेकेण यदृ
च्छयैव यो लाभोऽन्नाच्छादनादेः शास्त्रानुमतस्य यदृच्छालाभस्तेन संतुष्टस्तदधिकतृष्णारहितः तथा च शास्त्रं
भैक्षं चरेदिति प्रकृत्य अयाचितमसंक्लृप्तमुपपन्नं यदृच्छयेति याञ्चासंकल्पादिप्रयत्नं वारयति। मनुरपि न चो
त्पातनिमित्ताभ्यां न नक्षत्रांगविद्यया। नानुशासनवादाभ्यां भिक्षां लिप्सेत कर्हिचिदिति। यतयो भिक्षार्थं ग्रामं प्र

यदृच्छालाभसंतुष्टो द्वंद्वातीतो विमत्सरः समः सि
द्धावसिद्धौ च कृत्वापि न निबध्यते २२

विश्रांतीत्यादिशास्त्रानुमतस्तु प्रयत्नः कर्तव्य एव। एवं लब्धमपि शास्त्रनियतमेव। कौपीनयुगलं वासः कंथां
शीतनिवारिणीं। पादुके चापि गृह्णीयात्कुर्यान्नान्यस्य संग्रहमित्यादि। एवमन्यदपि विधिनिषेधरूपं शास्त्रमू
ह्यं न तु स्वप्रयत्नमंतरेण लाभे शीतोष्णादिपीडितः कथं जीवेदत आह द्वंद्वातीतः। द्वंद्वानि क्षुत्पिपासाशीतोष्णव
र्षादीनि अतीतोऽतिक्रांतः समाधिदशायां तेषामस्फुरणात् व्युत्थानदशायां स्फुरणेपि परमानंदाद्वितीयाक

र्शीतोष्णकालमस्थेन बाधात् । तैर्द्वंद्वैरुपहन्यमानोप्यक्षुभितचित्तः । अत एव परस्य लाभे स्वस्यालाभे च विमत्सरः परो
त्कर्षासहनपूर्विका स्वोत्कर्षवांछा मत्सरस्तद्रहितः अद्वितीयात्मदर्शनेन निर्वैरबुद्धिः अत एव समस्तुल्यो यदृच्छाला
भस्य सिद्धावसिद्धौ च सिद्धौ न हृष्टः नाप्यसिद्धौ विषण्णः स स्वानुभवेनाकर्त्तैव परैरारोपितकर्तृत्वः शरीरस्थितिमा
त्रप्रयोजनं भिक्षाटनादि कर्म कृत्वापि न निबध्यते बंधहेतोः सहेतुकस्य कर्मणो ज्ञानाग्निना दग्धत्वादिति पूर्वो
क्तानुवादः २२ त्यक्तसर्वपरिग्रहस्य यदृच्छालाभसंतुष्टस्य यतेर्यच्छरीरस्थितिमात्रप्रयोजनं भिक्षाटनादिक

गतसंगस्य मुक्तस्य ज्ञानावस्थितचेतसः यज्ञायाचरतः कर्म समग्रं प्रविलीयते २४

र्म कुर्वान्न निबध्यत इत्युक्ते गृहस्थस्यापि ब्रह्मविदो जनकादेर्यज्ञादिरूपं यत्कर्म तद्बंधहेतुः स्यादिति भवेत्
स्याशंकायां त्यक्त्वा कर्मफलासंगमित्यादिनोक्तं विवृणोति गतसंगस्य फलासंगशून्यस्य मुक्तस्य क
र्तृत्वभोक्तृत्वाद्यध्यासशून्यस्य ज्ञानावस्थितचेतसः निर्विकल्पकब्रह्मात्मैक्यबोध एवास्थितं चित्तं यस्य त
स्य स्थितप्रज्ञस्येत्यर्थः । उत्तरोत्तरविशेषणस्य पूर्वपूर्वहेतुत्वेनान्वयो द्रष्टव्यः । गतसंगत्वं कुतः यतोऽध्यासहीनत्वं ९३
तत्कुतो यतः स्थितप्रज्ञत्वमिति ईदृशस्यापि प्रारब्धकर्मवशात् यज्ञाय यज्ञसंरक्षणार्थं ज्योतिष्टोमादि

यज्ञेश्वराचारत्वेन लोकसंग्रहार्थं यज्ञाय विष्णवे तत्प्रीत्यर्थमिति वा आचरतः कर्म यज्ञदानादिकं समग्रं सहाग्रेण फले
न विद्यत इति समग्रं प्रविलीयते प्रकर्षेण कारणोच्छेदेन तत्त्वदर्शनाद्विलीयते विनश्यतीत्यर्थः २४ ननु क्रियमाणं
कर्म फलमजनयित्वैव कुतो नश्यति ब्रह्मबोधेन कारणोच्छेदादित्याह अनेककारकसाध्या हि यज्ञादिक्रिया भवति
देवतोद्देशेन द्रव्यत्यागो यागः स एव त्यज्यमानद्रव्यस्याग्नौ प्रक्षेपाद्धोम इत्युच्यते तत्रोद्देश्या देवता संप्रदानं त्यज्यमा
नं द्रव्यं हविःशब्दवाच्यं साक्षाद्धात्वर्थकर्म तत्फलं तु स्वर्गादि व्यवहितं भावनाकर्म एवं धारकत्वेन हविषोऽग्नौ प्रक्षेपे

ब्रह्मार्पणं ब्रह्म हविर्ब्रह्माग्नौ ब्रह्मणा हुतं ब्रह्मैव तेन गंतव्यं ब्रह्मकर्मसमाधिना २५

साधकतमतया स्रुगादिकरणं प्रकाशकतया मंत्रादीति करणमपि कारकज्ञापकभेदेन द्विविधं एवं त्यागोऽग्नौ प्र
क्षेपश्च द्वे क्रिये तत्राद्यायां यजमानः कर्ता प्रक्षेपे तु यजमानपरिक्रीतोऽध्वर्युः प्रक्षेपाधिकरणं चाग्निः । एवं देशकालादि
दिकमप्यधिकरणं सर्वक्रियासाधारणं द्रष्टव्यं । तदेवं सर्वेषां क्रियाकारकव्यवहाराणां ब्रह्माज्ञानकल्पितानां रज्ज्व
ज्ञानकल्पितानां सर्पधारादंडादीनां रज्जुतत्त्वज्ञानेनेव बाधे बाधितानुवृत्त्या क्रियाकारकादिव्यवहाराभासो दृश्य
मानोऽपि दग्धपटन्यायेन फलायाकल्पत इत्यनेन श्लोकेन प्रतिपाद्यते ब्रह्मदृष्टिरेव च सर्वयज्ञात्मिकेति सूच्यते ।

नै

गी॰टी॰
५२

तथाहि। अर्प्यतेऽनेनेति करणव्युत्पत्त्याऽर्पणं जुह्वादि मंत्रादि च। एवमर्प्यतेऽस्मा इति व्युत्पत्त्याऽर्पणं देवतारूपं संप्रदा
नं एवमर्प्यतेऽस्मिन्निति व्युत्पत्त्याऽर्पणमधिकरणं देशकालादि। तत्सर्वं ब्रह्मणि कल्पितत्वाद्ब्रह्मैव रज्जुकल्पितभुजंगव
दधिष्ठानव्यतिरेकेणासदित्यर्थः। एवं हविः त्यागपदरूपक्रिययोः साक्षात्कर्मकारकं तदपि ब्रह्मैव। एवं यत्र प्रक्षिप्यते सोऽ
ग्निरपि ब्रह्मैव। ब्रह्माग्नाविति समस्तं पदं तथा येन कर्त्रा यजमानेनाध्वर्युणा च स्वयं प्रक्षिप्यते च तदुभयमपि कर्तृ
कारकं कर्तरि विहितया तृतीययानूद्य ब्रह्मेति विधीयते ब्रह्मणेति। एवं हुतमपि हवनं त्यागक्रियापदरूपक्रिया च।
तदपि ब्रह्मैव। तथा तेन हवनेन यद्गंतव्यं स्वर्गादि व्यवहितं कर्म तदपि ब्रह्मैव। अत्रत्य एवकारः सर्वत्र संबध्यते। हुत
मित्यत्रापि हुतं ब्रह्मैवेत्यनुषज्यते व्यवधानाभावात्साकांक्षत्वाच्च। विलपति स्वा पुनः विसादावच्छेदेनेत्यादि पर
वाक्यशेषवत्। अनेन रूपेण कर्मणि समाधिर्ब्रह्मज्ञानं यस्य स कर्मसमाधिस्तेन ब्रह्मविदा कर्मानुष्ठात्रापि ब्रह्मरूप
मानंदाद्वयं गंतव्यमित्यनुषज्यते साकांक्षत्वादव्यवधानाच्च यातेर्गत्यर्थत्वात् तर्वशि हेत्यादि पूर्ववाक्य
वत्। अथवा अर्प्यते फलायेति व्युत्पत्त्याऽर्पणपदेनैव स्वर्गादिफलमपि ग्राह्यं। तथा च ब्रह्मैव तेन गंतव्यं ब्रह्म कर्म
समाधिनेत्युत्तरार्द्धं शास्त्रफलकथनाय वेति समंजसं। अस्मिन्पक्षे ब्रह्मकर्मसमाधिनेत्येकं वापदं पूर्वं ब्रह्मपदं हुत ५२
मित्यनेन संबध्यते। चरमं गंतव्यपदेनेति भिन्नं वापदं। एवं च नानुषंग इत्यसौ शद इति द्रष्टव्यं। ब्रह्म गंतव्यमित्य भेदेने

व तत्प्राप्तिरूपत्वात् तत एव न स्वर्गादितुच्छफलं तेन गंतव्यं विद्यया अविद्यककारकव्यवहारोच्छेदात्। तदुक्तं वार्तिककृ
द्भिः। कारकव्यवहारे हि शुद्धं वस्तु न वीक्षते। शुद्धे वस्तुनि सिद्धे च कारकव्याप्तिः कुत इति। अर्पणादिकारकस्वरू
पानुपमर्देनैव तत्र नामादाविव ब्रह्मदृष्टिः क्षिप्यते संपन्मात्रेण फलविशेषायेति केषांचिद्व्याख्यानं भाष्यकृद्भिरे
व निराकृतं उपक्रमादिविरोधाद्ब्रह्मविद्याप्रकरणे संपन्मात्रस्याप्रसक्तत्वादित्यादियुक्तिभिः २५ अधुना सम्य
ग्दर्शनस्य यज्ञरूपकत्वेन स्तावकतया ब्रह्मार्पणमंत्रे स्थिते पुनरपि तस्य स्तुत्यर्थमितरान्यज्ञानुपन्यस्यति दैवमि

दैवमेवापरे यज्ञं योगिनः पर्युपासते ब्रह्माग्नावपरे यज्ञं यज्ञेनैवोपजुह्वति २६

इज्यते अनेनेति यज्ञः स दैवयज्ञस्तमेव यज्ञं दर्शपूर्णमासज्योतिष्टोमादिरूपमपरे योगिनः कर्मिणः पर्युपासते सर्वदाऽनु
तिष्ठंति न ज्ञानयज्ञं। एवं कर्मयज्ञमुक्त्वांतःकरणशुद्धिद्वारेण तत्फलभूतं ज्ञानयज्ञमाह। ब्रह्माग्नौ सत्यज्ञानानंतानं
दरूपं निरस्तसमस्तविशेषं ब्रह्म तत्पदार्थस्तस्मिन्नग्नौ यज्ञं प्रत्यगात्मानं त्वंपदार्थं यज्ञेनैव यज्ञशब्द आत्मनाम
सु यास्केन पठितः इत्थंभूतलक्षणे तृतीया एवकारो भेदाभेदव्यावृत्त्यर्थः त्वंपदार्थाभेदेनैवोपजुह्वति तत्त्वरू
पतया पश्यंतीत्यर्थः अपरे पूर्वविलक्षणास्तत्त्वदर्शननिष्ठाः संन्यासिन इत्यर्थः जीवब्रह्माभेददर्शनं यज्ञत्वेन
संपाद्य ज्ञानसाधनयज्ञमध्ये पठ्यते श्रेयान्द्रव्यमयाद्यज्ञाज्ज्ञानयज्ञ इत्यादिना स्तोतुम् २६ श्रीकृष्णः

गी टी ४
९२ तदनेन [illegible] दर्शितो । [illegible] श्रेयः [illegible] मुख्यत्वं यत्नत्वेन समाधेस्तत्र श्रोत्रादीनिन्द्रि
याणि [illegible] शब्दादिविषयेभ्यः प्रत्याहृत्य [illegible] धारणाध्यानसमाधिरिति त्रयमे
कविषयं संयमशब्देनोच्यते । तथा चाह भगवान्पतंजलिः त्रयमेकत्र संयम इति । [illegible]
रकालस्थापनं धारणा एवमेकत्र धृतस्य चित्तस्य [illegible] प्रवाहोंतराले [illegible] प्रत्ययप्रवाहो ध्या
नं सर्वथा विजातीयप्रत्ययानंतरितः सजातीयप्रत्ययप्रवाहः समाधिः स तु चित्तभूमिभेदेन द्विविधः संप्रज्ञातोऽ

श्रोत्रादीनींद्रियाण्यन्ये संयमाग्निषु जुह्वति शब्दादीन्वि[illegible] अन्ये इंद्रियाग्निषु जुह्वति २६

संप्रज्ञातश्च चित्तस्य हि पंच भूमयो भवंति क्षिप्तं मूढं विक्षिप्तमेकाग्रं निरुद्धमिति । तत्र रागद्वेषादिवशाद्विषयेषु [illegible]वि
ष्टं क्षिप्तं तंद्रादिग्रस्तं मूढं । सर्वदा विषयासक्तमपि कदाचिद्ध्याने [illegible] क्षिप्ताद्विशिष्टतया विक्षिप्तं तत्र क्षिप्तमूढ
योः समाधिशंकैव नास्ति विक्षिप्ते तु चेतसि कादाचित्कः समाधिर्विक्षेपप्राधान्याद्योगपक्षे न वर्तते किंतु तीव्रपव
नविक्षिप्तप्रदीपवत्स्वयमेव नश्यति । एकाग्रं तु एकविषयकधारावाहिकवृत्तिसमर्थं स चोद्रेकेण तमोगुणकृ ९२
त तंद्रादिरू[illegible]याभावादात्माकारवृत्तिः सा च रजोगुणकृतचांचल्यरूपविक्षेपाभावादेकविषयेति शुद्धसत्वे

भवति [illegible] भूमौ संप्रज्ञातः समाधिः तत्र ध्येयाकारवृत्तिर्हि दृश्यते तस्या अपि निरोधे निरुद्धं चित्तम
संप्रज्ञात[illegible] तदुक्तं तस्यापि निरोधे सर्ववृत्तिनिरोधान्निर्बीजः समाधिरिति । अयमेव सर्वतो विरक्त
स्य समाधिफलं [illegible] मनपेक्षमाणस्य योगिनो दृढभूमिः सन्धर्ममेघ इत्युच्यते । तदुक्तं प्रसंख्यानेप्यकुसी
दस्य सर्वथा विवेकख्यातेर्धर्ममेघः समाधिः ततः क्लेशकर्मनिवृत्तिरिति । अनेन रूपेण संयमानां भेदादग्निषु ६
ति बहुवचनं तेषु इंद्रियाणि जुह्वति । धारणाध्यानसमाधिसिद्ध्यर्थं सर्वाणींद्रियाणि स्वस्वविषयेभ्यः प्रत्याहरंती
त्यर्थः तदुक्तं स्वस्वविषयासंप्रयोगे चित्तस्वरूपानुकार इवेंद्रियाणां प्रत्याहार इति । विषयेभ्यो निगृहीतानींद्रिया
णि चित्तरूपाण्येव भवंति । ततश्च विक्षेपाभावाच्चित्तं धारणादिकं निर्वहतीत्यर्थः । तदनेन प्रत्याहारधारणाध्या
नसमाधिरूपं योगांगचतुष्टयमुक्तं । तदेवं समाध्यवस्थायां सर्वेंद्रियवृत्तिनिरोधो यज्ञत्वेनोक्तः । इदानीं व्युत्थाना
वस्थायां रागद्वेषराहित्येन विषयभोगोपि यज्ञ इत्याह । शब्दादीन्विषयानन्य इंद्रियाग्निषु जुह्वति । अ
न्ये व्युत्थितावस्थायां श्रोत्रादिभिरविरुद्धविषयग्रहणं [illegible] अनन्यसाधारणं कुर्वंति स एव तेषां हो
मः २६ इदं पातंजलमतानुसारेण लयपूर्वकसमाधितो व्युत्थानं च यज्ञद्वयमुक्त्वा ब्रह्मवादिमतानुसारे
[illegible] समाधिं [illegible]णोद्देशेन व्युत्थानशून्यं सर्वफलभूतं यज्ञांतरमाह द्विविधो हि समाधिर्भवति ल

गी॰टी॰४ मपूर्वकोबाधपूर्वकश्च तत्र तदनन्यत्वमारंभणशब्दादिभ्य इति न्यायेन कारणव्यतिरेकेण कार्यस्यासत्त्वात् पंचीकृतपं
९८ चभूतकार्यं व्यष्टिरूपं समष्टिरूपविराट् कार्यत्वात् तद्व्यतिरेकेण नास्ति। तथा समष्टिरूपमपि पंचीकृतपंचभूतात्म
कं कार्यमपंचीकृतपंचमहाभूतकार्यत्वात् तद्व्यतिरेकेण नास्ति तत्रापि पृथिवी शब्दस्पर्शरूपरसगंधाख्यपंचगु
णात्मकं चेतरचतुर्गुणाप्कार्यत्वात्तद्व्यतिरेकेण नास्ति ताश्चतुर्गुणा आपो गंधरसेतरत्रिगुणात्मकतेजःकार्यत्वा
त्तद्व्यतिरेकेण न संति तदपि त्रिगुणात्मकं तेजो गंधरसरूपेतरद्विगुणात्मकवायुकार्यत्वात्तद्व्यतिरेकेण नास्ति सोऽपि द्वि

सर्वाणींद्रियकर्माणि प्राणकर्माणि चापरे आत्मसंयमयोगाग्नौ जुह्वति ज्ञानदीपिते २७

गुणात्मको वायुः शब्दमात्रगुणाकाशकार्यत्वात्तद्व्यतिरेकेण नास्ति स च यावद्गुण आकाशो बहु स्यामिति परमेश्व
रसंकल्पात्मकाहंकारकार्यत्वात्तद्व्यतिरेकेण नास्ति सोऽपि संकल्पात्मकोऽहंकारो मायेक्षणरूपमहत्तत्त्वकार्यत्वा
त्तद्व्यतिरेकेण नास्ति। तदपीक्षणरूपं महत्तत्त्वं मायापरिणामत्वात्तद्व्यतिरेकेण नास्ति। तदपि मायाख्यं कारणं ९८
जडत्वेन चैतन्येऽध्यस्तत्वात्तद्व्यतिरेकेण नास्तीत्यनुसंधानेन विद्यमानोऽपि कारणात्मकप्रपंचे चैतन्यमात्र
त्वेन शेषः सम्यक् स लयपूर्वकोऽभिधीयते। तत्त्वमस्यादिवेदांतमहावाक्यार्थज्ञानाभावेनाविद्यानकार्यस्या

कार्य

दीरणत्वात् एवं चिंतने निर्विकारणासत्त्वेन [illegible] कल्पः [illegible] नादयं बुद्धिवृत्तिविषयीभावः समाधिर्मुख्यः मुख्यस्तु तत्त्वमसृ
दिमहावाक्यार्थज्ञानात् कारणविपर्यये नैसर्गिकसर्गकारणत कार्यविवर्तेऽरनादि [illegible] पुनरुत्थानाभावेन तथा
पि पुनरुत्थानाभावान्निर्बीजो बाधपूर्वकः समाधिः स एवानेन श्लोकेन प्रदर्श्यते। तथाहि पूर्वोक्तानि निखिलानि सूक्ष्म
णि संस्काररूपाणि च। इंद्रियकर्माणि इंद्रियाणां श्रोत्रत्वक्चक्षुरसनघ्राणाख्यानां वाक्पाणिपादपायूपस्था पंचानां
ख्यानां च पंचानां बाह्यानां आंतरयोश्च मनोबुद्ध्योः कर्माणि शब्दश्रवणस्पर्शग्रहणरूपदर्शनरसग्रहणगंधग्रहण
वचनादानविहरणोत्सर्गानंदाख्यानि च संकल्पाध्यवसायौ च। एवं प्राणकर्माणि च। प्राणानां प्राणापानव्यानोदा
नसमानाख्यानां पंचानां कर्माणि बहिर्नयनं अधोनयनमाकुंचनप्रसारणादि अशितपीतसमनयनं ऊर्ध्वनयन
मित्यादीनि अनेन पंचज्ञानेंद्रियाणि पंचकर्मेंद्रियाणि पंचप्राणा मनो बुद्धिश्चेति सप्तदशात्मकं लिंगमुक्तं तत्सूक्ष्म
भूतसमष्टिरूपं हिरण्यगर्भाख्यमिह विवक्षितमिति बोद्धव्यं सर्वाणीति विशेषणं आत्मसंयमयोगाग्नौ आत्मविष
यकः संयमो धारणाध्यानसंप्रज्ञातसमाधिरूपस्तत्परिपाके सति योगो निरोधसमाधिः पतंजलिः सूत्रयामास
व्युत्थाननिरोधसंस्कारयोरभिभवप्रादुर्भावौ निरोधक्षणचित्तान्वयो निरोधपरिणाम इति व्युत्थानं क्षिप्तमूढविक्षि
प्ताख्यं भूमित्रयं तत्संस्काराः समाधिविरोधिनस्ते योगिप्रयत्नेन प्रतिदिनं प्रतिक्षणं चाभिभूयन्ते तद्विरोधिनश्च निरो

गी॰टी॰४
९५

धसंस्काराः प्रादुर्भवंति तत्र निरोधमात्ररूपेण चित्तस्यान्वयो निरोधपरिणाम इति। तस्य फलमाह। ततः प्रशांतवाहिता संस्कारादिति। तमोरजसोः क्षयाल्लयविक्षेपशून्यत्वेन शुद्धसत्वरूपं चित्तं प्रशांतमित्युच्यते। पूर्वपूर्वप्रशमसंस्कारपाटवेन तदाधिक्यं प्रशांतवाहितेति। तत्कारणं च सूत्रयामास। विरामप्रत्ययाभ्यासपूर्वः संस्कारशेषोऽन्य इति। विरामो वृत्त्युपरमस्तस्य प्रत्ययः कारणं वृत्त्युपरमार्थः पुरुषप्रयत्नस्तस्याभ्यासः पौनःपुन्येन संपादनं तत्पूर्वकस्तज्जन्यो योऽन्यः संप्रज्ञाताद्विलक्षणोऽसंप्रज्ञात इत्यर्थः। एतादृशो य आत्मसंयमयोगः स एवाग्निस्तस्मिन् ज्ञानदीपिते। ज्ञानं वेदांतवाक्यजन्यो ब्रह्मात्मैक्यसाक्षात्कारस्तेनाविद्यातत्कार्यनाशद्वारा दीपिते अत्यंतोज्वलिते बाधपूर्वके समाधौ समष्टिलिंगशरीरमपरे जुह्वति प्रविलापयंतीत्यर्थः। अत्र च सर्वाणीति। आत्मेति ज्ञानदीपित इति। विशेषणयोरेकत्वविवक्षयैकवचनेन पूर्ववैलक्षण्यं सूचितमिति न पौनरुक्त्यम्। २८ एवं त्रिभिः श्लोकैः पंच यज्ञानुक्त्वाऽधुनैकेन श्लोकेन षड्यज्ञानाह। द्रव्यत्याग एव यथाशास्त्रं यज्ञो येषां ते द्रव्ययज्ञाः पूर्तदत्ताख्यस्मार्तकर्मपराः। तथा च स्मृतिः वापीकूपतडागादिदेवतायतनानि च। अन्नप्रदानमारामः पूर्तमित्यभिधीयते। शरणागतसंत्राणं भूतानां चाप्यहिंसनं। बहिर्वेदि च यद्दानं दत्तमित्यभिधीयते। इति। इष्टाख्यं श्रौतं कर्म तु दैवमेवापरे यज्ञमित्यत्रोक्तं। अंतर्वेदि दानमपि तत्रैवांतर्भूतं। तथा कृच्छ्रचांद्रायणादि तप एव यज्ञो येषां ते तपोयज्ञास्तपस्विनः। तथा योगश्चित्तवृत्तिनिरोधोऽष्टांगो यज्ञो येषां ते यो ९५

गयज्ञाः यमनियमासनादियोगांगानुष्ठानपराः। यमनियमासनप्राणायामप्रत्याहारध्यानसमाधयो हि योगस्याष्टा
वंगानि। तत्र प्रत्याहारः श्रोत्रादीनींद्रियाण्यन्य इत्यत्रोक्तः। धारणाध्यानसमाधय आत्मसंयमयोगाग्नावित्यत्रोक्ताः। प्रा
णायामोऽपाने जुह्वति प्राणमित्यनंतरश्लोके वक्ष्यते। यमनियमासनानि व्याख्यायंते। अहिंसासत्यास्तेयब्रह्मचर्यापरिग्र
हाः यमाः पंच। शौचसंतोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः पंच। स्थिरसुखमासनं पद्मकस्वस्तिकाद्यनेकविधं।
अशास्त्रीयः प्राणिवियोगो हिंसा। सा च कृतकारितानुमोदितभेदेन त्रिविधा। एवमयथार्थभाषणमवध्यहिंसानुबंधि

द्रव्ययज्ञास्तपोयज्ञा योगयज्ञास्तथापरे। स्वाध्यायज्ञानयज्ञाश्च यतयः संशितव्रताः ॥ २८

यथार्थभाषणं चानृतं। स्तेयमशास्त्रीयमार्गेण परद्रव्यस्वीकरणं। अशास्त्रीयः स्त्रीपुंसव्यतिकरो मैथुनं। शा
स्त्रानिषिद्धमार्गेण देहयात्रानिर्वाहकाधिकभोगसाधनस्वीकारः परिग्रहः। एतन्निवृत्तिलक्षणा उपरमा यमाः।
यम उपरम इति स्मरणात्। तथा शौचं द्विविधं बाह्यमाभ्यंतरं च। मृज्जलादिभिः कायादिक्षालनं हितमितमेध्याश
नादि बाह्यं। मैत्रीमुदितादिभिर्मदमानादिचित्तमलक्षालनमांतरं। संतोषो विद्यमानभोगोपकरणादधिकस्या
नुपादित्सारूपा चित्तवृत्तिः। तपः क्षुत्पिपासाशीतोष्णादिद्वंद्वसहनं काष्ठमौनाकारमौनादिव्रतानि च। इंगितेनापि
स्वाभिप्रायाप्रकाशनं काष्ठमौनं। अवचनमात्रमाकारमौनमिति भेदः। स्वाध्यायो मोक्षशास्त्राणामध्ययनं

श्रीराम [illegible]

[illegible] ९६ पा

[illegible]ज्ञो वा ईश्वरप्रणिधानं सर्वकर्मणां तस्मिन् परमगुरौ [illegible] तयार्पणं एते विशिष्टरूपा नियमाः पुराणेषु ये [illegible]
[illegible] एव यमनियमेषु अंतर्भाव्याः एतादृशा यमनियमाद्यभ्यास[illegible] योगयज्ञाः स्वाध्यायज्ञानयज्ञाश्च यथावि
धिवेदाभ्यास[illegible] स्वाध्याययज्ञाः न्यायेन वेदार्थनिश्चयः ज्ञानयज्ञाः [illegible]रमाह। यतयो यत्नशीलाः संशितव्रताः
सम्यक्शितानि तीक्ष्णीकृतानि अतिदृढानि व्रतानि येषां ते संशितव्रता [illegible] इत्यर्थः। तथा च भगवान् पतंजलिः
[illegible] देशकालसमयानवच्छिन्नाः सार्वभौमा महाव्रतमिति। ते पूर्वमहिंसाद्याः पंच यमा उक्तास्त एव जात्या [illegible]
[illegible]भूमयो महाव्रतशब्दवाच्याः तत्राहिंसा जात्यवच्छिन्ना यथा मृगयो मृगातिरिक्तान् न हनिष्यामीति देशावच्छिन्ना
[illegible] न हनिष्यामीति। सैव कालावच्छिन्ना यथा न चतुर्दश्यां न पुण्येहनीति। सैव प्रयोजनविशेषरूपसमयावच्छिन्ना
यथा [illegible] प्रयोजनव्यतिरेकेण न हनिष्यामीति युद्धं विना न हनिष्यामीति च। एवं विवाहादिप्रयोज
[illegible]व्यतिरेके [illegible] वदिष्यामीति। एवमापत्कालव्यतिरेकेण [illegible] करिष्यामीति। एवमनुक्
[illegible]। यथा [illegible] अवच्छेदो द्रष्टव्यः
[illegible] [illegible] सर्वकालसर्वप्रयोजनेषु [illegible] सार्वभौमा अहिंसादयो भवंति। ९६
[illegible]परिहारेण यदा सर्वजातिसर्वदेश[illegible] [illegible] परिपाल्यमानत्वात् तदा ते [illegible] [illegible] ता दृशव्रत
तदा [illegible]

[illegible] [illegible] चतुर्णामपि नरकद्वारभूतानां निवृत्तिः तत्राहिंसया क्षमया क्रोधस्य। ब्रह्मचर्येण वस्तु
[illegible] कामस्य। अस्तेयापरिग्रहरूपेण संतोषेण लोभस्य सत्येन यथार्थज्ञानरूपेणाविवेकेन मोहस्य। तन्मूलानां
च सर्वेषां निवृत्तिरिति द्रष्टव्यं। इतराणि च फलानि [illegible] योगशास्त्रे कथितानि २९ प्राणायामयज्ञमाह सार्द्धे
न। अपाने ऽपानवृत्तौ जुह्वति प्रक्षिपंति प्राणवृत्तिं बाह्यवायोः शरीरांतरप्रवेशेन पूरकाख्यं प्राणायामं कुर्वंतीत्यर्थः।
प्राणेऽपानं तथापरे जुह्वति शारीरवायोर्बहिर्निर्गमनेन रेचकाख्यं प्राणायामं कुर्वंतीत्यर्थः। पूरकरेचककथनेन [illegible]
ना [illegible] द्विविधः कुंभकोपि कथित एव। यथाशक्ति वायुमापूर्य [illegible] श्वासप्रश्वासनिरोधः क्रियमाणो ऽंतः कुंभकः य

अपाने जुह्वति प्राणं प्राणेऽपानं तथापरे प्राणापानगती रुद्ध्वा प्राणायामपरायणाः
अपरे नियताहाराः प्राणान्प्राणेषु जुह्वति ॥२९॥ ३०

यथाशक्ति सर्वं वायुं विरेच्यानंतरं क्रियमाणो बहिः कुंभकः एतत्प्राणायामत्रयानुवादपूर्वकं चतुर्थं कुंभकमाह। प्रा
[illegible] नासिकाभ्यामांतरस्य वायोर्बहिर्निर्गमः श्वासः [illegible]गतिः बहिर्निर्गतस्यांतःप्रवेशः प्रश्वासो
ऽपानस्य [illegible] पूरके प्राणगतिनिरोधः रेचकेऽपानगतिनिरोधः कुंभके [illegible] गतिनिरोध इति क्रमेण युग
पच्च श्वासप्रश्वासाख्ये प्राणापानगती रुद्ध्वा प्राणा[illegible] परे पूर्वविलक्षणाः नियताहाराः आहार

गी॰टी॰ नियमादियोगसाधनविशिष्टाः प्राणेषु बाह्याभ्यंतरकुंभकाभ्यासेन निगृहीतेषु प्राणान् ज्ञानेंद्रियकर्मेंद्रियरूपान् जुह्व
९९ ति चतुर्थकुंभकाभ्यासेन विलापयंतीत्यर्थः। तदेतत्सर्वं भगवता पतंजलिना संक्षेपविस्ताराभ्यां सूत्रितं। तत्र संक्षेपसूत्रं।
तस्मिन्सति श्वासप्रश्वासयोर्गतिविच्छेदलक्षणः प्राणायाम इति। तस्मिन्नासने स्थिरे सति प्राणायामोऽनुष्ठेयः। कीदृशः मो
श्वासप्रश्वासयोर्गतिविच्छेदलक्षणः श्वासप्रश्वासयोः प्राणापानधर्मयोर्या गतिः पुरुषप्रयत्नमंतरेण स्वाभाविक
प्रवहणं क्रमेण युगपच्च पुरुषप्रयत्नविशेषेण तस्या विच्छेदो निरोधस्तल्लक्षणः स्वरूपं यस्य स तथोक्तः। एतं
विवृणोति। बाह्याभ्यंतरस्तंभवृत्तिर्देशकालसंख्याभिः परिदृष्टो दीर्घसूक्ष्म इति। बाह्यगतिनिरोधरूपो बाह्यवृ
त्तिः पूरकः आंतरगतिनिरोधरूपो वा आंतरवृत्तिः रेचकः केचित्तु बाह्यशब्देन रेचक आंतरशब्देन च पूरको व्याख्यातः
युगपदुभयगतिनिरोधः स्तंभवृत्तिः कुंभकः। नतु कुंभयत्नो भयोः श्वासप्रश्वासयोः सकृदेव विधारकात्प्रयत्ना
द्भावो भवति। न पुनः पूर्ववदापूरणप्रयत्नौघनिर्वर्त्यः। नापि रेचनप्रयत्नौघविधारणं। यथा तप्ते उपले निहि ९७
तं जलं परिशुष्यत् सर्वतः संकोचमापद्यते एवमयमपि मारुतो वहनशीलो बलवद्विधारकप्रयत्नावरुद्धक्रियः
शरीर एव सूक्ष्मीभूतो वर्तिष्यते न तु पूरयति येन पूरकः न तु रेचयति येन रेचक इति। त्रिविधोऽयं प्राणायामो देश
कालेन संख्यया च परीक्षितो दीर्घसूक्ष्मसंज्ञो भवति यथा घनीभूतस्तूलपिंडः प्रसार्यमाणो विरलतनुर्या दी

किं वक्ष्यमाणो वेदे [illegible] योगो वमुखे [illegible] हविरेव वाङ्नमाणामित्याह एवं यथोक्ता बहुविधा बहुप्रकारा यज्ञाः स
र्वैः [illegible] कश्रेयः [illegible] रूपा वितता विस्तृता ब्रह्मणो वेदस्य मुखे द्वारे वेदद्वारेणैवैते ऽवगतादित्यर्थः। वेदवाक्यानि तु प्रत्ये
कं विस्तरभयान्नो दाह्रियंते। कर्मजान् कायिकवाचिकमानसकर्मोद्भवान्विद्धि जानीहि तान्सर्वान्यज्ञान्नात्मजान् व्या
पारास्पृष्टो ह्यात्मा निर्व्यापार इत्यर्थः। किं तु निर्व्यापारोऽहमुदासीन इत्येवं ज्ञात्वा विमोक्ष्यसे ऽस्मात्संसारबंधनादिति शेषः ३२
सर्वेषां तुल्यवन्निर्देशात् कर्मज्ञानयोः साम्यप्राप्तावाह श्रेयान्द्रव्यमयात् साक्षान्मोक्षफलत्वात् द्रव्यमयात्तदुपल
एवं बहुविधा यज्ञा वितता ब्रह्मणो मुखे कर्मजान्विद्धि तान्सर्वानेवं ज्ञात्वा विमोक्ष्यसे ३२
श्रेयान्द्रव्यमयाद्यज्ञाज्ज्ञानयज्ञः परंतप सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते ३३
[illegible] तान् ज्ञानशून्यात्सर्वस्मादपि यज्ञात्संसारफलात् ज्ञानयज्ञ एक एव हे परंतप कस्मादेवं यस्मात्सर्वं कर्मेद
[illegible] ऐशु सोमचयनरूपं श्रौतमखिलं निरवशेषं स्मार्तमुपासनादिरूपं च यत्कर्म तज्ज्ञाने ब्रह्मात्मैक्यसाक्षात्का
रे समाप्यते प्रतिबंधक्षयद्वारेण पर्यवस्यति। तमेतं वेदानुवचनेन ब्राह्मणा विविदिषंति यज्ञेन दानेन तपसा
ऽनाशकेन [illegible] धर्मेण पापमपनुदतीति च श्रुतेः। सर्वापेक्षा च यज्ञादिश्रुतेरश्ववदिति न्यायाच्चेत्यर्थः ३३

एतादृशज्ञा[illegible]लोकेऽपिप्रत्यासन्नः उपाय इत्युच्यते। तत्सर्वकर्मफलभूतं ज्ञानं विद्धि लभस्व आचार्यानभिगम्य तेषां प्रणिपातेन प्रकर्षेण नीचैः पतनं प्रणिपातो दीर्घनमस्कारस्तेन को हं कथं बद्धोऽस्मि केनोपायेन मुच्येयमित्यादिपरिप्रश्नेन बहुविषयेण प्रश्नेन। सेवया सर्वभावेन तदनुकूलकारितया। एवं भक्तिश्रद्धातिशयपूर्वकेणाविनीतविशेषेणाभिमुखाः सन्तः उपदेक्ष्यन्त्युपदेशेन संपादयिष्यन्ति ते तुभ्यं ज्ञानं परमात्मविषयं साक्षान्मोक्षफलं ज्ञानिनः पदवाक्यन्यायादिमाननिपुणाः तत्त्वदर्शिनः कृतसाक्षात्काराः साक्षात्कारवद्भिरुपदिष्टमेव ज्ञानं फलपर्यवसायि न तु तद्रहितैः पदवाक्यमाननिपुणैरपीति भगवतो मतं तत्

तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः ३५

यज्ज्ञात्वा न पुनर्मोहमेवं यास्यसि पाण्डव येन भूतान्यशेषेण द्रक्ष्यस्यात्मन्यथो मयि ३६

द्विज्ञानार्थं स गुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठमिति श्रुतिसंवादि तत्रापि श्रोत्रियमधीतवेदं ब्रह्मनिष्ठं कृतब्रह्म[illegible]मिति व्याख्यानात् बहुवचनं चेदमाचार्यविषयमेकस्मिन्नपि गौरवातिशयार्थं न तु बहुत्वविवक्षया एकस्मादेव तत्त्वसाक्षात्कारवतोऽवतरणादन्ये सत्याचार्यान्तरगमनस्य तद्दर्थमयोगादिति द्रष्टव्यं ३५ एवमतिनिर्बन्धेन ज्ञानोत्पत्तौ [illegible] आह यज्ज्ञात्वेति [illegible] प्राप्य ओदनपाकं पचतीतिवत्स्य बधातोः सामान्यविवक्षया प्रयोगः [illegible] वधादिनिमित्तं भ्रमं यास्यसि [illegible] कस्मादेवं यस्मात् येन ज्ञानेन भूतानि पितृपुत्रादीनि अशेषेण ब्र ६८

[illegible] भवति तथा आर्याणापि दश कालसंख्या [illegible] नाम्यस्यमानो[illegible] पाण्डुलेख [illegible] पास्वरोऽपि संपद्यते तथाहि द्रु[illegible] स्पष्टीकर्तव्यं [illegible] संमुखद्वादशाङ्गुलपर्यन्ते [illegible] समाप्यते तत्र [illegible] सहृदयपर्यन्तं प्रविशतीति [illegible]
[illegible] विक्षिप्त [illegible] योगी तिः अभ्यासेन तु क्रमेण [illegible] तुर्विंशत्यङ्गुलपर्यन्ते षड्विंशदङ्गुल [illegible] तं समदेश [illegible] एवं प्रवेशोऽपि तावानवगंतव्यः तत्र बा[illegible] निर्विकारे [illegible] कादिस्पर्श [illegible]
[illegible] मात्रया अन्तरश्रेणीलिकादिस्पर्शसहशेन स्पर्शेनानुमा[illegible] देशपरीक्षा तथा निमेषक्रियावच्छिन्नस्यक[illegible] स्य च तुर्थभाग [illegible] धारणी [illegible] मण्डलं पाणिना [illegible] छोटिकावच्छिन्नः कालो मा[illegible] षड्विंशतमात्रा [illegible] प्रथम [illegible] मंदः स एव द्विगुणीकृतो द्वितीयो मध्यः स एव त्रिगुणीकृतस्तृतीय [illegible] नाति [illegible] विद्यमानस्य [illegible] युच्यते सेयं कालपरीक्षा संख्या [illegible] कालसंख्ययोः कथं विद्धे द्विविधया एथगु[illegible] संख्या [illegible] गम्यत एव सरवल्लयं प्रत्यहमभ्यस्तो दि[illegible] कालं [illegible] परमं [illegible] समाधिगमनीयतया [illegible] इति निष्कृपि[illegible] तुर्थं [illegible] चतुर्थ इति बाह्यविषय [illegible] सेवको

गी०टी० ४
९८
भ्यंतरविषयः प्रश्वासः पूरकः वैपरीत्येवातावुभौ वपेक्ष्य सकृद्बलवद्विधारकप्रयत्नवशाद्भवति बाह्याभ्यंतरभेदेन द्विविधः स्तृतीयः कुंभकः तावुभावनपेक्ष्यैव केवलकुंभकाभ्यासपाटवेनासकृत्तत्तत्प्रयत्नवशाद्भवति चतुर्थः कुंभकः तथा च बाह्याभ्यंतरविषयावपेक्षितः तदनपेक्ष इत्यर्थः। अन्या व्याख्या। बाह्यो विषयो द्वादशांतादिराभ्यंतरविषयो हृदयनाभिचक्रादिः तौ द्वौ विषयावाक्षिप्य पर्यालोच्य यस्तंभरूपो गतिविच्छेदः स चतुर्थः प्राणायाम इति तृतीयस्तु बाह्याभ्यंतरौ विषयावपर्यालोच्यैव सहसा भवतीति विशेषः एतादृशश्चतुर्विधः प्राणायामोऽपाने जुह्वति प्राणमित्यादिना सार्द्धेन श्लोकेन दर्शितः ३०

सर्वेप्येते यज्ञविदो यज्ञक्षपितकल्मषाः। यज्ञशिष्टामृतभुजो यांति
ब्रह्म सनातनम् ३१ नायं लोकोस्त्ययज्ञस्य कुतोन्यः कुरुसत्तम ३१

तेषां द्वादशधा यज्ञविदां फलमाह यज्ञान्विदंति जानंति विंदंति लभंते वेति यज्ञविदो यज्ञानां ज्ञातारः कर्त्तारश्च यज्ञैः पूर्वोक्तैः क्षपितं नाशितं कल्मषं येषां ते यज्ञक्षपितकल्मषाः यज्ञान्कृत्वावशिष्टे काले ऽन्नममृतशब्दवाच्यं भुंजत इति यज्ञशिष्टामृतभुजस्ते सर्वेपि सत्वशुद्धिज्ञानप्राप्तिद्वारेण यांति ब्रह्म सनातनं नित्यं संसारान्मुच्यंत इत्यर्थः। ३१ एवमन्वये गुणमुक्त्वा व्यतिरेके दोषमाह अर्द्धेन उक्तानां यज्ञानां मध्ये [illegible] यज्ञो यस्य नास्ति सोऽयज्ञस्तस्यायमल्पसुखोपि मनुष्यलोको नास्ति सर्वनिंद्यत्वात्कुतोन्यो विशिष्टसाधनसाध्यः परलोकः हे कुरुसत्तम ३२ ९८

९८
[illegible] ध्यानि [illegible] आत्मनि [illegible] अथो अपि मयि भगवति वासुदेवे [illegible] परमार्थतो [illegible] भेदेन अधिष्ठानातिरेकेण [illegible] तस्याभावात् मां भगवंतं वासुदेवमात्मत्वेन साक्षात्करिष्यसि [illegible] ज्ञाननाशितकर्माणि [illegible] इति भावः ३५ किंच शृणु ज्ञानस्य माहात्म्यं। अपि चेदसि संभाविताभ्युपगमप्रदर्शनार्थो निपातः। यद्यप्ययमर्थो न संभवत्येव तथापि ज्ञानफलकथनायाभ्युपेत्योच्यते। यद्यपि त्वं पापकारिभ्यः सर्वेभ्योप्यतिशयेन पापकारी पापकृत्तमः स्यात्तथापि सर्वं वृजिनं पापं अतिदुस्तरं [illegible] अर्णवमिव ज्ञानप्लवेनैव [illegible] ज्ञानमेव प्लवं पोतं कृत्वा

अपि चेदसि पापेभ्यः सर्वेभ्यः पापकृत्तमः सर्वं ज्ञानप्लवेनैव वृजिनं संतरिष्यसि ३७
यथैधांसि समिद्धोग्निर्भस्मसात्कुरुतेर्जुन ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा ३८

संतरिष्यसि सम्यगनायासेन पुनरावर्त्तिवर्जितत्वेन च तरिष्यसि अतिक्रमिष्यसि वृजिनशब्देनात्र धर्माधर्मरूपं कर्म संसारफलमभिप्रेतं मुमुक्षोः पापवत्पुण्यस्याप्यनिष्टत्वात् ३७ ननु समुद्रवत्तरणे कर्मणां नाशो न स्यादित्याशंक्य दृष्टांतांतरमाह यथैधांसि काष्ठानि समिद्धः प्रदीप्तोग्निर्भस्मसात्कुरुते भस्मीभावं नयति हे अर्जुन ज्ञानाग्निः सर्वकर्माणि पापानि पुण्यानि चाविशेषेणाप्रारब्धफलानि भस्मसात्कुरुते तथा तत्कारणाज्ञानविनाशेन विनाशयतीत्यर्थः तथा च श्रुतिः भिद्यते हृदयग्रंथिश्छिद्यंते सर्वसंशयाः। क्षीयंते चास्य कर्माणि तस्मिन्दृष्टे परावर इति। तदधिगम उत्तरपूर्वाघयोरश्लेष

गी॰टी॰ [illegible] रस्तरस्याप्येवमसंश्लेषः पातेविनिचसूत्रे। अनारब्धसुकृतपापेनश्यत एवेत्यत्र सूत्रे अनारब्धकार्ये एवतुपू
१०० र्वे तदवधेरितिज्ञानोत्पादकदेहारंभकानांतुतद्देहांतएवविनाशः तस्यतावदेवचिरं यावन्नविमोक्ष्येऽथसंपत्स्यइतिश्रुतेः। भोगेनत्वि
[illegible] पयिवासंपद्यतइतिसूत्राच्च आधिकारिकाणांतुयान्येवज्ञानोत्पादकदेहारंभकाणितान्येवदेहांतरारंभकाण्यपिदियथा
[illegible] पांतरतमः प्रभृतीनां तथाचसूत्रं यावदधिकारमवस्थितिराधिकारिकाणामिति। आधिकारोनेकदेहारंभकंबलवत्प्रा
रब्धफलं कर्मतच्चोपासकानामेवनान्येषां। अनारब्धफलानिनश्यंति आरब्धफलानितुयावज्ज्ञानमात्तिष्ठति भोगश्चैकेन
देहेनानेकेनवेतिनविशेषः विशेषस्त्वाकरेद्रष्टव्यः ३८ नहिज्ञानेनसदृशंपवित्रमिहविद्यते तत्स्वयं
योगसंसिद्धः कालेनात्मनिविंदति ३९

यस्मा[illegible] नहिज्ञानेनसदृशंपवित्रंपावनंशुद्धिकरमन्यदिहवेदेलोकव्यवहारेवाविद्यते। ज्ञानभिन्नस्याज्ञाननि न
वर्तक[illegible]पापनिकृंतकत्वाभावात् कारणसद्भावेनपुनःपापोदयाच्च ज्ञानेनतुअज्ञाननिवृत्त्यासमूलपापनिवृत्तिरिति
पुनः तत्[illegible]विद्यते। तदात्मविषयंज्ञानंसर्वेषांकिमितिझटितिनोत्पद्यतेतत्राह तत्ज्ञानंकालेनमहतायोगसंसिद्धःयो १००
गेनपूर्वोक्तकर्मयोगेनसंसिद्धः संस्कृतोयोग्यतामापन्नः स्वयमात्मन्यंतःकरणेविंदतिलभते। नतुयोग्यतामप्राप्तो
ऽन्यदत्तं[illegible]ध्वीयतइत्यर्थः ३९

गी॰टी॰ येनैक[illegible]भवतितत्रउपायः प्रणिपातादयःपेरूपायासन्नतरउच्यते गुरुवेदांतवाक्येष्विदमित्थमेवेतिप्रमारूपास्ति
क्यबुद्धिःश्रद्धातद्वान्पुरुषोलभतेज्ञानंएतादृशोपिकश्चिदलसःस्यात्तत्राहतत्परःगुरूपासनादौज्ञानोपायेऽत्यंताभियुक्तःश्र
द्धावांस्तत्परोपिकश्चिदजितेंद्रियःस्यादतआहसंयतानिविषयेभ्योनिवर्तितानींद्रियाणियेनसंयतेंद्रियःयएवंविशेषणत्र
ययुक्तःसोवश्यंज्ञानंलभतेप्रणिपातादिस्तुबाह्योमायाविवादिसंभवादनैकांतिकोपिश्रद्धात्वादिस्त्वैकांतिकउपायइत्य
र्थः ईदृशेनोपायेनज्ञानंलब्ध्वापरांचरमांशांतिमविद्यातत्कार्यनिवृत्तिरूपांमुक्तिमचिरेणतदव्यवधानेनैवाधिगच्छतिलभ
ते श्रद्धावाल्लँभतेज्ञानंतत्परःसंयतेंद्रियः ज्ञानंलब्ध्वापरांशांतिमचिरेणाधिगच्छति ४०
अज्ञश्चाश्रद्दधानश्चसंशयात्माविनश्यति नायंलोकोस्तिनपरोनसुखंसंशयात्मनः ४१
नै। यथाहिदीपःस्वोत्पत्तिमात्रेणैवअंधकारनिवृत्तिंकरोतिनतुकंचित्सहकारिणमपेक्षतेतथाज्ञानमपिस्वोत्पत्तिमात्रेणै
वाज्ञाननिवृत्तिंकरोतिनतुकिंचित्संख्यानादिकमपेक्षतइतिभावः ४० अत्रचसंशयोनकर्तव्यःकस्मात् अज्ञोऽनधीत
शास्त्रत्वेनात्मज्ञानशून्यःगुरुवेदांतवाक्यार्थइदमेवंनभवत्येवेतिविपर्ययरूपानास्तिक्यबुद्धिरश्रद्धातद्वानश्रद्दधानःइदमे
वंभवतिनवेतिसर्वत्रसंशयाक्रांतचित्तःसंशयात्माविनश्यति स्वार्थाद्भ्रष्टोभवति। अज्ञश्चाश्रद्दधानश्चविनश्यतीतिसंशयात्मा
पेक्षयान्यूनत्वकथनार्थंचकाराभ्यांतयोःप्रयोगः कुतःसंशयात्माहिसर्वतःपापीयान्यतोनायंमनुष्यलोकोस्तिवित्तार्जना

[illegible] लोकः स्वर्गो मोक्षादिः धर्म [illegible] भोजनादि [illegible] संशयात्मनः सर्वत्र संदेहाक्रान्तचित्तस्य [illegible]
अद्ध [illegible] लोको नास्ति न [illegible] लोको भोजनादिसुखं [illegible] संशयात्मा [illegible] हीनत्वेन सर्वतः पापीयानित्यर्थः ४०
[illegible] सर्वानर्थमूलस्य संशयस्य निराकरणाय आत्मनिश्चयमुपायं [illegible] ध्याय [illegible] पूर्वापरभूमिकाभेदेन कर्मज्ञाननिष्ठे
[illegible] ब्रह्मनिष्ठामुपसंहरति योगेनेति भगवदाराधनलक्षणसमत्वबुद्धिरूपेण सन्न्यस्तानि भगवति समर्पितानि कर्माणि
[illegible] परमार्थदर्शनलक्षणेन योगेन सन्न्यस्तानि [illegible] कर्माणि [illegible] योगसन्न्यस्तकर्माणं संशये सति कथं योगसन्न्यास

योगसन्न्यस्तकर्माणं ज्ञानसंछिन्नसंशयम् आत्मवन्तं न कर्माणि निबध्नन्ति धनंजय ४१ भगवद्गीता
तस्मादज्ञानसंभूतं हृत्स्थं ज्ञानासिनात्मनः छित्त्वैनं संशयं योगमातिष्ठोत्तिष्ठ भारत ४२ चतुर्थोध्याय

कर्म [illegible] ज्ञानसंछिन्नसंशयं ज्ञानेनात्मनिश्चयलक्षणेन छिन्नः संशयो येन तं विषयपरवशत्वरूपप्रमादे सति कुतो ज्ञा
आ [illegible] आत्मवन्तं अप्रमादिनं सर्वदा सावधानं एतादृशमप्रमादित्वेन ज्ञानवन्तं ज्ञानछिन्नसंशयत्वेन योगसन्न्यस्त
कर्माणं कर्माणि [illegible] दृष्टार्थानि [illegible] नानिष्टमिष्टं मिश्रं वा शरीरं नारभन्ते [illegible] धनंजय ४१
[illegible] विवेक [illegible] हृत्स्थं [illegible] ज्ञानेन शत्रुः सुखेन [illegible] नाशकाय इत्यु
[illegible] संभूतं संशयं [illegible] आत्मविषयकं [illegible]
[illegible] यहे भारत भरतवंशे जातस्य युद्धोद्यमो निष्फल इति भावः [illegible]

आद्याभ्यां [illegible] कर्मबोधयोः कर्मनिष्ठ [illegible] निर्णयः कि [illegible] धुना तृतीयाध्याये [illegible] चेत्क
[illegible] इत्यादिना [illegible] भगवद [illegible] या संभवे नाधिकारि भेदव्यवस्थया [illegible] बुद्धि
[illegible] पुरा [illegible] इत्यादिना निर्णयं [illegible] किं कर्म न ज्ञानेन सह समुच्चीयते [illegible] द्वयोरि
[illegible] दत्तेभाग कर्माधिकारहेतुभेदबुद्ध्यपना [illegible] शोधकत्वात् नापि विकल्प्यते एककार्यत्वाभावात् ज्ञा
नकार्यस्याज्ञाननाशस्य कर्मणा कर्तुमशक्य [illegible] मेव [illegible] तमेव विदित्वा अतिमृत्युमेति नान्यः पंथा विद्यतेऽयनायेति श्रुतेः ज्ञा
नोत्पत्तौ तु कर्म [illegible] नापेक्षते तदेव [illegible] यावानर्थ [illegible] इत्युक्तत्वात् ज्ञानिनः कर्मानधिकारे निश्चिते प्रारब्धकर्मवशा
द्व्यावृत्तिरूपेण तदनुष्ठानं वा सर्वकर्मसंन्यासो वेति निर्विवाद [illegible] अज्ञेन त्वंतःकरणशुद्धिद्वारा ज्ञानोत्पत्त
[illegible] श्रेयानि तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति [illegible] दानेन तपसाऽनाशकेनेति श्रुतेः सर्वकर्माखि
[illegible] ज्ञाने परिसमाप्यत इति भगवद्वचनाच्च सर्वकर्माणि [illegible] तथा सर्वकर्मसंन्यासोपि ज्ञानार्थं श्रूयते
[illegible] मेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्तीति शांतो दांत उपरतस्तितिक्षुः समाहितो भूत्वात्मन्येवात्मानं पश्येत् [illegible]
[illegible] कुर्वीत [illegible] संन्यस्य श्रवणं कुर्यादिति [illegible] लोक [illegible] आत्मानमन्विच्छेदित्यादेः तत्र कर्मत्याग
[illegible] कसन्निपातोपकारकयोः [illegible] भवति विरुद्धत्वेन योगपद्याभावात् नापि कर्म
[illegible] त्याग [illegible] नैकार्थ्यादिति [illegible]

चतुर्थोध्यायः [illegible]

मात्र

गी.टी.५ तत्त्यागयोरात्मज्ञानफलत्वेनैकार्थत्वादतिरात्रार्थयोः षोडशिग्रहणाग्रहणयोरिव विकल्पः स्यात्। द्वारभेदेनैकार्थत्वा
१०२ भावात्कर्मणो हि पापक्षयरूपमदृष्टमेव द्वारं संन्यासस्य तु सर्वविक्षेपाभावेन विचारावसरदानरूपं दृष्टमेव द्वारं नियमापू
र्वं तु दृष्टसमवायित्वादवघातादाविव न प्रयोजकं। तथा चादृष्टार्थदृष्टार्थयोरारादुपकारकसन्निपत्योपकारकयोरेकप्र
धानार्थत्वेऽपि विकल्पो नास्त्येव। प्रयाजावघातादीनामपि तत्प्रसंगात्तस्मात्क्रमेणोभयमप्यनुष्ठेयं तत्रापि संन्यासानंत
रं कर्मानुष्ठानं चेत्तदा परित्यक्तपूर्वाश्रमस्वीकारेणारूढपतितत्वादकर्माधिकारित्वं प्राक्तनसंन्यासवैयर्थ्यं च स्याद्दृष्टा
र्थत्वाभावात्। प्रथमकृतसंन्यासेनैव ज्ञानाधिकारलाभे तदुत्तरकालीककर्मानुष्ठानवैयर्थ्यं च। तस्मादादौ भगवदर्पणबु
द्ध्या निष्कामकर्मानुष्ठानादंतःकरणशुद्धौ तीव्रेण वैराग्येण विविदिषायां दृढायां सर्वकर्मसंन्यासः श्रवणमननादि
रूपवेदांतवाक्यविचाराय कर्तव्य इति भगवतो मतं। तथा चोक्तं। न कर्मणामनारंभान्नैष्कर्म्यं पुरुषोऽश्नुत इति। वक्ष्यते च।
आरुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते। योगारूढस्य तस्यैव शमः कारणमुच्यत इति। योगोऽत्र तीव्रवैराग्यपूर्विका वि
विदिषा तदुक्तं वार्तिककारैः। प्रत्यग्विविदिषासिद्ध्यै वेदानुवचनादयः। ब्रह्मावाप्त्यै तु तत्त्यागमीप्संतीति श्रुतेर्बला १०२
दिति। स्मृतिश्च। कषायपक्तिः कर्माणि ज्ञानं तु परमा गतिः। कषाये कर्मभिः पक्वे ततो ज्ञानं प्रवर्तत इति। मोक्षधर्मे
वा। कषायं पाचयित्वा च श्रेणीस्थानेषु च त्रिषु। प्रव्रजेच्च परं स्थानं पारिव्राज्यमनुत्तमं। भावितैः करणैश्चायं बहुसंसारयो

विरजेत्तदहरेव २

निषु। आसादयति शुद्धात्मा मोक्षं वै प्रथमाश्रमे। ... मुक्तस्य दृष्टार्थस्य विपश्चितः। त्रिष्वाश्रमेषु को न्वर्थो
... इति। ... कर्मसंन्यासो द्वावपि दर्शितौ। तथा च श्रुतिः। ब्रह्मचर्यं समाप्य
गृही भवेद्गृहाद्वनी भूत्वा प्रव्रजेद्यदि वेतरथा ब्रह्मचर्यादेव प्रव्रजेद्गृहाद्वा वनाद्वा यदहरेव विरजेत्तदहरेव प्रव्रजेदिति। तस्मादज्ञस्याविर
क्ततादशायां कर्मानुष्ठानमेव न त्वेव विरक्ततादशायां संन्यासः श्रवणाद्यवसरदानेन ज्ञानार्थ इति दशाभेदेनाज्ञम
धिकृत्यैव कर्मतत्त्यागयोर्व्यवस्थापनाय पंचमषष्ठाध्यायावारभ्येते। विद्वत्संन्यासस्तु ज्ञानबलादर्थसिद्ध एवेति संदेहा
भावान्नात्र विचार्यते। तत्रैकमेवाधिकारिणं प्रति ज्ञानार्थत्वेन कर्मतत्त्यागयोर्विधानात्तयोश्च विरुद्धयोर्युगपदनु
ष्ठानासंभवात् ... जिज्ञासुना किमिदानीमनुष्ठेयमिति संदिहानः अर्जुन उवाच १ संन्यासं कर्मणां कृष्ण पुनर्यो
गं च शंससि। यच्छ्रेय एतयोरेकं तन्मे ब्रूहि सुनिश्चितम् १ हे कृष्ण सदानंदरूप भक्तदुःखकर्षणेति वा कर्म
नित्यानां णां ... दीक्षादिश्रुतिविहितानां नैमित्तिकानां च संन्यासं त्यागं जिज्ञासुं प्रति कथयसि वेदमुखेन। पुनस्त
द्विरुद्धं योगं च कर्मानुष्ठानरूपं शंससि। एतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजंतीत्येतं वेदानुवचनेन ब्राह्म
णा विविदिषंति यज्ञेनेत्यादिवाक्यद्वयेन निराशीर्यतचित्तात्मा त्यक्तसर्वपरिग्रहः। शारीरं केवलं कर्म कुर्वन्ना

गी·टी·५
१०३

मोतिकिल्बिषम्॥ छित्वैनं संशयं योगमातिष्ठोत्तिष्ठ भारतेति गीतावाक्यद्वयेन वा। तत्रैकमर्जुनं प्रति कर्मतत्त्यागयोर्विधानाद्युग
पदुभयानुष्ठानासंभवात्। एतयोः कर्मतत्त्यागयोर्मध्ये यदेकं श्रेयः प्रशस्यतरं मन्यसे कर्म वा तत्त्यागं वा तन्मे ब्रूहि सुनिश्चि
तं त्वमतन्मनुष्ठानाय १ एवमर्जुनस्य प्रश्नेतदुत्तरं निःश्रेयसकरौ ज्ञानोत्पत्तिहेतुत्वेन मोक्षोपयोगिनौ तयोस्तु कर्म
संन्यासादनधिकारिकृतात्कर्मयोगो विशिष्यते श्रेयानधिकारसंपादकत्वेन २ तमेव कर्मयोगं स्तौति त्रिभिः। सर्व
मीति प्रवृत्तोपि नित्यं संन्यासीति ज्ञेयः कोसौ यो न द्वेष्टि भगवदर्पणबुद्ध्या क्रियमाणं कर्म निष्फलत्वशंकया न कांक्षति स्वर्गा

श्रीभगवानुवाच संन्यासः कर्मयोगश्च निःश्रेयसकरावुभौ तयोस्तु कर्मसंन्यासात्कर्मयोगो विशिष्यते २
ज्ञेयः स नित्यसंन्यासी यो न द्वेष्टि न कांक्षति निर्द्वंद्वो हि महाबाहो सुखं बंधात्प्रमुच्यते ३

दि कं निर्द्वंद्वो रागद्वेषादिरहितो हि यस्मात् सुखमनायासेन हे महाबाहो बंधादंतःकरणशुद्धिरूपात् ज्ञानप्रतिबंधात्प्रमुच्यते
नित्यानित्यवस्तुविवेकादिप्रकर्षेण मुक्तो भवति ३ ननु यः कर्मणि प्रवृत्तः स कथं संन्यासीति ज्ञातव्यः कर्मतत्त्यागयोः स्वरू
पविरोधात् फलेप्यात्तथेति चेत् न स्वरूपतो विरुद्धयोः फलेपि विरोधस्योचितत्वात् तथा च निःश्रेयसकरावुभाविति नुपप
न्नमित्याशंक्याह सांख्यासम्यगात्मबुद्धिस्तां वहतीति ज्ञानांतरंगसाधनतया सांख्यः संन्यासः योगः पूर्वोक्तः कर्मयो
गः तौ पृथक् विरुद्धफलौ बालाः शास्त्रार्थविवेकज्ञानशून्याः प्रवदंति न पंडिताः किं तर्हि पंडितानां मतं उच्यते। एकमपि सं
न्यासकर्मणोर्मध्ये सम्यगास्थितः स्वाधिकारानुरूपेण सम्यक् यथाशास्त्रं कृतवान् सन्नुभयोर्विंदते फलं ज्ञानोत्पत्तिद्वारेण

[illegible] ५
सांख्ययोगौपृथग्बालाःप्रवदंतिनपंडिताः
एकमप्यास्थितःसम्यगुभयोर्विंदतेफलम् ४
१०३

एकस्यानुष्ठानात् कथमुभयोः फलं विंदतेत आह सांख्यैः ज्ञाननिष्ठैः संन्यासिभिरैहिककर्मानुष्ठानशून्यैरपि प्राग्जन्मीयकर्मभि
[illegible]संस्कृतांतःकरणैः श्रवणादिपूर्विकया ज्ञाननिष्ठया यत्स्थानं सिद्धस्थानं तिष्ठत्येवास्मिन्न तु कदापि व्यवतरति कुत्रत्यो
[illegible]प्राप्यते आवरणाभावमात्रेण लभ्यत इव नित्यप्राप्तत्वात् योगैरपि भगवदर्पणबुद्ध्या फलाभिसंधिरहितैर्विहिता
[illegible]णि कर्माणि योगास्ते येषां संति तेपि योगाः अर्श आदित्वान्मत्वर्थीयोऽच्प्रत्ययः ते योगिभिरपि सत्त्वशुद्ध्या संन्या
[illegible] श्रवणादिपूर्वकया ज्ञाननिष्ठया वर्तमाने भविष्यति वा जन्मनि संपद्यमानया तत्स्थानं गम्यते। अत एकफलत्वात्

यत्सांख्यैः प्राप्यते स्थानं तद्योगैरपि गम्यते एकं सांख्यं च योगं च यः पश्यति स पश्यति ५

एकं सांख्यं च योगं च यः पश्यति स एव सम्यक् पश्यति नान्यः अयं भावः येषां संन्यासपूर्विका ज्ञाननिष्ठा दृश्यते तेषां तये
वा[illegible] प्राग्जन्मसु भगवदर्पितकर्मनिष्ठानुमीयते। कारणमंतरेण कार्योत्पत्त्ययोगात्। तदुक्तं। यान्यतोन्यानि जन्मानि तेषु
नूनं कृतं भवेत्। यत्कृत्यं पुरुषेणेह नान्यथा ब्रह्मणि स्थितिरिति। एवं येषां भगवदर्पितकर्मनिष्ठा दृश्यते तेषां तयैव लिंगे
न भावि [illegible] संन्यासपूर्वकज्ञाननिष्ठानुमीयते। सामग्र्याः कार्याव्यभिचारित्वात्। तस्मात् अज्ञेन मुमुक्षुणा अंतःकरणशुद्धये
प्रथमं कर्मयोगोनुष्ठेयो न तु संन्यासः स तु वैराग्यतीव्रतायां स्वयमेव भविष्यतीति ६ अशुद्धांतःकरणेनापि संन्यास
एव प्रथमं कुतो न क्रियते ज्ञाननिष्ठाहेतुत्वेन तस्यावश्यकत्वादिति चेत्तत्राह अयोगतः योगमंतःकरणशोधकं शास्त्री
स्ते न्यासरत॥

गी.टी.५
१०४

यं कर्मातिरेणाहहादेव कः कूला संन्यासः सतु दुःखमाप्तुमेव भवति। अशुद्धांतःकरणत्वेन तत्फलस्य ज्ञाननिष्ठाया असंभवात् शो
धके च कर्मण्यनधिकारात् कर्मब्रह्मोभयभ्रष्टत्वेन परमसंकटापत्तेः। कर्मयोगयुक्तस्तु शुद्धांतःकरणो वा मुनिर्मननशीलः सं
न्यासीभूत्वा ब्रह्म सत्यज्ञानादिलक्षणमात्मानं नचिरेणाशीघ्रमेवाधिगच्छति साक्षात्करोति प्रतिबंधकाभावात् एतच्चोक्तं प्रागे
व न कर्मणामनारंभान्नैष्कर्म्यं पुरुषोऽश्नुते। न च संन्यसनादेव सिद्धिं समधिगच्छतीति। अत एकफलत्वेपि कर्मसंन्यासात्क
र्मयोगो विशिष्यत इति यत्प्रागुक्तं तदुपपन्नम्. ७ ननु कर्मणो बंधहेतुत्वात् योगयुक्तो मुनिर्ब्रह्माधिगच्छतीत्यनुपपन्नमि

संन्यासस्तु महाबाहो दुःखमाप्तुमयोगतः योगयुक्तो मुनिर्ब्रह्म नचिरेणाधिगच्छति ७
योगयुक्तो विशुद्धात्मा विजितात्मा जितेंद्रियः सर्वभूतात्मभूतात्मा कुर्वन्नपि न लिप्यते ८

त्यत आह। भगवदर्पणफलाभिसंधिराहित्यादिगुणयुक्तं शास्त्रीयं कर्म योग इत्युच्यते तेन योगेन युक्तः पुरुषः प्रथमं विशु
द्धात्मा विशुद्धो रजस्तमोभ्यामकलुषित आत्मा अंतःकरणरूपं सत्त्वं यस्य स तथा। निर्मलांतःकरणः सन् विजितात्मा स्ववशी
कृतदेहस्ततो जितेंद्रियः स्ववशीकृतसर्वबाह्येंद्रियः एतेन मनूक्तस्त्रिदंडी कथितः। वाग्दंडोथ मनोदंडः कायदंडस्त
थैव च। यस्यैते नियता दंडाः स त्रिदंडीति कथ्यत इति। वागिति बाह्येंद्रियोपलक्षणं एतादृशस्य तत्त्वज्ञानमवश्यं भवतीत्याह।
सर्वभूतात्मभूतात्मा सर्वभूत आत्मभूतश्चात्मा स्वरूपं यस्य स तथा जडाजडात्मकं सर्वमात्ममात्रं पश्यन्नित्यर्थः। सर्वेषां भूता
नामात्मभूत [illegible] आत्मा यस्येति [illegible] मेतावतैव अर्थलाभादात्मभूतेत्यधिकं स्यात्। सर्वात्मपदयोर्जडाजडपरत्वे

तुल्यमस्य संयतादशः परमार्थदर्शी कुर्वन्नपि कर्मणि
लिपरदृष्टा नालिप्यते ते: क.भिः स्वदृष्ट्या नालिप्यं हि कर्म त्वा
१०४

एतदेव विवृणोति द्वाभ्यां। चक्षुरादिज्ञानेंद्रियैर्वागादिकर्मेंद्रियैः प्राणादिवायुभेदैरंतःकरणचतुष्टयेन च तत्तच्चेष्टासु
क्रियमाणासु इंद्रियाणि इंद्रियादीन्येवेंद्रियार्थेषु स्वस्वविषयेषु वर्तंते प्रवर्तंते न त्वहमिति धारयन्नवधारयन् नैव किं
चित्करोमीति मन्येत मन्येत तत्त्ववित् परमार्थदर्शी युक्तः समाहितचित्तः अथवा आदौ युक्तः कर्मयोगेन पश्चात् अंतःकरणशु
द्धिद्वारेण तत्त्ववित् भूत्वा नैव किंचित्करोमीति मन्यत इति संबंधः। तत्र दर्शनश्रवणस्पर्शनघ्राणाशनानि चक्षुःश्रोत्रत्वग्घ्रा
णरसनानां पंचज्ञानेंद्रियाणां व्यापाराः पश्यन् शृण्वन् स्पृशन् जिघ्रन्नश्नन्नित्युक्ताः। गतिः पादयोः प्रलापो वाचः विसर्गः पा

नैव किंचित्करोमीति युक्तो मन्येत तत्त्ववित् पश्यन् शृण्वन् स्पृशन् जिघ्रन्नश्नन् गच्छन् स्वपन् श्वसन् ९
प्रलपन् विसृजन् गृह्णन्नुन्मिषन्निमिषन्नपि इंद्रियाणींद्रियार्थेषु वर्तंत इति धारयन् १०

यूपस्थयोः ग्रहणं हस्तयोरिति पंचकर्मेंद्रियव्यापाराः गच्छन् प्रलपन् विसृजन् गृह्णन्नित्युक्ताः। श्वसन्निति प्राणादि
पंचकस्य व्यापारोपलक्षणं उन्मिषन्निमिषन्निति नागकूर्मादिपंचकस्य स्वपन्नित्यंतःकरणचतुष्टयस्य अर्थक्रमवशा
त्पाठक्रमं भंक्त्वा व्याख्यातोयं श्लोकः यस्मात्सर्वव्यापारेष्वप्यात्मनोऽकर्तृत्वमेव पश्यति। अतः कुर्वन्नपि न लिप्यत इति
युक्तमेवोक्तमिति भावः १० तर्हि विद्वान्कर्तृत्वाभिमानाल्लिप्येतैव। तथा च कथं तस्य संन्यासपूर्विका ज्ञाननिष्ठा
स्यादिति तत्राह, ब्रह्मणि परमेश्वरे आधाय समर्प्य संगं फलाभिलाषं त्यक्त्वा ईश्वरार्थमित्युद्देश्य स्वस्वाम्यर्थं स्वफल
निरपेक्षतया करोमीत्यभिप्रायेण कर्माणि लौकिकानि वैदिकानि च करोति यः लिप्यते न स पापेन पापपुण्यात्मकेन कर्मणेतिया

[illegible] धाय कर्माणि संगं त्यक्त्वा करोति यः लिप्यते न स पापेन पद्मपत्रमिवांभसा १

पद्म

गी॰टी॰५ यथा पद्मपत्रमुपरिस्थितेनांभसा न लिप्यते तद्वद्भगवदर्पणबुद्ध्यानुष्ठितं कर्म बुद्धिशुद्धिफलमेव स्यात् ११ तदेव
१०५ विवृणोति। कायेन मनसा बुद्ध्येंद्रियैश्च योगिनः कर्मिणः फलसंगं त्यक्त्वा कर्म कुर्वंति कायादीनां सर्वेषां विशेषणं केवलै
रिति। ईश्वरायैव करोमि न मम फलायेति ममताशून्यैरित्यर्थः आत्मशुद्धये सत्त्वशुद्ध्यर्थम् ११ कर्तृत्वाभिमानसाम्ये
पि केनैव कर्मणा कश्चिन्मुच्यते कश्चित्तु बध्यत इति वैषम्ये को हेतुरित्यत आह युक्तः ईश्वरायैवैतानि कर्माणि न मम
फलायेत्येव [redacted] मभिप्रायवान्कर्मफलं त्यक्त्वा कर्माणि कुर्वन्शांतिं मोक्षाख्यामा

कायेन मनसा बुद्ध्या केवलैरिंद्रियैरपि योगिनः कर्म कुर्वंति संगं त्यक्त्वात्मशुद्धये ११
युक्तः कर्मफलं त्यक्त्वा शांतिमाप्नोति नैष्ठिकीम् अयुक्तः कामकारेण फले सक्तो निबध्यते १२

प्नोति नैष्ठि[illegible] सत्त्वशुद्धिनित्यानित्यवस्तुविवेकसंन्यासज्ञाननिष्ठाक्रमेण जातामिति यावत् यस्तु पुनरयुक्तः
ईश्वरायैवैतानि कर्माणि न मम फलायेत्यभिप्रायशून्यः सकामः कामकारेण कामतः प्रवृत्त्या मम फलायैवेदं कर्म करोमीति
फले सक्तो निबद्धस्तेन कर्मणा नितरां संसारबंधं प्राप्नोति यस्मादेवं तस्मात्त्वमपि युक्तः सन् कर्माणि कुर्विति वाक्यशे
षः १२ अशुद्धचित्तस्य केवलात्संन्यासात्कर्मयोगः श्रेयानिति पूर्वोक्तं प्रपंच्य अधुना शुद्धचित्तस्य सर्वकर्मसंन्या
स एव श्रेयानित्याह नित्यं नैमित्तिकं काम्यं प्रतिषिद्धं चेति सर्वाणि कर्माणि मनसा सर्वाण्यकर्मयः पश्येदित्युक्तो
श्रीराम॰
१०५

[illegible]नात्र [illegible] स्वरूपसम्यग्दर्शनेन संन्यस्य परित्यज्य प्रारब्धकर्मवशादास्ते तिष्ठत्येव किंतु दुःखेनेत्याह। सुखं
नायासेन [illegible] कायवाङ्मनोव्यापारशून्यत्वात्। कायवाङ्मनांसि स्वच्छंदानि कुर्वन् न व्याप्रियते। तत्राह। व
शी। स्ववश[illegible]करणसंघातः। क्वास्ते। नवद्वारे पुरे द्वे श्रोत्रे द्वे चक्षुषी द्वे नासिके वागेकेति शिरसि सप्त द्वे पा
यूपस्थ[illegible]। नवद्वारविशिष्टे देहे देही देहभिन्नात्मदर्शी प्रवासीव परगेहे तत्पूजापरिवादिभिरप्रहृष्य
न्नविषण्ण[illegible] रहंममकारशून्यस्तिष्ठति। अज्ञो हि देहतादात्म्याभिमानात् देह एव न तु देही। स च देहाधिकरणमे
वात्मीयत्व[illegible]

सर्वकर्माणि मनसा संन्यस्यास्ते सुखं वशी नवद्वारे पुरे देही नैव कुर्वन्न कारयन् १४

वात्मनोधिकरणं मन्यमानो गृहे भूमावासने वाहमास इत्यभिमन्यते। न तु देहे हमास इति भेददर्शनाभावात्।
संघातव्यतिरिक्तात्मदर्शी तु सर्वकर्मसंन्यासी भेददर्शनाद्देहेहमास इति प्रतिपद्यते। अत एव देहादिव्यापारा
णामविद्ययात्मन्यक्रिये समारोपितानां विद्यया बाध एव सर्वकर्मसंन्यास इत्युच्यते। एतस्मादेवाज्ञवैलक्षण्या
दुक्तं विशेषणं। नवद्वारे पुर आस्त इति ननु देहादिव्यापाराणामात्मन्यारोपितानां नो व्यापाराणां तीरस्थवद्
द्रष्टुर्विद्यमानत्वादपि स्वव्यापारेण आत्मनः कर्तृत्वं देहादिव्यापारेषु कारयितृत्वं वा स्यादिति नेत्याह नैव कुर्वन्न
कारयन्न् आस्त इति संबंधः १४

देवदत्तस्य स्वर्गादेव गतिर्यथा स्थितो सत्यां न भवति एवमात्मनोपि कर्तृत्वं कारयितृत्वं च स्वगतमेव सत्संन्यासेनापि न भ
वति। अथवा नभसि तलमलिनतादिवद्दुःखं स्यात्तन्नास्त्येवेति संदेहापोहायाह। लोकस्य देहादेः कर्तृत्वं प्रभुरात्मा
स्वामी न सृजति त्वं कुर्विति नियोगेन तस्य कारयिता न भवतीत्यर्थः। नापि लोकस्य कर्माणीप्सिततमानि घटादीनि स्वयं
सृजति कर्तापि न भवतीत्यर्थः। नापि लोकस्य कर्मकृतवतस्तत्फलसंबंधं सृजति भोजयितापि भोक्तापि न भवतीत्यर्थः।
ससमानः सन्नुभौ लोकावनुसंचरति ध्यायतीव लेलायतीव सधीरित्यादिश्रुतेः। अत्रापि शरीरस्थोपि कौंतेय न करो

न कर्तृत्वं न कर्म्माणि लोकस्य सृजति प्रभुः न कर्मफलसंयोगं स्वभावस्तु प्रवर्तते १५
नादत्ते कस्यचित्पापं न चैव सुकृतं विभुः अज्ञानेनावृतं ज्ञानं तेन मुह्यंति जंतवः १६

नि॰॰उपाधिरित्युक्तेः। यदि किंचिदपि स्वतो न कारयति न करोति वात्मा कस्तर्हि कारयन्कुर्वंश्च प्रवर्तत इति तत्राह। स्वभा
वस्तु अज्ञानात्मिका दैवी माया प्रकृतिः प्रवर्तते १५ नन्वीश्वरः कारयिता जीवः कर्ता। तथा च श्रुतिः। एष ह्येव साधु
कर्म कारयति यमुन्निनीषते एष उ एवासाधु कर्म कारयति तं यमधो निनीषत इत्यादिः। स्मृतिश्च। अज्ञो जंतुरनीशोय
मात्मनः सुखदुःखयोः। ईश्वरप्रेरितो गच्छेत् स्वर्गं वा श्वभ्रमेव वेति। तथा च जीवेश्वरयोः कर्तृत्वकारयितृत्वाभ्यां भो
क्तृत्वभोजयितृत्वाभ्यां च पापपुण्यलेपसंभवात् कथमुक्तं स्वभावस्तु प्रवर्तत इति तत्राह परमार्थतः विभुः परमेश्वरः



त

कस्यचिज्जीवस्य पापं सुकृतं चैव नैवादत्ते परमार्थतो जीवस्य कर्तृत्वाभावात् परमेश्वरस्य च कारयितृत्वाभावात् कथं त
र्हि श्रुतिस्मृती लोकव्यवहारश्च तत्राह। अज्ञानेनावरणविक्षेपशक्तिमता मायाख्येनानृतेन तमसा आवृतमाच्छादितं ज्ञान
जीवेश्वरजगद्भेदभ्रमाधिष्ठानभूतं नित्यं स्वप्रकाशं सच्चिदानंदरूपमद्वितीयं परमार्थसत्यं तेन स्वरूपावरणेन मुह्यंति
प्रमातृप्रमेयप्रमाणकर्तृकर्मकरणभोक्तृभोग्यभोगाख्यनवविधसंसाररूपं मोहमतस्मिंस्तदवभासरूपं विपर्ययं
गच्छंति जंतवो जननशीलाः संसारिणो वस्तुस्वरूपादर्शिनः। अकर्त्रभोक्तृपरमानंदाद्वितीयात्मस्वरूपादर्शननिबं
धनोयं जीवेश्वरजगद्भेदभ्रमः प्रतीयमानो वर्तते मूढानां तस्यां चावस्थायां मूढप्रत्ययानुवादिन्यावेते श्रुतिस्मृती वास्तवा
द्वैतबोधिवाक्यशेषभूते इति न दोषः १६ तर्हि सर्वेषामनाद्यज्ञानावृतत्वात्कथं संसारनिवृत्तिः स्यादत आह तदाव
रणविक्षेपशक्तिमदनाद्यनिर्वाच्यमनृतमनर्थव्रातमूलमज्ञानमात्माश्रयविषयमविद्यामायादिशब्दवाच्यमात्म
नो ज्ञानेन गुरूपदिष्टवेदांतमहावाक्यजन्येन श्रवणमनननिदिध्यासनपरिपाकनिर्मलांतःकरणवृत्तिरूपेण
निर्विकल्पकसाक्षात्कारेण शोधिततत्त्वंपदार्थभेदरूपशुद्धसच्चिदानंदाखंडैकरसवस्तुमात्रविषयेण नाशितं
बाधितं कालत्रयेप्यसदेवासत्तया ज्ञातमधिष्ठानचैतन्यमात्रतां प्रापितं शुक्ताविव रजतं शुक्तिज्ञानेन येषां प्रव

गी॰टी॰५ णामननिदिध्यासनासंपन्नानां भगवदनुगृहीतानां मुमुक्षूणां तेषां तज्ज्ञानं कर्तृ आदित्यवत् यथादित्यः स्वोदय
१०७ मात्रेणैव तमो निरवशेषं निवर्तयति न तु कंचित्सहायमपेक्षते। तथा ब्रह्मज्ञानमपि शुद्धसत्त्वपरि णामत्वा व्यापकप्र
काशरूपं स्वोत्पत्तिमात्रेणैव सहकार्यंतरनिरपेक्षतया सकार्यमज्ञानं निवर्तयत् सत्यज्ञानानंतानंदरूपमेक
मेवाद्वितीयं परमात्मतत्वं प्रकाशयति प्रतिच्छायाग्रहणमात्रेणैव कर्मतामंतरेणाभिव्यनक्ति। अत्राज्ञानेनावृतं ज्ञानेनु
नाशितमित्यज्ञानस्यावरणत्वज्ञाननाश्यत्वाभ्यां ज्ञानाभावरूपत्वं व्यावर्तितं नह्यभावः किंचिदावृणोति न वा ज्ञानाभावो

ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः॥ तेषामादित्यवज्ज्ञानं प्रकाशयति तत्परम् १७

न ज्ञानेन नाश्यते स्वाभावनाशरूपत्वात्तस्य। तस्मादहमज्ञो मामन्यं च न जानामीत्यादिसाक्षिप्रत्यक्षसिद्धं भावरूपमे
वाज्ञानमिति भगवतो मतं विस्तरश्चैतत्सिद्धौ द्रष्टव्यः। येषामिति बहुवचनेनानियमो दर्शितः। तथा च श्रुतिः। तद्यो
योदेवानां प्रत्यबुद्ध्यत स एव तदभवत्तथर्षीणां तथा मनुष्याणां तदिदमप्येतर्हि य एवं वेदाहं ब्रह्मास्मीति स इदं राम॰
सर्वं भवतीत्यादिर्यद्विषयं यदा श्रवणमननादि तद्विषयं तदा प्रमा यां ज्ञानावृत्तिरिति न्यायप्राप्तमनियमं द १०७
र्शयति। तत्राज्ञानगतमावरणं द्विविधं एकं सतोप्यसत्त्वापादकं। अन्यत्तु भातोप्यभानापादकं तत्राद्यं परोक्षापरो

क्षसाधारणं प्रमाणज्ञानमात्रान्निवर्तते अनुमितेपि वह्न्यादौ पर्वते वह्निर्नास्तीत्यादिभ्रमादर्शनात् तथास्त्यनं
मनंतं ब्रह्मेति शाब्दात्परोक्षनिश्चयेपि ब्रह्म नास्तीति भ्रमो निवर्तत एवास्त्येव ब्रह्म किंतु मम न भातीत्येवं भ्र
नकं द्वितीयमभानावरणं साक्षात्कारादेव निवर्तते स च साक्षात्कारो वेदांतवाक्येनैव जन्यते निर्विकल्पकस्त्वाद्यद्वे
ध्येयं १७ ज्ञानेन परमात्मतत्वप्रकाशे सति तस्मिन् ज्ञानप्रकाशिते परमात्मतत्वे सच्चिदानंदघन एव बाह्य
सर्वविषयपरित्यागेन साधनपरिपाकात्सर्वदा निसिता बुद्धिरंतःकरणवृत्तिः साक्षात्कारलक्षणा येषां ते तद्बुद्धयः स

तद्बुद्धयस्तदात्मानस्तन्निष्ठास्तत्परायणाः। गच्छंत्यपुनरावृत्तिं ज्ञाननिर्धूतकल्मषाः
१८
ब्रह्म वैराग्यनिर्वीजसमाधिभाजामित्यर्थः। ननु किं बोद्धारो जीवा बोद्धव्यं ब्रह्मैतत्वमिति बोद्धबोद्धव्यलक्षणभेदोस्ति नेत्याह
तदात्मानः तदेव परं ब्रह्मात्मा येषां ते तथा बोद्धृबोद्धव्यभावो हि मायाविजृंभितो न वास्तवाभेदविरोधीति भावः न
नु तदात्मान इति विशेषणं व्यर्थं अविद्यावर्तकं हि विद्वद्विशेषणं अज्ञा अपि वस्तुगत्या तदात्मान इति कथं त
द्या वृत्तिरिति चेन्नात्मत्वेन ज्ञानवत्तेनोतास्य यत्तिमज्ञा हि अनात्मभूते देहादावात्माभिमानिनः इति न तदात्मा
न इति व्यपदिश्यंते विज्ञास्तु निवृत्तदेहाद्यभिमानादविरोधिनिवृत्त्या तदात्मान इति व्यपदिश्यंते इत्युक्तं वि
ति

गी॰टी॰५ शेषणं। ननु कर्मानुष्ठानविक्षेपे सति कथं देहाद्यभिमाननिवृत्तिरिति तत्राह तन्निष्ठाः तस्मिन्नेव ब्रह्मणि सर्वकर्मानु
१८ ष्ठानविक्षेपनिवृत्त्या स्थितिर्येषां ते तन्निष्ठाः सर्वकर्मसंन्यासेन तदेकविचारपरा इत्यर्थः। फलरागे सति कथं तत्साधनभू
तकर्मत्याग इति तत्राह तत्परायणाः। तदेव परमयनं प्राप्तव्यं येषां ते तत्परायणाः स्वर्गतो विरक्ता इत्यर्थः। अत्र तद्बुद्धय इ
त्यनेन साक्षात्कार उक्तः तदात्मान इत्यनात्माभिमानरूपविपरीतभावनानिवृत्तिफलको निदिध्यासनपरिपाकः तन्नि
ष्ठा इत्यनेन सर्वकर्मसंन्यासपूर्वकः प्रमाणप्रमेयगतासंभावनानिवृत्तिफलको वेदांतविचारः श्रवणमननपरिपाक
रूपः तत्परायणा इत्यनेन वैराग्यप्रकर्ष इत्युत्तरोत्तरस्य पूर्वपूर्वहेतुत्वं द्रष्टव्यं। उक्तविशेषणा यतयो गच्छंत्यपुनरावृ
त्तिं पुनर्देहसंबंधाभावरूपां मुक्तिं प्राप्नुवंति। सकृन्मुक्तानामपि पुनर्देहसंबंधः कुतो न स्यादिति तत्राह ज्ञाननिर्धूत
कल्मषाः ज्ञानेन निर्धूतं समूलमुन्मूलितं पुनर्देहसंबंधकारणं कल्मषं पुण्यपापात्मकं कर्म येषां ते तथा। ज्ञानेना
[illegible]ज्ञानाद्युन्मूलिते कार्यकर्मरूपे तन्मूलकं पुनर्देहग्रहणं कथं भवेदिति भावः १८ देहपातादूर्ध्वं विदे
हकैवल्यरूपं ज्ञानफलमुक्त्वा प्रारब्धकर्मवशात्सत्यपि देहे जीवन्मुक्तिरूपं तत्फलमाह विद्याविनयसंपन्ने राम॰
[illegible]ब्राविनयो निरहंकारत्वमनौद्धत्यमिति यावत्। ताभ्यां संपन्ने ब्राह्मणे विदिविनीते च ब्राह्मणे सात्त्विके सर्वोत्त १८
[illegible]बुद्धः मध्यसंस्कारहीने च राजस्यां गवि मध्यमायां तथा हस्तिनि शुनि श्वपाके चात्यंततामसे सर्वाधमे च। सर्वा[illegible]
विद्याविनयसंपन्ने ब्राह्मणे गवि हस्तिनि शुनि चैव श्वपाके च पंडिताः समदर्शिनः

[illegible] एकमेव समं ब्रह्म द्रष्टुं शीलं येषां ते समदर्शिनः पंडिता ज्ञानिनः। यथा गंगातोये तडागे सुरायां मूत्रे
[illegible] तत्कृतगुणदोषसंबंधस्तथा [illegible] प्रतिबिंबाभासद्वारा प्रतिबिंबितस्य सोपाधिगतगुणदोषसंबं
[illegible] रागद्वेषरहितत्वेनात्मानंदस्फूर्त्या जीवन्मुक्तिमनुभवंतीत्यर्थः १८ ननु सात्त्विकराजस
[illegible] भावविषमेषु प्राणिषु समत्वदर्शनं धर्मशास्त्रनिषिद्धं [illegible] तस्यान्नमभोज्यमित्युपक्रम्य गौतमः स्मरति
[illegible] पूजातः इति समासमाभ्यामिति वस्तुथी हि विवक्तं [illegible] समसम इति द्वैकवद्भावेन समसमेक वर्ण
विद्याविनयसंपन्ने ब्राह्मणे गवि हस्तिनि शुनि चैव श्वपाके च पंडिताः समदर्शिनः १९
इहैव तैर्जितः सर्गो येषां साम्ये स्थितं मनः निर्दोषं हि समं ब्रह्म तस्माद्ब्रह्मणि ते स्थिताः २०
[illegible] सदाचाराणां यादृशो वस्त्रालंकारान्नादिदानपुरस्सरपूजाविशेषः क्रियते तत्समायैवाल्प
[illegible] चतुर्वेदपारगसदाचाराय विषमे तदपेक्षया न्यूनपूजाप्रकारे कृते तथाल्पवेदानां हीनाचाराणां यादृशो हीनसाध
[illegible] पूजाप्रकारः क्रियते तादृशायैवासमाय पूर्वोक्तवेदपारगसदाचारब्राह्मणायापि क्रियते यादृशीनायतादृशहीनपूजाधिके
[illegible] पूजाप्रकारे कृते उत्तमस्य हीनतया हीनस्योत्तमतया पूजा [illegible] पूजयितुरन्नमभोज्यं भवतीत्यर्थः
[illegible] नियतिमशोभमकुर्वन् धनाद्धर्माच्च हीयते इति च दोषांतरं [illegible] निष्पादिहारणापाक[illegible]

गी॰टी॰५
१०६

भावाद्यामोऽस्यात्र त्वं च धनहीनत्वं च स्वत एव विद्यते तथापि धर्मग्लानिर्दोषो भवत्येव अभोज्यान्नत्वं चाशुचित्वेन पापोत्पत्त्युपलक्ष
णं तपोधनानां तप एव धनमिति न तद्धानिर्न दूषणं भवत्येवेति कथं समदर्शिनः पंडिता जीवन्मुक्ता इति प्राप्ते परिहरति इहै
व समदर्शिभिः पंडितैरिहैव जीवनदशायामेव जितोऽतिक्रांतः सर्गः सृज्यत इति व्युत्पत्त्या द्वैतप्रपंचः । देहपातादूर्ध्वमतिक्र
मितव्य इति किमु वक्तव्यं कैः येषां साम्ये सर्वभूतेषु विषमेष्वपि वर्तमानस्य ब्रह्मणः समभावे स्थितं निश्चलं मनः हि यस्मान्नि
र्दोषं समं सर्वविकारशून्यं कूटस्थं नित्यमेकं च ब्रह्म । तस्मात्ते समदर्शिनो ब्रह्मण्येव स्थिताः अयं भावः दुष्टत्वं हि द्वेधा भवति ।
अदुष्टस्यापि दुष्टसंबंधाद्वा यथा गंगोदकस्य मूत्रगर्तपातात् स्वत एव वा यथा मूत्रादेः तत्र दोषवत्सु श्वपाकादिषु स्थितं
तद्दोषैर्दुष्यति ब्रह्मेति मूढैर्विभाव्यमानमपि सर्वदोषासंस्पृष्टमेव ब्रह्म व्योमवदसंगत्वात् असंगो ह्ययं पुरुषः । सूर्यो य
था सर्वलोकस्य चक्षुर्न लिप्यते चाक्षुषैर्बाह्यदोषैः । एकस्तथा सर्वभूतांतरात्मा न लिप्यते लोकदुःखेन बाह्य इति
श्रुतेः । नापि कामादिधर्मवत्तया स्वत एव कलुषितं कामादेरंतःकरणधर्मत्वस्य श्रुतिस्मृतिसिद्धत्वात् । तस्मान्निर्दोषब्र
ह्मरूपा यतयो जीवन्मुक्ता अभोज्यान्नत्वादिदोषदुष्टा इति व्याहृतं प्रकृतिस्वविरुद्धं गृहस्थविषयत्वात्तस्या अभोज्यमिति
पक्रमात् पूजात इति मध्ये निर्देशात् धनाद्धर्मो हि हीयत इत्युपसंहाराच्चेति द्रष्टव्यम् १९ यस्मान्निर्दोषं समं ब्रह्म तस्मा १०२
त्तद्रूपमात्मानं साक्षात्कुर्वन् दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृह इत्यत्र व्याख्यातं पूर्वार्द्धं जीवन्मुक्तानां स्वाभाविकं व
र्तमानं मुमुक्षुभिः प्रयत्नपूर्वकमनुष्ठेयमिति वक्तुं लिङ्प्रत्ययौ । अद्वितीयात्मदर्शनशीलस्य यतिरिक्तं प्रियाप्रिय
प

प्राप्ययोगात्मनि निमित्तो हर्षविषादावित्यर्थः । अद्वितीयात्मदर्शनमेवाविष्करोति स्थिरबुद्धिः स्थिरा निश्चला संन्यासपूर्वकवेदां
तवाक्यविचारपरिपाकेन सर्वसंशयशून्यत्वेन निर्विचिकित्सा निश्चिता ब्रह्मणि बुद्धिर्यस्य स तथा अनेन श्रवणमननफलमुक्तमिति या
वत् । एतादृशस्य सर्वासंभावनाशून्यस्यापि विपरीतभावनाप्रतिबंधात् साक्षात्कारो नोदेतीति निदिध्यासनमाह असंमूढः
निदिध्यासनस्य विजातीयप्रत्ययानंतरितसजातीयप्रत्ययप्रवाहस्य परिपाकेन विपरीतभावनाख्यसंमोहरहितः ततः
सर्वप्रतिबंधापगमात् ब्रह्मवित् ब्रह्मसाक्षात्कारवान् ततश्च समाधिपरिपाकेन निर्दोषे समे ब्रह्मण्येव स्थितो नान्यत्रेति ब्र

न प्रहृष्येत्प्रियं प्राप्य नोद्विजेत्प्राप्य चाप्रियं स्थिरबुद्धिरसंमूढो ब्रह्मविद्ब्रह्मणि स्थितः २०
बाह्यस्पर्शेष्वसक्तात्मा विंदत्यात्मनि यत्सुखं स ब्रह्मयोगयुक्तात्मा सुखमक्षयमश्नुते २१

ह्मणि स्थितो जीवन्मुक्तः स्थितप्रज्ञ इत्यर्थः एतादृशस्य द्वैतदर्शनाभावात् प्रहर्षोद्वेगौ न भवत इत्युचितमेव साधकेन तु
द्वैतदर्शने विद्यमानेऽपि विषयदोषदर्शनादिना प्रहर्षविषादौ त्याज्यावित्यभिप्रायः २० ननु बाह्यविषयप्रीतेरनेकज
न्मानुभूतत्वेनातिप्रबलत्वात्तदासक्तचित्तस्य कथमलौकिके ब्रह्मणि दृष्टसर्वसुखरहिते स्थितिः स्यात् परमानंदरूपत्वा
दिति चेत्तन्न । तदानंदस्यानुभूतचरत्वेन चित्तस्थितिहेतुत्वाभावात् तदुक्तं वार्तिके अप्यानंदः श्रुतः साक्षा
न्मानोनाविषयीकृतः । दृष्टानंदाभिलाषं स न मंदीकर्तुमप्यलमिति तत्राह इंद्रियैः स्पृश्यंत इति स्पर्शाः शब्दादयः
तेषु बाह्या अनात्मधर्मत्वात् तेष्वसक्तात्मा अनासक्तचित्तः तृष्णाशून्यतया विरक्तः सन् आत्मनि अंतःकरण

गी·टी·५ एवबाह्यविषयनिरपेक्षं यदुपशमात्मकं सुखं तद्विंदति लभते निर्मलसत्वस्था तदुक्तं महाभारते यच्च कामसुखं लोके
११० यच्चदिव्यंमहत्सुखं तृष्णाक्षयसुखस्यैते नार्हतः षोडशीं कलामिति। अथवा प्रत्यगात्मनि त्वंपदार्थे यत्सुखं स्वरूपभूतं सु
सुषुप्तावनुभूयमानं बाह्यविषयासक्तिप्रतिबंधादलभ्यमानं तदेव तदभावाल्लभते। न केवलं त्वंपदार्थे सुखमेव लभते किं
तु तत्पदार्थैक्यानुभवेन पूर्णसुखमपीत्याह। स च ब्रह्मणि परमात्मनि योगः समाधिस्तेन युक्तस्तस्मिन्नैक्या
एत आत्मांतःकरणं यस्य स ब्रह्मयोगयुक्तात्मा अथवा ब्रह्मणि तत्पदार्थे योगेन वाक्यार्थानुभवरूपेण समाधिना युक्त
एकीकृत आत्मा त्वंपदार्थस्वरूपं यस्य स तथा। सुखमक्षयमनंतं स्वस्वरूपभूतमश्नुते व्याप्नोति सुखानुभवरूप
एव सर्वदा भवतीत्यर्थः। नित्येपि वस्तुन्यविद्यानिवृत्त्यभिप्रायेण धात्वर्थयोग औपचारिकः। तस्मादात्मन्यक्षयसु
खानुभवार्थी सन् बाह्यविषयप्रीतेः। रूपिकाया महानरकानुबंधिन्याः सकाशादिंद्रियाणि निवर्तयेत्। ताव
तैव च ब्रह्मणि स्थितिर्भवतीत्यभिप्रायः २१ ननु बाह्यविषयप्रीतिनिवृत्तावात्मन्यक्षयसुखानुभवस्तस्मिंश्च सति
तत्प्रसादेव बाह्यविषयप्रीतिनिवृत्तिरितीतरेतराश्रयवशान्नैकमपि सिध्येदित्याशंक्य विषयदोषदर्शनाभ्यासे राम·
ब नैव तत्प्रीतिनिवृत्तिर्भवतीति परिहारमाह ये हि यस्मात् ये संस्पर्शजा विषयेंद्रियसंबंधजा भोगाः क्षुद्रसुखलवानुभ ११०
वाः इह वा परत्र वा रागद्वेषादिव्याप्तत्वेन दुःखयोनय एव ते। ते सर्वेपि ब्रह्मलोकपर्यंतं दुःखहेतव एव तदुक्तं विष्णुपु
राणे यावंतः कुरुते जंतुः संबंधान्मनसः प्रियान्। तावंतोस्य निखन्यंते हृदये शोकशंकवः इति। एतादृशा अपिन

॥ ये हि संस्पर्शजा भोगा दुःखयोनय एव ते। आद्यंतवंतः कौंतेय न तेषु रमते बुधः॥२२॥

स्थिरा किंतु आद्यंतवंतः आदिर्विषयेंद्रियसंयोगोंतश्च तद्वियोग एव तौ विद्येते येषां ते पूर्वापरयोरसत्वान्मध्ये क्षणभवदावि
र्भूताः कल्पिता मिथ्याभूताः। तदुक्तं गौडपादाचार्यैः। आदावंते च यन्नास्ति वर्तमानेपि तत्तथेति। यस्मादेवं तस्मात्तेषु बु
धो विवेकी न रमते। प्रतिकूलं नीय वात्र प्रीतिमनुभवति। तदुक्तं भगवता पतंजलिना परिणामतापसंस्कारदुःखैर्गुणवृ
त्तिविरोधाच्च दुःखमेव सर्वं विवेकिन इति। सर्वमपि विषयसुखं दुःखमप्राप्तविवेकं च दुःखमेव प्रतिकूलवेदनीयत्वात् द
विवेकिनः परिज्ञातक्लेशादिस्वरूपस्यैव न त्वविवेकिनः अक्लिष्टो न कोपीति विद्वानस्य दुःखलेशेनाप्युद्विजते। कथं
यथोर्णातंतुरतिसुकुमारोप्यक्षिपात्रे न्यस्तः स्पर्शेन दुःखयति नेतरेषु गात्रेषु तद्वद्विवेकिन एव मधुविषसंपृक्तान्नभोजन
वत्सर्वमपि भोगसाधनं [illegible] क्लेशानुविद्धत्वात् दुःखेन मूढस्य बहुविधदुःखसहिष्णोरित्यर्थः। तत्र परिणाम
तापसंस्कारदुःखैरिति [illegible] वर्तमानभविष्यत्कालेपि दुःखानुविद्धत्वादेतौ पाधिकं दुःखत्वं विषयसुखस्योक्तं। गुणवृ
त्तिविरोधाच्चेत्यनेन स्वरूपतोपि दुःखत्वं तत्र परिणामश्च तापश्च संस्कारश्च तैः दुःखैः स्वाभिरित्यर्थः। इत्थंभू
तत्रक्षणेतरीया तथाहि रागानुविद्ध एव सर्वोपि सुखानुभवः न हि तत्र न रज्यति तेन सुखी चेति संभवति। [illegible]
एवं च पूर्वं सुद्रूतः स विषयप्राप्त्या सुखरूपेण परिणमते तस्य च प्रतिकूलं द्वेष्टि [illegible] विषयाप्राप्तिनिबंधनदुः
खस्यापरिहार्यत्वात् दुःखरूपत्वेव। या हि भोगेष्विंद्रियाणामुपशांतिः परितृप्तत्वात् तत्सुखं यालोत्यादनुपशांतिः [illegible]

गी॰टी॰५ दुःखे न चेंद्रियाणां भोगाभ्यासेन वैतृष्ण्यं कर्तुं शक्यं यतो भोगाभ्यासमनु विवर्द्धंते रागाः कौशलानि चेंद्रियाणामिति
१११ च न जातु कामः इत्यादि। तस्माद्दुःखात्मकरागपरिणामत्वाद्विषयसुखमपि दुःखमेव कार्यकारणयोरभेदादिति प
रिणामदुःखत्वं। तथा सुखानुभवकाले तत्प्रतिकूलानि दुःखसाधनानि द्वेष्टि नानुपहत्य भूतान्युपभोगः संभवतीति भू
तानि च हिनस्ति द्वेष्टि च सर्वाणि दुःखसाधनानि मे मा भूवन्निति संकल्पविशेषः न च तानि सर्वाणि कश्चिदपि परिहर्तुं
शक्नोति। अतः सुखानुभवकालेपि तत्परिपंथिनं प्रति द्वेषस्य सर्वदैवावस्थितत्वात्तापदुःखं दुःपरिहरमेव। तापो हि द्वेषः
एवं च दुःखसाधनानि परिहर्तुमशक्नो मुह्यतीति चेति मोहदुःखतापि व्याख्येया। तथा चोक्तं योगभाष्यकारैः। सर्व
स्य द्वेषानुविद्धश्चेतनाचेतनसाधनाधीनस्तापानुभव इति तत्रास्ति द्वेषजः कर्माशयः सुखसाधनानि च प्रार्थयमानः
कायेन वाचा मनसा च परिस्पंदते ततः परमनुगृह्णात्युपहंति चेति परानुग्रहपीडाभ्यां धर्माधर्मावुपचिनोति स कर्माशयो
लोभान्मोहाच्च भवतीत्येषा तापदुःखतोच्यते। तथा वर्तमानः सुखानुभवः स्वविनाशकाले संस्कारमाधत्ते स च सु राम॰
खस्मरणं तत्र रागं स च मनःकायवचनचेष्टां सा च पुण्यापुण्यकर्माशयौ तौ च जन्मादीनि संस्कारदुःखता। एवं तापमो
हयोरपि संस्कारो व्याख्येयो। एवं कालत्रयेपि दुःखानुबंधाद्विषयसुखं दुःखमेवेत्युक्त्वा स्वरूपतो दुःखतामाह गुण १११
वृत्तिविरोधाच्च गुणाः सत्वरजस्तमांसि सुखदुःखमोहात्मकाः परस्परविरुद्धस्वभावा अपि तैलवर्त्यग्निवद्दी

पंपुरुषभोगप्रयुक्तत्वेन त्र्यात्मकमेकं कार्यमारभंते तेन चैकस्य प्राधान्ये इतरयोर्गुणभावात्प्रधानमात्रव्यपदेशेन सात्विकं राजसं
तामसमिति त्रिगुणात्मकमपि कार्यमेकेन गुणेन व्यपदिश्यते तेन च सुखोपभोगरूपोपि प्रत्यय उद्भूतसत्वकार्यत्वेप्यनुद्भूतरजः
स्तमःकार्यत्वात्त्रिगुणात्मक एव। तथा च सुखात्मकत्ववद्दुःखात्मकत्वं विषादात्मकत्वं च तस्य ध्रुवमिति दुःखमेव सर्वं वि
वेकिनः। न चैतादृशोपि प्रत्ययः स्थिरः यस्माच्चलं च गुणवृत्तमिति क्षिप्रपरिणामित्वमुक्तं। नन्वेकः प्रत्ययः कथं परस्प न
रविरुद्धसुखदुःखमोहात्मको नैकदापि प्रतिपद्यत इति चेत् उद्भूतानुद्भूतयोर्विरोधाभावात् समप्रधानानामेव हि गुणानां
युगपदुद्भूतानां विषमवृत्तिकानां। यथा धर्मज्ञानवैराग्यैश्वर्याणि [illegible] वृत्तिकानि लब्धवृत्तिकैरेवाध
र्माज्ञानावैराग्यानैश्वर्यैः सह विरुध्यंते न तु स्वरूपसंतः प्रधानस्य प्रधानेन सह विरोधो न तु दुर्बलेनेति हि न्यायः तद्वत् स
त्वरजस्तमसां स्वापि परस्परं प्राधान्यमात्रं युगपन्न सह तेन तु सत्वमपि एतेन परिणामतापसंस्कार दुःखेष्वपि राग
द्वेषमोहानां युगपत्सद्भावो व्याख्यातः। प्रसुप्ततनुविछिन्नोदाररूपेण क्लेशानां चतुरवस्थावत्वात्। तथा हि। अविद्याऽस्मि
तारागद्वेषाभिनिवेशाः पंच क्लेशाः। अविद्याक्षेत्रमुत्तरेषां प्रसुप्ततनुविच्छिन्नोदाराणां। अनित्याशुचिदुःखानात्मसु
नित्यशुचिसुखात्मख्यातिरविद्या। दृग्दर्शनशक्त्योरेकात्मतेवास्मिता। सुखानुशयी रागः दुःखानुशयी द्वेषः। स्वरस
वाही विदुषोपि तथारूढोऽभिनिवेशः। ते प्रतिप्रसवहेयाः सूक्ष्माः। ध्यानहेयास्तद्वृत्तयः। क्लेशमूलः कर्माशयो दृष्टादृष्ट

अन्यवेदनीयः।सतिमूलेतद्विपाकोजात्यायुर्भोगाइतिपातंजलानिसूत्राणि ९१ तत्रातस्मिंस्तद्बुद्धिर्विपर्ययोमिथ्याज्ञा
नमविद्येतिपर्यायाः।तस्याविशेषाः संसारनिदानं।तत्रानित्येनित्यबुद्धिर्यथाध्रुवापृथिवीध्रुवासचंद्रतारकाद्यौरमृता
दिवौकसइति।अशुचौपरमबीभत्सेकायेशुचिबुद्धिर्यथानवेवशशांककलेवाकमनीयेयंकन्यामध्वमृतावयवनिर्मिते
वचंद्रंभित्वानिःसृतेवज्ञायतेनीलोत्पलपत्रायताक्षीहावगर्भाभ्यांलोचनाभ्यांजीवलोकमाश्वासयंतीवेतिकस्यकेन
संबंधः।स्थानाद्बीजादुपष्टंभान्निष्यंदान्निधनादपि।कायमाधेयशौचत्वात्पंडिताह्यशुचिंविदु[illegible]चवेत्यस[illegible]कः। रिति
इतेनापुण्येपुण्यप्रत्ययोनर्थेचार्थप्रत्ययोव्याख्यातः।दुःखेसुखख्यातिरुदाहृता।परिणामतापसंस्कारदुःखैर्गुणवृ
त्तिविरोधाच्चदुःखमेवसर्वंविवेकिनइति।अनात्मन्यात्मख्यातिर्यथाशरीरेमनुष्योहमित्यादिः।सेयंचाविद्यासर्व
क्लेशमूलभूतातमइत्युच्यते।दृग्दर्शनशक्त्योरभेदाभिमानोस्मितामोहः।साधनरहितस्यापिसर्वसुखजातीयंमेभू
यादितिविपर्ययविशेषोरागः।सएवमहामोहः।दुःखसाधनेविद्यमानेपिकिमपिदुःखंमेमाभूदितिविपर्ययविशेषो
द्वेषःसतामिस्रः।आयुरभावेप्येतैःशरीरेंद्रियादिभिरविरहितोहंतैरपिवियोगोमेमाभूदित्याविद्वदंगनाबालंस्वाभाविकःसर्व ११२
प्राणिसाधारणोमरणत्रासरूपोविपर्ययविशेषोभिनिवेशः।सोंधतामिस्रः।तदुक्तंपुराणेतमोमोहोमहामोहस्तामि
स्रोह्यंधसंज्ञितः।अविद्यापंचपर्वैषाप्रादुर्भूतामहात्मनइति।एतेचक्लेशाश्चतुरवस्थाभवंति।तत्रासतोनुत्पत्तेर

नभि[illegible]क्लेशानामवस्थानंसुप्तावस्था।अभिव्यक्तस्यापिसहकार्यलाभात्कार्याजननंतन्ववस्था।अभिव्यक्तस्यजनित
कार्यस्यापि[illegible]विद्दलवताभिभवोविच्छेदावस्था।अभिव्यक्तस्यप्राप्तसहकारिसंपत्तेरप्रतिबंधेनस्वकार्यकारित्वमुदा
रावस्था।एवमेतादृगवस्थाचतुष्टयविशिष्टानामस्मितादीनांचतुर्णांविपर्ययरूपाणांक्लेशानामविद्यैवसामान्य
[illegible]क्षेत्रंप्रसवभूमिः सर्वेषामपिविपर्ययरूपत्वस्यदर्शितत्वात्।तेनअविद्यानिवृत्त्यैवक्लेशानां[illegible]रित्यर्थः।
[illegible]क्लेशाःप्रसुप्तायथाप्रकृतिलीनानांतनवःप्रतिपक्षभावनयातनूकृतायोगिनांतउभयेपिसूक्ष्माःप्रतिप्रस
वेनमनोनिरोधेनैवनिवृत्तेरसमाधिनांहेयाः।येतुस्थूलास्तवलयःस्तकार्यभूता[illegible]स्थूलाविच्छि[illegible]दाराश्चिच्छिद्यवि
च्छि[illegible]नतेनात्मनापुनःप्रादुर्भवतीतिविच्छिन्नाः।यथारागकालेक्रोधोविद्यमानोपि[illegible]प्रादुर्भूतइतिविच्छि[illegible]च्यते
[illegible]वमेकस्यांस्त्रियांचैत्रोरक्तइतिनान्यासुविरक्तः।किंत्वेकस्यां[illegible]सलद
ये विच्छिन्नउच्यतेयदाविषयेषुलब्धवृत्तयस्तेतदासर्वात्मनाप्रादुर्भूताउद[illegible]नेतउभयेपिस्थूलत्वाद्दुःख[illegible]वम
येनभगवद्ध्यानेनहेयानमनोनिरोधमपेक्षंतेनिरोधहेयास्तु[illegible]ज्ञाएव[illegible]तथाचपरिणामतापसं
स्कारदुःखैर्गुण[illegible]नुलिंगिरूपेणसर्वेक्लेशाःसर्वदासंतिउदारतातुकदाचित्स्यादितिविशेषः।एतेच

गी॰टी॰५ बाधनालक्षणं दुःखमुपजनयंतः क्लेशशब्दवाच्या भवंति यतः कर्माशयो धर्माधर्माख्यः क्लेशमूलकस्तथा सति च मूलभू
११२ ते क्लेशे सति तस्य कर्माशयस्य विपाकः फलं जन्मायुर्भोगश्चेति स च कर्माशय इह परत्र च स्वविपाकारंभकत्वेन दृष्टादृष्टजन्मवेद
नीयः एवं क्लेशसंततिर्घटीयंत्रवदनिशमावर्तते। अतः समीचीनमुक्तं ये हि संस्पर्शजा भोगा दुःखयोनय एव ते। आद्यं
तवंत इति। दुःखयोनित्वं परिणामादिभिर्गुणवृत्तिविरोधाच्च आद्यंतवत्त्वं गुणवृत्तस्य चलत्वादिति। योगमते व्याख्या।
औपनिषदानां तु अनादिभावरूपमज्ञानमविद्या अहंकारधर्माध्यासोऽस्मिता रागद्वेषाभिनिवेशास्तु वृत्तिविशेषा
इत्यविद्यामूलत्वात्सर्वेप्यविद्यात्मकत्वेन मिथ्याभूता रज्जुभुजंगाध्यासवन्मिथ्यात्वेपि दुःखयोनयः स्वप्नादिवद्दृष्टिसृष्टि
मात्रत्वेनाद्यंतवंतश्चेति बुधोऽधिष्ठानसाक्षात्कारेण निवृत्तभ्रमस्तेषु न रमते मृगतृष्णिकास्वरूपज्ञानवानिव तत्रोदका
म र्थी न प्रवर्तते। न संसारे सुखस्य गंधमात्रमप्यस्तीति बुध्वा ततः सर्वाणींद्रियाणि निवर्तयेदित्यर्थः। २३ सर्वानर्थप्रा
प्तिहेतुर्दुर्निवारोयं श्रेयोमार्गप्रतिपक्षः कष्टतमो दोषो महता यत्नेन मुमुक्षुणा निवारणीय इति यत्नाधिक्यविधानाय राम॰
रा॰क्री॰टी॰प॰ पुनराह। आत्मनोनुकूलेषु सुखहेतुषु दृश्यमानेषु श्रूयमाणेषु स्मर्यमाणेषु वा तद्गुणानुसंधानाभ्यासेन यो रत्यात्म
को गर्धोऽभिलाषस्तृष्णा लोभः स कामः स्त्रीपुंसयोः परस्परव्यतिकराभिलाषे त्वत्यंतनिरूढः कामशब्दः स्तदभिप्रा ११२
येण कामः क्रोधस्तथा लोभ इत्यत्र पृथक् लोभः स्त्रीव्यतिकरतृष्णा काम इति कामलोभौ पृथगुक्तौ। इह तु तृष्णा

सामान्याभिप्रायेण कामशब्दः प्रयुक्त इति लोभः पृथङ् नोक्तः। एवमात्मनः प्रतिकूलेषु दुःखहेतुषु दृश्यमाणेषु श्रूय
माणेषु स्मर्यमाणेषु वा तद्दोषानुसंधानाभ्यासेन यः प्रज्वलनात्मको द्वेषो मन्युः स क्रोधः। तयोरुक्तरूपयोरवस्था लोक
वेदविरोधप्रतिसंधानप्रतिबंधकतया प्रवृत्त्युन्मुखत्वरूपा नदीवेगसाम्येन वेग इत्युच्यते। यथाहि नद्या वेगो वर्षा
स्वतिप्रबलतया लोकवेदविरोधप्रतिसंधानेनानिच्छंतमपि पातयित्वा अयति बाधो नयति च तद्वत् कामक्रोध
योरपि वेगो विषयाभिध्यानाभ्यासेन वर्षाकालस्थानीयेनातिप्रबलो लोकवेदविरोधप्रतिसंधानेनानिच्छंतमपि वि

शक्नोतीहैव यः सोढुं प्राक्शरीरविमोक्षणात्। कामक्रोधोद्भवं वेगं स युक्तः स सुखी नरः॥ २४

षयगर्ते पातयित्वा संसारसमुद्रे मज्जयति बाधो महानरकाख्यतीति चेति वेगपदप्रयोगेण सूचितं। एतच्चार्थके
प्रभुक्तो प्रमित्युक्तविशेषतां नेतादृशं कामक्रोधोद्भवं वेगमंतःकरणक्षोभरूपं स्तंभस्वेदादिहानिकवाह्यविकारलिं त्वे
गं आशरीरविमोक्षणात् शरीरविमोक्षणपर्यंतमनेकनिमित्तवशात्सर्वदा संभाव्यमानत्वेनाविश्रंभणीयमंत
रुत्पन्नमात्रं इहैव हि इंद्रियव्यापारकृपाकृतिपतनात् प्राग्वेगनायतिधैर्येण क्षितिमितिल इव नदीवेगं विषयदोषदर्श
नाभ्यासजेन वशीकारसंज्ञकेन वैराग्येण सोढुं तदनुरूपकार्यासंपादनेनानर्थकं कर्तुं शक्नोति समर्थो भवति स एव

भय

गी·टी·५ युक्तोयोगी स एव सुखी स एव नरः पुमान् पुरुषार्थसंपादनात्। तदितरस्त्वाहारनिद्राभैथुनादिपशुधर्ममात्रवत्त्वेन मनुष्याकारः पशुरेवेति भावः॥ आशरीरविमोक्षणादित्यत्रान्यथाव्याख्यानं। यथा मरणादूर्ध्वं विलपंतीभिर्युव[illegible]ति[illegible]भिः
११४ कारः पशुरेवेति भावः॥
पितृपुत्रादिभिर्दह्यमानोपि प्राणशून्यत्वात् कामक्रोधवेगं सहते। तथा मरणात्प्रागपि जीवन्नेव [illegible] सुकृद्यादि।
अत्यादिमरणवज्जीवनेपि कामक्रोधानुत्पत्तिमात्रं कुर्यात्। तद्वेत घृत्वेत। यथोक्तं वसिष्ठेन। [illegible] देहसुखं दुःखं न विंदति। तथा वैराग्ययुक्तोपि स केवलात्मा श्रमेव सेदिति। इह तु उत्पन्नयोः कामक्रोधयोः वेगसह[illegible]
योरनुत्पत्तिमात्रं न दृष्टांतदार्ष्टांतिकमिति निर्बं[illegible]धेन। २४ योंतः[illegible]सुखोंतरारामस्तथांतर्ज्योतिरेव यः।
स योगी[illegible]ब्रह्मनिर्वाणं ब्रह्मभूतोधिगच्छति २५

कामक्रोधवे[redacted]गसहनमात्रेणैव मुच्यत इति न किंतु अंतःबाह्य[illegible]निरपेक्षमेव स्वरूपभूतं सुखं यस्य सोंतः राम·
सुखो बाह्यवि[illegible]यजनितसुखशून्य इत्यर्थः। कुतो बाह्यसुखाभाव इत्यत [illegible] आत्मन्येव न तु स्त्र्यादिविषये बाह्यसु
खसाधने आराम आरमणं क्रीडा यस्य सोंतरारामस्त्यक्तसर्वपरिग्रह इत्येतत्[illegible]साधनशून्य इत्यर्थः। ननु त्यक्तस ११४
र्वपरिग्रहस्यापि यतेर्यदृच्छोपनतैः कोकिलादिमधुरशब्दश्रवणमंदपवन[illegible]स्पर्शचंद्रोदयमयूरनृत्यादिदर्शनाति
मधुरशीत[illegible]गोदकपानकेतकीकुसुमसौरभाद्यव[illegible]दिभिरग्रा[illegible]सुखोत्पत्तिसंभवात्कथं बाह्यसुखत

न्०

त्साधनशून्यत्वमिति तत्राह। तथांतर्ज्योतिरेव यः यथा तरेव सुखं न बाह्यैर्विषयैस्तथांतरेवात्मनि ज्योतिर्विज्ञानं न बाह्यैरिं
द्रियैर्यस्य सोंतर्ज्योतिः श्रोत्रादिजन्यशब्दादिविषयविज्ञानरहितः। एवकारो विशेषणत्रयेपि संबध्यते। समाधिकाले[illegible]प्रतिभासाभावात्। व्युत्थानकालेतत्प्रतिभासेपि मिथ्यात्वनिश्चयान्न बाह्यविषयैस्तस्य सुखोत्पत्तिसंभव
इत्यर्थः। य[illegible]यच्छब्दोक्तविशेषणसंबंधः स योगी समाहितः ब्रह्मनिर्वाणं ब्रह्म[redacted]परमानंदरूपं कल्पितद्वैतोपशमरूपं नित्यप्राप्तमेव प्राप्नोति
[illegible]तेन निर्वाणं तदव[illegible]कल्पिताभावस्याधिष्ठानात्मकत्वात्। अविद्यावरणनिवृत्त्याधिगच्छति नित्यप्राप्तमेव प्राप्नोति
यतः सर्वदेव ब्रह्मभूतोन्यः। ब्रह्मैव सन् ब्रह्माप्येतीति श्रुतेः। अवस्थितेरितिकाशकृत्स्न इति न्यायाच्च २५ मुक्ति
लभंते ब्रह्मनिर्वाणमृषयः क्षीणकल्मषाः। छिन्नद्वैधा यतात्मानः सर्वभूतहिते रताः। २६

लभंते ब्रह्मनिर्वाणमृषयः क्षीणकल्मषाः। छिन्नद्वैधा यतात्मानः सर्वभूतहिते रताः। सम्यग्दर्शनवक्तृ
हेतोर्ज्ञानस्य साधनांतराणि विवृण्वन्नाह प्रथमं यज्ञादिभिः क्षीणकल्मषाः ततोंतःकरणशुद्ध्या ऋषयः सूक्ष्मवस्तु
विवेचनसमर्थाः संन्यासिनः ततः श्रवणादिपरिपाकेण छिन्नद्वैधाः निवृत्तसर्वसंशयाः ततो निदिध्यासनपरिपा
केन संयतात्मानः परमात्मन्येवैकाग्रचित्ताः एतादृशाश्चाद्वैतदर्शित्वेन सर्वभूतहिते रताः हिंसाशून्या ब्रह्मविदो
ब्रह्मनिर्वाणं लभंते। यस्मिन् सर्वाणि भूतान्यात्मैवाभूद्विजानतः। तत्र को मोहः कः शोक एकत्वमनुपश्यत इति श्रुतेः। बहुवचनं तु योयो देवानामित्यादिश्रुत्युक्तानियमप्रदर्शनार्थम्। २६ श्रीकृष्णः राम·

गी॰टी॰५ पूर्वं कामक्रोधयोः तत्संयोगे दोषः । मोक्षं इत्युक्तमधुनातु तयोः त्यक्तिः प्राप्ति बंधएव कर्तव्य इत्याह । कामक्रोधयोर्वियोगः अस्त
१२५ दनुत्पत्तिरेव तद्युक्तानां कामक्रोधवियुक्तानां अतएव यतचेतसां संयमितचित्तानां यतीनां यत्नशीलानां संन्यासिनां विदितात्
मनां साक्षात्कृतपरमात्मनां अभितउभयतो जीवतां मृतानां च तेषां ब्रह्मनिर्वाणं मोक्षो वर्तते नित्यत्वात् नतु भविष्यति साध्यत्वा
भावात् । २६ ईश्वरार्पितसर्वभावस्य कर्मयोगेनांतःकरणशुद्धिस्ततः सर्वकर्मसंन्यासस्ततः श्रवणादिपरस्य तत्त्वज्ञा
नं मोक्षसाधनमुक्तं अधुना योगी ब्रह्मनिर्वाणमित्यत्र सूचितं ध्यानयोगं सम्यग्दर्शनस्यांतरंगसाधनं विस्तरेण वक्तु
कामक्रोधवियुक्तानां यतीनां यतचेतसां अभितो ब्रह्मनिर्वाणं वर्तते विदितात्मनां २६
स्पर्शान्कृत्वा बहिर्बाह्यांश्चक्षुश्चैवांतरे भ्रुवोः प्राणापानौ समौ कृत्वा नासाभ्यंतरचारिणौ २७ १
यतेंद्रियमनोबुद्धिर्मुनिर्मोक्षपरायणः विगतेच्छाभयक्रोधो यः सदा मुक्त एव सः २८ २
सूत्रस्थानीयान् श्लोकानाह भगवान् । एतेषामेव वृत्तिस्थानीयः कृत्स्नः षष्ठोऽध्यायो भविष्यति । तत्रापि द्वाभ्यां संक्षेपे रामः
णयोगः ध्येयतत्त्वं तेन तुल्यं परमात्मज्ञानमिति विवेकः २७ [redacted] स्पर्शान् शब्दादीन् बाह्यान् बहिरेवानपि श्रोत्रा १२६
दिद्वारांतस्तदाकारांतःकरणवृत्तिनिरंतरं प्रविशान् पुनर्बहिरेव कृत्वा परवैराग्यवशेन तत्तदाकारां वृत्तिमनुत्पाद्येत्यर्थः ।
इहोच्चैस्तरां भवेदुक्तस्तेभ्यः परं स्पर्शादि बहिःकरणाभावं भंग संगात्मकं योगानुरागवशात् दंतः अविद्यानां वैरा
ग्येन बहिर्गमनं संभवतीति वदितुं बाह्यानिति विशेषणं तरनेन वैराग्यमुक्त्वाभ्यासमाह । चक्षुश्चैवांतरे भ्रुवोः कृत्वेत्यनु

वीतरागभयक्रोधः

२ षज्यते । अत्यंतनिमीलने हि निद्राख्यालयात्मिका वृत्तिरेका भवेत् प्रसारणे तु प्रमाणविपर्ययविकल्पस्मृतयश्चतस्रो विक्षे
पात्मिका वृत्तयो भवेयुः । पंचापि तु वृत्तयो निरोद्धव्या इति अर्धनिमीलनेन भ्रूमध्ये चक्षुषो निधानं । तथा प्राणापानौ समौ
[redacted] तुल्यावूर्ध्वाधो गतिविच्छेदेन नासाभ्यंतरचारिणौ कुंभकेन कृत्वा । अनेनोपायेन यताः संयता इंद्रियमनोबुद्धयो
यस्य स तथा । मोक्षपरायणः सर्वविषयविरक्तो मुनिर्मननशीलो भवेत् । विगतेच्छाभयक्रोधः इत्यत्र व्याख्यातं एतादृशो यः
यस्य स तथा । मोक्षपरायणः सर्वविषयविरक्तो मुनिर्मननशीलो भवेत् । विगतेच्छाभयक्रोधो यः इत्यत्र व्याख्यातं एतादृशो यः २८ एवं योग
संन्यासी सदा भवति मुक्त एव सः नतु तस्य मोक्षः कर्तव्योस्ति अथवा य एतादृशः स सदा जीवन्नपि मुक्त एव
संन्यासी सदा भवति मुक्त एव सः नतु तस्य मोक्षः कर्तव्योस्ति अथवा य एतादृशः स सदा जीवन्नपि मुक्त एव २९ एवं योग
युक्तः भोक्तारं यज्ञतपसां सर्वलोकमहेश्वरं सुहृदं सर्वभूतानां ज्ञात्वा मां शांतिमृच्छति ३० ३
इति श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे संन्यासयोगो नाम पंचमोऽध्यायः ५
युक्तः किं ज्ञात्वा मुच्यत इति तदाह सर्वेषां यज्ञानां तपसां च कर्तृरूपेण देवतारूपेण च भोक्तारं भोगकर्तारं पालकं शिवा
सर्वेषां लोकानां महांतमीश्वरं हिरण्यगर्भादीनामपि नियंतारं सर्वेषां प्राणिनां सुहृदं प्रत्युपकारनिरपेक्षतयोपकारिणं
सर्वांतर्यामिणं सर्वभासकं परिपूर्णसच्चिदानंदैकरसं परमार्थसत्यं सर्वात्मानं नारायणं मां ज्ञात्वा आत्मत्वेन साक्षात्कृ
त्य शांतिं सर्वसंसारोपरतिं मुक्तिमृच्छति प्राप्नोतीत्यर्थः । त्वां पश्यन्नपि कथं नाहं मुक्त इत्याशंकानिराकरणाय विशे
षणानि । उक्तरूपेणैव मम ज्ञानं मुक्तिकारणमिति भावः अनेकसाधनाभ्यासनिष्पन्नं हरिणोरितं स्वस्वरूपपरि
ज्ञानं सर्वेषां मुक्तिसाधनम् इति श्रीमत्परमहंसपरिव्राजकाचार्य॰ भगवद्गीतागूढार्थदीपिका पंचमोऽध्यायः ५
ग्रंथ ५५०

गी॰ टी॰ ६
११६

[illegible] मेः श्लोकैः पंचभिर्यदीरितं तदेवात्र आरभ्यते अध्यायसमाप्तिपर्यन्तं विस्तरात् १ तत्र सर्वकर्मत्यागेन योगं विधास्य
[illegible] अवेनहीनत्वमाशंक्य कर्मयोगं स्तौति द्वाभ्यां कर्मणां फलमनाश्रितो नपेक्षमाणः फलाभिसंधिरहितः सन् कार्यं कर्तव्य
तया शास्त्रेण विहितं नित्यमग्निहोत्रादिकं कर्म करोति यः सकर्मीपि सन् [illegible] योगी चेति स्तूयते । संन्यासो हि त्यागः चित्त
विक्षेपाभावश्च योगः तौ चास्य विद्येते फलत्यागात् [illegible] कामभावाच्च कर्मफलेच्छात्यागः एवात्र गौण्यावृत्त्या
संन्यासयोगशब्दाभ्यामभिधीयते । सकामानपेक्षः आशास्यकर्मनाशात् [illegible] हि निष्काम कर्मानुष्ठानं मुख्यो संन्या

श्रीभगवानुवाच अनाश्रितः कर्मफलं कार्यं कर्म करोति यः
स संन्यासी च योगी च न निरग्निर्न चाक्रियः १

सः योगी । तस्मात् स्वयं यद्यपि न निरग्निः अग्निसाध्यश्रौतकर्मत्यागी न भवति । न चाक्रियः अग्निनिरपेक्षस्मार्तक्रियात्यागी [illegible]
वति तथापि संन्यासी योगी चेति मंतव्यः । अथवा न निरग्निः न चाक्रियः संन्यासी योगी चेति मंतव्यः । किंतु [illegible]
निष्काम कर्मानुष्ठायी संन्यासी योगी चेति मंतव्य इति स्तूयते । [illegible] गो अश्वेभ्यः पशु [illegible]
[illegible] न्यायेनान्वयोपपत्तिः अत्र चाक्रिय इत्यनेनैव सर्वकर्मसंन्यासिनि लब्धे निरग्निरिति व्यर्थं [illegible]
सर्वाणि कर्माणि उपलक्ष्य निरग्निरिति संन्यासी [illegible] न चित्तवृत्तीरुपलक्ष्य अक्रिय इति निरुद्ध [illegible] योगी
गी च कथ्यते । तेन न निरग्निः संन्यासी मंतव्यो न चाक्रियो योगी । [illegible] यथा [illegible] मुभयत्वाति [illegible] य । एव

राम

११६

लोकैषणा [illegible] असंन्यासेपि संन्यासपदप्रयोगे निमित्तभूतं गुणयोगं दर्शयितुमाह यं सर्वकर्मतत्फलपरित्यागं संन्यासमिति प्राहुः श्रु
तयः न्यास एवात्यरेचयदिति पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरंतीत्याद्याः । योगं फलतृष्णाक
र्तृत्वाभिमानयोः परित्यागेन विहितकर्मानुष्ठानं तं संन्यासं विद्धि हे पांडव अत्र ब्रह्मदत्तं अब्रह्मदत्तमित्याह । नैवयमन्यामहे
ब्रह्मदत्तसदृशोयमिति न्यायात् परशब्दः परत्र प्रयुज्यमानः सादृश्यं बोधयति गौण्या वृत्त्या तद्भावारोपेण वा प्रकृते तु
किं सादृश्यमिति तदाह । न हि यस्मात् असंन्यस्तसंकल्पः अत्यक्तफलसंकल्पः कश्चन कश्चिदपि योगी न भवति । अपि

यं संन्यासमिति प्राहुर्योगं तं विद्धि पांडव न ह्यसंन्यस्तसंक
ल्पो योगी भवति कश्चन २

तु सर्वो योगी त्यक्तफलसंकल्प एव भवतीति फलत्यागसाम्यात् तत्स्वरूपचित्तवृत्तिनिरोधसाम्याच्च गौण्या वृत्त्या कर्मैव
संन्यासी च योगी च भवतीत्यर्थः । तथा हि योगश्चित्तवृत्तिनिरोधः । प्रमाणविपर्ययविकल्पनिद्रास्मृतय इति वृत्तयः पंच
विधाः तत्र प्रत्यक्षानुमानशास्त्रोपमानार्थापत्त्यभावाख्यानि प्रमाणानि षडिति वैदिकाः । प्रत्यक्षानुमानागमाः प्रमा
णानि त्रीणीति योगाः । अंतर्भावबहिर्भावाभ्यां संकोचविकाशौ द्रष्टव्यौ । अत एव तार्किकादीनां मतभेदाः । विपर्ययो
मिथ्याज्ञानं तस्य पंच भेदाः । अविद्याऽस्मितारागद्वेषाभिनिवेशाः । त एव च क्लेशाः । शब्दज्ञानानुपाती वस्तुशून्यो

गी॰टी॰६ ११७ विकल्पः। प्रमाणभ्रमविलक्षणो सदर्थव्यवहारः। शशविषाणं नरस्य शिरस्य चैतन्यमित्यादिः। अभावप्रत्ययालंबना वृत्तिर्नि
द्रा। वतस्मृतीनां वृत्तीनामभावस्य प्रत्ययः कारणं तमोगुणः तदालंबना वृत्तिरेव निद्रा। ननु ज्ञानाद्यभावमात्रमित्यर्थः। अनुभू
तविषयासंप्रमोषः प्रत्ययः स्मृतिः। पूर्वानुभवसंस्कारजं ज्ञानमित्यर्थः। सर्ववृत्तिजन्यत्वाद तेक थनं। लज्जादिवृत्तीनामपि
पंचस्वेवांतर्भावो द्रष्टव्यः। एतादृशां सर्वासां चित्तवृत्तीनां निरोधो योग इति च समाधिरिति च कथ्यते फलसंकल्पस्त्यागा
त्वकृतीयो विपर्ययभेदस्तन्निरोधमात्रमपि गौण्या वृत्त्या योग इति संन्यास इति चोच्यत इति न विरोधः २ तर्हि किं सर्व
दा आरुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते योगारूढस्य तस्यैव शमः कारणमुच्यते ३
यदा हि नेंद्रियार्थेषु न कर्मस्वनुषज्जते सर्वसंकल्पसंन्यासी योगारूढस्तदोच्यते ४
वा कर्मयोग एव यावज्जीवमनुष्ठेय इति नेत्याह योगमंतःकरणशुद्धिरूपं वैराग्यमारुरुक्षोरारोढुमिच्छोर्न त्वारूढ
स्य मुनेर्जिविष्यतः कर्मफलतृष्णात्यागिनः कर्म शास्त्रविहितमग्निहोत्रादि नित्यं भगवदर्पणबुद्ध्या कृतं कारणं योगारो राम
हणे साधनमनुष्ठेयमुच्यते वेदमुखेन मया। योगारूढस्य योगमंतःकरणशुद्धिरूपं वैराग्यं प्राप्तवतस्तस्यैव पूर्वं
कर्मिणोऽपि सतः शमः सर्वकर्मसंन्यास एव कारणमनुष्ठेयं तया ज्ञानपरिपाकसाधनमुच्यते। ३ कदा योगारूढो ११७
भवतीत्युच्यते। यदा यस्मिंश्चित्तसमाधानकाले इंद्रियार्थेषु शब्दादिषु कर्मसु च नित्यनैमित्तिककाम्यलौकिकप्रति

षिद्धेषु नानुषज्जते तेषां मिथ्यात्वदर्शनेनात्मनोऽकर्त्रभोक्तृपरमानंदाद्वयस्वरूपदर्शनेन च प्रयोजनाभावबुद्ध्याहमेषां कर्ता
ता॰ दृषयाणां स्व ममैते भोग्या इत्यभिनिवेशरूपमनुषंगं न करोति हि यस्मात्तस्मात्सर्वसंकल्पसंन्यासी सर्वेषां संकल्पानामिदं मया कर्तव्यमे
तत्फलं भोक्तव्यमित्येवंरूपाणां मनोवृत्तिविशेषाणां तत्कामनानां तत्साधनानां च कर्मणां त्यागशीलः तदा शब्दादिषु कर्मसु चानु
षंगस्य तद्धेतोश्च संकल्पस्य योगारोहणप्रतिबंधकस्याभावाद्योगं समाधिमारूढो योगारूढ इत्युच्यते ४ यो यदा यो
गारूढो भवति तदा तेनात्मनैवात्मोद्धृतो भवति संसारानर्थव्रातादतः। आत्मना विवेकयुक्तेन मनसा आत्मानं स्वं जीवं
संसारसमुद्रे निमग्नं तत उद्धरेत् उद्धरेद्विषयासंगपरित्यागेन योगारूढतामापादयेदित्यर्थः। न तु विषयासंगेनात्मानमवसा
उद्धरेदात्मनात्मानं नात्मानमवसादयेत् आत्मैव ह्यात्मनो बंधुरात्मैव रिपुरात्मनः ५
बंधुरात्मात्मनस्तस्य येनात्मैवात्मना जितः अनात्मनस्तु शत्रुत्वे वर्तेतात्मैव शत्रुवत् ६
दयेत् संसारसमुद्रे मज्जयेत्। हि यस्मादात्मैवात्मनो बंधुर्हितकारी संसारबंधनान्मोचनहेतुर्नान्यः कश्चिल्लौकिकस्य बं
र धोऽपि स्नेहानुबंधेन बंधहेतुत्वादात्मैवात्मनो रिपुः शत्रुरहितकारी विषयबंधनागारप्रवेशात्कोशकारवदात्मनः स्व
स्य। बाह्यस्यापि रिपोरात्मप्रयुक्तत्वात् आत्मैव रिपुरात्मन इति ५ इदानीं किं लक्षण आत्मात्मनो बंधुः किंल
क्षणो वात्मनो रिपुरित्युच्यते आत्मा कार्यकरणसंघातो येन जितः स्ववशीकृतः आत्मनैव विवेकयुक्तेन मनसैव न तु शस्त्रा

चित्तविक्षेपकरेषु २

गी.टी.६ जितात्मा तस्यात्मा स्वरूपमात्मनो बंधुः सुहृत् मंगलप्रवृत्त्यभावेन स्वहितकरणात् अनात्मनस्तु अजितात्मनः शत्रुत्वे शत्रुवद्वर्ते
११८ तात्मैव शत्रुवद्दाह्यशत्रुरिवातीव खलप्रवृत्त्या स्वस्य विनाशित्वादित्यर्थः ६ जितात्मनः स्वबंधुत्वं विवृणोति शीतोष्णसुख
दुःखेषु तत्त्वपि तथा मानापमानयोः पूजापरिभवयोः चित्तविक्षेपहेत्वोः सतोरपि तेषु समत्वेनेति वा जितात्मनः आत्मकस्य
जितेंद्रियस्य प्रशांतस्य सर्वत्र समबुध्या रागद्वेषशून्यस्य परमात्मा स्वप्रकाशज्ञानस्वभाव आत्मा समाहितः समाधिवि
षयो योगारूढो भवति। परमिति वा छेदः जितात्मनः प्रशांतस्यैव परं केवलमात्मा समाहितो भवति नान्यस्येत्यर्थः जितात्मा

जितात्मनः प्रशांतस्य परमात्मा समाहितः शीतोष्णसुखदुःखेषु तथा मानापमानयोः ७
ज्ञानविज्ञानतृप्तात्मा कूटस्थो विजितेंद्रियः युक्त इत्युच्यते योगी समलोष्टाश्मकांचनः ८

प्रशांत[illegible]इत्यर्थः ७ ज्ञानं शास्त्रोक्तानां पदार्थानामौपदेशिकं ज्ञानं विज्ञानं तदप्रामाण्यशंकानिराकरणफलेन
स्वविचारेण तथैव तेषां स्वानुभवेनापरोक्षीकरणं ताभ्यां तृप्तः संजातालं प्रत्यय आत्मा चित्तं यस्य स तथा। कूटस्थो विषयस
न्निधावपि विकारशून्यः अत एव विजितानि रागद्वेषपूर्वकाद्विषयग्रहणाद्व्यावर्तितानींद्रियाणि येन सः अत एव योपादे ११८
यहेयबुद्धिशून्यत्वेन समानि मृल्लोष्टपाषाणकांचनानि यस्य सः योगी परमहंसपरिव्राजकः परवैराग्ययुक्तो योगारूढ इत्युच्य
ते ८

॰ कृष्णकोषि ॰

एवं२

सुहृन्मित्रादिषु समबुद्धिस्तु सर्वयोगिश्रेष्ठ इत्याह सुहृत्स्वत्युपकारमनपेक्ष्य पूर्वस्नेहं संबंधं च विनैव उपकर्ता मि
त्रं स्नेहेनोपकारकः। अरिः स्वकृतापकारमनपेक्ष्य स्वभावक्रौर्येण अपकर्ता। उदासीनो विवदमानयोरुभयोरप्युपेक्ष
कः। मध्यस्थो विवदमानयोरुभयोरपि हितैषी। द्वेष्यः स्वकृतापकारमपेक्ष्यापकर्ता। बंधुः संबंधेनोपकर्ता। एतेषु सा
पापेषु धुषु शास्त्रविहितकारिषु शास्त्रप्रतिषिद्धकारिषु पापिषु च कादन्येषु च सर्वेषु समबुद्धिः कः कीदृक्कर्मेत्यव्यापृतबुद्धिः
सर्वत्र रागद्वेषशून्यः। विशिष्यते सर्वतः उत्कृष्टो भवति विमुच्यत इति वा पाठः। ९ एवं योगारूढस्य लक्षणं फलं चोक्त्वा

सुहृन्मित्रार्युदासीनमध्यस्थद्वेष्यबंधुषु साधुष्वपि च पापेषु समबुद्धिर्विशिष्यते ९
योगी युंजीत सततमात्मानं रहसि स्थितः एकाकी यतचित्तात्मा निराशीरपरिग्रहः १०

तस्य सांगं योगं विधत्ते योगीत्यादिभिः स योगी परमो मत इत्यंतैस्त्रयोविंशत्या श्लोकैः। तत्र एवमुत्तमफलप्राप्तये यो
गी योगारूढः आत्मानं चित्तं सततं निरंतरं युंजीत क्षिप्तमूढविक्षिप्तभूमिपरित्यागेनैकाग्रनिरोधभूमिभ्यां समा
हितं कुर्यात्। रहसि गिरिगुहादौ योगप्रतिबंधकदुर्जनातिवर्जिते देशे स्थितः एकाकी एकः सर्वगृहपरिजनः संन्यासी
चित्त यतः अंतःकरणमात्मा देहश्च संयतौ योगप्रतिबंधकव्यापारशून्यौ यस्य स यतचित्तात्मा यतो निराशीर्वैराग्यदार्ढ्येन वि
गततृष्णः अत एव चापरिग्रहः शास्त्राभ्यनुज्ञातेनापि योगप्रतिबंधकेन परिग्रहेण शून्यः १० श्रीकृष्णः

[illegible] नत्रासननियमं [illegible] [illegible] [illegible] [illegible] [illegible] योगं तदा [illegible]
[illegible] समेस्थाने [illegible] [illegible] नात्युच्छ्रित [illegible] लाजिनकु [illegible]
[illegible] आस्थि [illegible] [illegible] दाम्यते [illegible] [illegible]
[illegible] तथा चाह [illegible] [illegible] स्थिर [illegible] नत्वा [illegible]
[illegible] [illegible] [illegible] [illegible] किं कुर्यादित्यताह [illegible]

शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मनः। नात्युच्छ्रितं नातिनीचं चैलाजिनकुशोत्तरं १०
तत्रैकाग्रं मनः कृत्वा यतचित्तेंद्रियक्रियः। उपविश्यासने युंज्याद्योगमात्मविशुद्धये ११

[illegible] [illegible] [illegible] [illegible] [illegible] याज्ञवल्क्यो [illegible] णां
[illegible] [illegible] [illegible] [illegible] सर्व
[illegible] [illegible] [illegible] [illegible] त्रिरितिक
[illegible] [illegible] ध्यान [illegible] [illegible] गैकविषय [illegible] १२९
[illegible] [illegible] [illegible] [illegible] [illegible] ध्यार्थं योगसंप्र

ज्ञातसमाधिमभ्यसेत्सचब्रह्माकारमनोवृत्तिप्रवाहरूपनिदिध्यासनाख्यः तदुक्तं ब्रह्माकारमनोवृत्तिप्रवाहोहंकृ
तिं विना। संप्रज्ञातसमाधिः स्याद्ध्यानाभ्यासप्रकर्षत इति एतदेवाभिप्रेत्य ध्यानाभ्यासप्रकर्षं विदधे भगवान् योगी
युंजीत सततं युंज्याद्योगमात्मविशुद्धये युक्त आसीत मत्पर इत्यादिबहुकृत्वः १२ तदर्थं वासनमुक्त्वाधुनातन
कथं शरीरधारणमित्युच्यते कायः शरीरमध्यं च शिरश्च ग्रीवा च कायशिरोग्रीवं मूलाधारादारभ्य मूर्द्धांतपर्यंतं स
ममवक्रं अचलमकंपं धारयन्नेकतत्त्वाभ्यासेन विक्षेपसहभाव्यंगमेजयत्वाभावं संपादयन् स्थिरः दृढप्रयत्नो भू

समं कायशिरोग्रीवं धारयन्नचलं स्थिरः। संप्रेक्ष्य नासिकाग्रं स्वं दिशश्चानवलोकयन् १३
ते प्रशांतात्मा विगतभीर्ब्रह्मचारिव्रते स्थितः। मनः संयम्य मच्चित्तो युक्त आसीत मत्परः १४

त्वा किंच स्वं स्वीयं नासिकाग्रं संप्रेक्ष्य बलप्रवृत्तिरूपशाहित्याय विषयप्रवृत्तिरहितो निमीलितनेत्र इत्यर्थः। दिशश्चा
नवलोकयन् अंतरांतरा दिशश्चावलोकनमकुर्वन् योगप्रतिबंधकत्वात्तस्य एवंभूतः सन् आसीतेत्युत्तरेण संब
[illegible] किंच निदाननिवृत्तिरूपेण प्रकर्षेण शांतः रागादिदोषरहित आत्मांतःकरणं यस्य स प्रशांतात्मा शास्त्री
यनिश्चयदार्ढ्याद्विगतभीः सर्वकर्मपरित्यागे युक्तं वायुक्तं वेति शंका यस्य स विगतभीः ब्रह्मचारिव्रते ब्रह्मचर्यगुरु
शुश्रूषाभिक्षान्नभोजनादौ स्थितः सन् मनः संयम्य विषयाकारवृत्तिशून्यं कृत्वा मयि परमेश्वरे प्रत्यक्चिति सगुणे निर्गु

गी॰टी॰ तोऽयं निर्वृत्य स्वसमाधिलोमाद्दुःखस्यैकधारावाहिकचित्तवृत्तिमान्युक्तः सोऽपि येयं चिंतनीये मानि कथमेवं स्यादत आह म
६८ [illegible] अहमेव परमानंदरूपवाक्परः पुरुषार्थः प्रियो यस्य स तथा। तदेतत्प्रेयः पुत्रात्प्रेयो वित्तात्प्रेयोऽन्यस्मात्सर्वस्माद
न्तरं यदयमात्मेति श्रुतेः। एवं विषयाकारसर्ववृत्तिनिरोधेन भगवदेकाकारचित्तवृत्तिर्युक्तः संप्रज्ञातसमाधिमाना
सीत उपविशेद्यथाशक्ति न तु स्वेच्छया व्युत्तिष्ठेदित्यर्थः। भवति कश्चिद्रागी स्त्रीचित्तो न तु स्त्रियमेव परत्वेनाराध्यत्वेन गृ
ह्णाति किं तर्हि राजानं वा देवं वा। अयं तु मच्चित्तो मत्पर एव सर्वाराध्यत्वेन मामेव मन्यत इति भाष्यकृता व्याख्या
त्वेऽपि मेनात्र भाष्यकारेण तुल्यता। [illegible] किंतु हेत्वेक तुल्यत्वेऽपि तुल्यता १४ एवं संप्रज्ञातसमाधिनासीन

युंजन्नेवं सदात्मानं योगी नियतमानसः। शांतिं निर्वाणपरमां मत्संस्थामधिगच्छति १५

स्य किं स्यादित्युच्यते एवं रहोऽवस्थानादिपूर्वोक्तनियमेनात्मानं मनो युंजन् अभ्यासवैराग्याभ्यां समाहितं कुर्वन् रा॰म॰
योगी सदा योगाभ्यासपरोऽभ्यासातिशयेन नियतं निरुद्धं मानसं मनो येन नियतानि निरुद्धा मानसा वृत्तिरू
पा विकारा येन स वा नियतमानसः सन् शांतिं सर्ववृत्त्युपरतिरूपां प्रशांतवाहितां निर्वाणपरमां तत्त्वसाक्षा १३०
त्कारोत्पत्तिद्वारेण [illegible]सकार्याविद्यानिवृत्तिरूपमुक्तिपर्यवसायिनीं मत्संस्थां मत्स्वरूपपरमानंदरूपां निष्ठामधिगच्छ
दि परेण

ति न तु सांसारिकाण्यैश्वर्याणि [illegible] समाधिफलान्यधिगच्छति तेषां मोक्षोपयोगिसमाध्युपसर्गत्वात् तथा
च तत्त्वसमाधिफलान्युक्त्वाह [illegible] ते समाधावुपसर्गा व्युत्थाने सिद्धय इति। स्थान्युपनिमंत्रणे संग[illegible]या
करणं पुनरनिष्टप्रसंगादिति [illegible] नोदेवाः तथा उद्दालकादेः देवैर्मन्त्रितोऽपि तत्र संगमादरं चाकृत्वा
वानवज्ञाय पुनरनिष्टप्रसंगं [illegible] यन् निर्विकल्पकमेव समाधिमकरोदिति वसिष्ठेनाख्यायते। मुमुक्षुर्हि यश्च
समाधिः स द्विविधः [illegible]। वितर्कविचारानंदास्मितानुगमात्संप्रज्ञातः। सम्यक् संशयविपर्ययानध्यवसाय[illegible]
त्वेन प्रज्ञायते प्रकाश्यते ध्येयस्य रूपं येन स संप्रज्ञातः समाधिर्भावनाविशेषः। भावना हि [illegible]
[illegible] विषयांतरपरिहारेण चेतसि पुनः पुनर्निवेशनं। भाव्यं च द्विविधं [illegible] गृहीतृभेदात्। ग्राह्यमपि त्रिविधं स्थू
लसूक्ष्मभेदात्। तत्र [illegible] अभिजातस्येव मणेर्ग्रहीतृग्रहणग्राह्येषु तत्स्थतदंजनता समापत्तिः। [illegible]
[illegible] तयोः [illegible] चित्तस्य ग्रहीतृग्रहणग्राह्येषु आत्मेंद्रियविषयेषु तत्स्थता तदेकाग्रता। तदंजनता तन्मयता
न्यग्भूते चित्ते भास्यमानस्यैवोत्कर्षः इति यावत् तथाविधा समापत्तिस्तद्रूपः परिणामो भवति यथाभिजातस्य निर्मलस्य
स्फटिकमणेस्तत्तदुपाश्रयवशात्तत्तद्रूपापत्तिरेवं निर्मलस्य चित्तस्य तत्तद्भावनीयवस्तूपरागात्तत्तद्रूपापत्तिः समा
पत्तिः समाधिरिति च पर्यायः। यद्यपि ग्रहीतृग्रहणग्राह्येष्विति उक्तं तथापि भूमिकाक्रमवशाद्ग्राह्यग्रहणग्रहीतृषु इति

यो.टी.६ तिबोद्धव्यं। यतः प्रथमं ग्राह्यनिष्ठ एव समाधिर्भवति ततो ग्रहणनिष्ठस्ततो ग्रहीतृनिष्ठ इति। ग्रहीत्रादिक्रमेणाप्यग्रे व्याख्या
१२२ स्यते। तत्र यदा स्थूलं महाभूतेंद्रियात्मकं षोडशविकाररूपं विषयमादाय पूर्वापरानुसंधानेन शब्दार्थोल्लेखेन च भावना
क्रियते तदा सवितर्कः समाधिः। अस्मिन्नेवालंबने पूर्वापरानुसंधानशब्दार्थोल्लेखशून्यत्वेन यदा भावना प्रवर्त्तते तदा नि
र्वितर्कः। एतावुभावप्यत्र वितर्कशब्देनोक्तौ। तन्मात्रांतःकरणलक्षणं सूक्ष्मं विषयमालंब्य तस्य देशकालधर्मावच्छेदेन य
दा भावना प्रवर्त्तते तदा सविचारः। अस्मिन्नेवालंबने देशकालावच्छेदं विना धर्मिमात्रावभासित्वेन यदा भावना प्रवर्त्तते त
दा निर्विचारः। एतावुभावप्यत्र विचारशब्देनोक्तौ। तथा च भाष्यं वितर्कश्चित्तस्य स्थूल आलंबने आभोगः सूक्ष्मो विचा
र इति। इयं ग्राह्यसमापत्तिरिति व्यपदिश्यते। यदा रजस्तमोलेशानुविद्धमंतःकरणसत्वं भाव्यते तदा गुणभावाच्चिच्छक्तेः
सुखप्रकाशमयस्य सत्वस्य भाव्यमानस्योद्रेकात्सानंदः समाधिर्भवति। अस्मिन्नेव समाधौ ये बद्धधृतयस्तत्वांतरं प्र
धानपुरुषरूपं न पश्यंति ते विगतदेहाहंकारत्वाद्विदेहशब्देनोच्यंते। इयं ग्रहणसमापत्तिः। ततः परं रजस्तमोलेशान रा.म:
भिभूतं शुद्धं सत्वमालंबनीकृत्य या भावना प्रवर्त्तते तस्यां ग्राह्यस्य सत्वस्य न्यग्भावाच्चितिशक्तेरुद्रेकात्सत्तामात्राव
शेषत्वेन समाधिः सास्मित इत्युच्यते। न चाहंकारास्मितयोरभेदः शंकनीयः। यतो यत्रांतःकरणमहमित्युल्लेखेन विष १२२
यान्वेदयते सो[illegible]हंकारः। यत्रांतर्मुखतया प्रतिलोमपरिणामेन प्रकृतिलीने चेतसि सत्तामात्रमवभाति सास्मिता।

अस्मिन्नेव समाधौ ये कृतपरितोषाः परं पुरुषमपश्यंतश्चेतसः प्रकृतौ लीनत्वात्प्रकृतिलया इत्युच्यंते सेयं गृहीतृसमाप
त्तिरस्मितामात्ररूपगृहीतृनिष्ठत्वात्। ये तु परं पुरुषं विविच्य भावनायां प्रवर्त्तंते तेषामपि केवलपुरुषविषया विवेकख्यातिर्गृ
हीतृसमापत्तिरपि न सास्मितः समाधिर्विवेकेनास्मिताया हानात्। तत्र गृहीतृभानपूर्वकमेव ग्रहणभानं तत्पूर्वकं च सूक्ष्म
ग्राह्यभानं तत्पूर्वकं च स्थूलग्राह्यभानमिति स्थूलविषयो द्विविधोऽपि वितर्कश्चयानुगतः द्वितीयो वितर्कविकलस्त्रितयानुग [illegible]
तः तृतीयो वितर्कविचाराभ्यां विकलो द्वितयानुगतश्चतुर्थो वितर्कविचारानंदैर्विकलोऽस्मितामात्र इति चतुरवस्थोऽयं संप्रज्ञा
त इति। एवं सवितर्कः सविचारः सानंदः सास्मितश्च समाधिरंतर्द्धानादिसिद्धिहेतुर्नतथा मुक्तिहेतुः समाधिविरोधित्वाद्धेय ए
व मुमुक्षुभिः। गृहीतृग्रहणयोरपि चित्तवृत्तिविषयतादशायां ग्राह्यकोटौ निक्षेपाद्धेयोपादेयविभागकथनाय ग्राह्यसमा
पत्तिरेव विवृता सूत्रकारेण। चतुर्विधा हि ग्राह्यसमापत्तिः स्थूलग्राह्यगोचरा द्विविधा सवितर्का निर्वितर्का च सूक्ष्मग्राह्यगो
चरापि द्विविधा सविचारा निर्विचारा च। तत्र शब्दार्थज्ञानविकल्पैः संकीर्णा सवितर्का। शब्दार्थज्ञानविकल्पसंभिन्ना स्थूला
र्थावभासरूपा सवितर्का समापत्तिः स्थूलगोचरा सविकल्पकवृत्तिरित्यर्थः। स्मृतिपरिशुद्धौ स्वरूपशून्येवार्थमात्रनि
र्भासा निर्वितर्का। तस्मिन्नेव स्थूल आलंबने शब्दार्थस्मृतिप्रविलये प्रत्युदितस्पष्टग्राह्याकारप्रतिभासितया न्यग्भूत
ज्ञानांशत्वेन स्वरूपशून्येव निर्वितर्का समापत्तिः स्थूलगोचरा निर्विकल्पकवृत्तिरित्यर्थः। एतयैव सविचारा निर्विचारा च सू
क्ष्मविषया व्याख्याता सूक्ष्मस्तन्मात्रादिर्विषयो यस्याः सा सूक्ष्मविषया समापत्तिर्द्विविधा सविचारा निर्विचारा च सवि
चा

कल्पकनिर्विकल्पकभेदेनैतयैव सवितर्का निर्वितर्का च स्थूलविषया समापत्तिर्व्याख्याता। शब्दार्थज्ञानविकल्पसहित
त्वेन देशकालधर्माद्यवच्छिन्नः सूक्ष्मोऽर्थः प्रतिभाति यस्यां सा सविचारा। शब्दार्थज्ञानविकल्परहितत्वेन देशकालधर्माद्यनव
च्छिन्नत्वेन च धर्मिमात्रतया सूक्ष्मोऽर्थः प्रतिभाति यस्यां सा निर्विचारा। सविचारनिर्विचारयोः सूक्ष्मविषयत्वविशेषणात्सवि
तर्कनिर्वितर्कयोः स्थूलविषयत्वमर्थाद्व्याख्यातं। सूक्ष्मविषयत्वं चालिंगपर्यवसानं सविचारायाः निर्विचारायाश्च समाप
त्तेर्यत्सूक्ष्मविषयत्वमुक्तं तदलिंगपर्यंतं द्रष्टव्यं। तेन सानंदसास्मितयोर्गृहीतृग्रहणसमापत्त्योरपि ग्राह्यसमापत्तावेवां
तर्भाव इत्यर्थः। तथाहि पार्थिवस्याणोर्गंधतन्मात्रं सूक्ष्मो विषयः आप्यस्यापि रसतन्मात्रं तैजसस्य रूपतन्मात्रं वायवी
यस्य स्पर्शतन्मात्रं नभसः शब्दतन्मात्रं तेषामहंकारः तस्य लिंगमात्रं महत्तत्वं तस्याप्यलिंगं प्रधानं सूक्ष्मो विषयः सप्तानां
मपि प्रकृतीनां प्रधान एव सूक्ष्मताविश्रांतेस्तत्पर्यंतमेव सूक्ष्मविषयत्वमुक्तं यद्यपि प्रधानादपि पुरुषः सूक्ष्मोऽस्ति त
थाप्यन्वयिकारणत्वाभावात्तस्य सर्वान्वयिकारणे प्रधान एव निरतिशयं सौक्ष्म्यं व्याख्यातं पुरुषस्तु निमित्तकारणं स
दपि नान्वयिकारणत्वेन सूक्ष्मतामर्हति। अन्वयिकारणत्वाविवक्षायां तु पुरुषोऽपि सूक्ष्मो भवत्येवेति द्रष्टव्यं। ता एव सबी राम॰
जः समाधिः। ताश्चतस्रः समापत्तयो ग्राह्यविषया बीजेन सह वर्तंत इति सबीजः समाधिर्वितर्कविचारानंदास्मितानुगमात्सं १२२
प्रज्ञात इति प्रागुक्ताः। स्थूलेऽर्थे सवितर्को निर्वितर्कः सूक्ष्मेऽर्थे सविचारो निर्विचार इति। तत्रोत्तमस्य फलमुच्यते निर्वि
चारवैशारद्येऽध्यात्मप्रसादः। स्थूलविषयेऽतुल्येऽपि सवितर्कां शब्दार्थज्ञानविकल्पसंकीर्णामपेक्ष्य तद्रहितस्य निर्वि



कल्पकरूपस्य निर्वितर्कस्य प्राधान्यं ततः सूक्ष्मविषयस्य सविकल्पकप्रतिभासरूपस्य सविचारस्य ततोऽपि सूक्ष्म
विषयस्य निर्विकल्पकप्रतिभासरूपस्य निर्विचारस्य प्राधान्यं तत्र पूर्वत्रयापेक्षया निर्विचारार्थत्वान्निर्विचारफलेनै
व फलवत्त्वं निर्विचारस्य तु प्रकृष्टाभ्यासबलाद्वैशारद्ये रजस्तमोऽनभिभूतसत्वोद्रेके सत्यध्यात्मप्रसादः क्लेशवासनारहित
स्य चित्तस्य भूतार्थविषयः क्रमाननुरोधी स्फुटः प्रज्ञालोकः प्रादुर्भवति। तथा च भाष्यं प्रज्ञाप्रसादमारुह्य अशोच्यः शोच
तो जनान्। भूमिष्ठानिव शैलस्थः सर्वान्प्राज्ञोऽनुपश्यतीति। ऋतंभरा तत्र प्रज्ञा। तत्र तस्मिन्प्रज्ञाप्रसादे सति समाहितचित्तस्य
योगिनो या प्रज्ञा जायते सा ऋतंभरा सत्यमेव बिभर्ति न तत्र विपर्यासगंधोऽप्यस्तीति योगिक्यैवेयं समाख्या सा चोत्तमो
योगः तथा च भाष्यं। आगमेनानुमानेन ध्यानाभ्यासरसेन च। त्रिधा प्रकल्पयन्प्रज्ञां लभते योगमुत्तममिति। सा तु श्रुता
गी नुमानप्रज्ञाभ्यामन्यविषया विशेषार्थत्वात्। श्रुतमागमविज्ञानं तत्सामान्यविषयमेव। नहि विशेषेण सह शब्दस्य संगतिर्ग्रही
तुं शक्यते तथानुमानं सामान्यविषयमेव। नहि विशेषेण सह कस्यचिद्व्याप्तिर्गृहीतुं शक्यते। तस्माच्छ्रुतानुमानविष
यो न विशेषः कश्चिदस्ति नचास्य सूक्ष्मव्यवहितविप्रकृष्टस्य वस्तुनो लोकप्रत्यक्षेण ग्रहणमस्ति किंतु समाधिप्रज्ञा
निर्ग्राह्य एव स विशेषो भवति भूतसूक्ष्मगतो वा पुरुषगतो वा तस्मान्निर्विचारवैशारद्यसमुद्भवायां श्रुतानुमानवि
लक्षणायां सूक्ष्मव्यवहितविप्रकृष्टसर्वविशेषविषयायामृतंभरायामेव प्रज्ञायां योगिना महान्प्रयत्न आस्थेय इत्यर्थः।
ननु क्षिप्तमूढविक्षिप्ताख्यव्युत्थानसंस्काराणामेकाग्रतायामपि सवितर्कनिर्वितर्कसविचारजानां संस्काराणां सद्भावा

गी॰टी॰ ६
१२३

नैश्चाल्यमानस्य चित्तस्य कथं निर्विचारवैशारद्यपूर्विकाध्यात्मप्रसादलभ्या ऋतंभरा प्रज्ञा प्रतिष्ठिता स्यादत आह। तज्जः संस्का
रोन्यसंस्कारप्रतिबंधी। तया ऋतंभरया प्रज्ञया जनितो यः संस्कारः स तत्त्वविषयया प्रज्ञया जनितत्वेन बलवत्वादन्यान् व्युत्थान
जान् समाधिजांश्च संस्कारानतत्त्वविषयप्रज्ञाजनितत्वेन दुर्बलान् प्रतिबध्नाति स्वकार्याक्षमान् करोति नाशयतीति वा। तेषां सं
स्काराणामभिभवात्तत्प्रभवाः प्रत्यया न भवंति ततः समाधिरुपतिष्ठते ततः समाधिजा प्रज्ञा ततः प्रज्ञाकृताः संस्कारा इति नवो
नवः संस्काराशयो वर्द्धते। ततश्च प्रज्ञा ततश्च संस्कारा इति। ननु भवतु व्युत्थानसंस्काराणामतत्त्वविषयप्रज्ञाजनितानां तत्त्वमात्रवि
षयसंप्रज्ञातसमाधिप्रज्ञाप्रभवैः संस्कारैः प्रतिबंधस्तेषां तु संस्काराणां प्रतिबंधकाभावादेकाग्रभूमावेव सबीजः समाधिः
स्यान्न तु निर्बीजो निरोधभूमाविति तत्राह। तस्यापि निरोधे सर्वनिरोधान्निर्बीजः समाधिः। तस्य संप्रज्ञातस्य समाधेरेकाग्रभूमि
जस्य अपिशब्दात् क्षिप्तमूढविक्षिप्तानामपि निरोधे योगिप्रयत्नविशेषेण क्रियमाणे सति सर्वनिरोधात्समाधेः समाधिजस्य सं
स्कारस्यापि निरोधान्निर्बीजो निरालंबनोऽसंप्रज्ञातसमाधिर्भवति स च सोपायः प्राक्सूत्रितो विरामप्रत्ययाभ्यासपूर्वः संस्का
रशेषोऽन्य इति। विरम्यते अनेनेति विरामो वितर्कविचारानंदास्मितादिरूपचिंतात्यागः तस्य प्रत्ययः कारणं परं वैराग्यमिति या
वत्। विरामश्चासौ प्रत्ययश्चेति वृत्तिविशेष इति वा तस्याभ्यासः पौनःपुन्येन चेतसि निवेशनं तदेव पूर्वं कारणं यस्य स तथा॥ १२३
संस्कारमात्रशेषः सर्वथा निवृत्तिकोऽन्यः पूर्वोक्तात्सबीजाद्विलक्षणो निर्बीजोऽसंप्रज्ञातसमाधिरित्यर्थः। असंप्रज्ञातस्य हि समा
धेर्द्वावुपायावुक्तावभ्यासो वैराग्यं च। तत्र सालंबनत्वादभ्यासस्य न निरालंबनसमाधिहेतुत्वं घटत इति निरालंबनपरवै

राग्यमेव हेतुर्वक्तव्यं। अभ्याससहकृतः संप्रज्ञातसमाधिद्वारा प्रणाड्योपयुज्यते। तदुक्तं। त्रयमंतरंगं पूर्वेभ्यः। धारणाध्यानस
माधिरूपं साधनत्रयं। यमनियमासनप्राणायामप्रत्याहाररूपसाधनपंचकापेक्षया सबीजस्य समाधेरंतरंगं साधनं।
साधनकोटौ च समाधिशब्देनाभ्यास एवोच्यते। मुख्यस्य समाधेः साध्यत्वात्। तदपि बहिरंगं निर्बीजस्य। निर्बीजस्य तु स
माधेस्तदपि त्रयं बहिरंगं परंपरयोपकारि। तस्य तु परं वैराग्यमेवांतरंगमिति भावः। अयमसंप्रज्ञातो द्विविधो भवप्रत्यय उपायप्र
त्ययश्च। भवप्रत्ययो विदेहप्रकृतिलयानां। विदेहानां सानंदानां प्रकृतिलयानां च सास्मितानां [illegible] ख्यातानां च जन्मादि देवानां
धानपे विशेषा जन्मादौषधिविशेषान्मंत्रविशेषाद्वा यः समाधिः स भवप्रत्ययः भवः संसार आत्मानात्मविवेकाभावरूपः प्रत्ययः कार
णं यस्य स तथा जन्ममात्रहेतुको वा परिणामात्संसारवत्पुनः संसारहेतुत्वान्मुमुक्षुभिर्हेय इत्यर्थः। श्रद्धावीर्यस्मृ
तिसमाधिप्रज्ञापूर्वक इतरेषां जन्मौषधिमंत्रतपःसिद्धव्यतिरिक्तानामात्मानात्मविवेकदर्शिनां तु यः समाधिः स श्र
द्धादिपूर्वकः। श्रद्धादयः पूर्वे उपाया यस्य स तथा उपायप्रत्यय इत्यर्थः। तेषु श्रद्धा योगविषये चेतसः प्रसादः सा हि जन
नीव योगिनं पाति। ततः श्रद्दधानस्य विवेकार्थिनो वीर्यमुत्साह उपजायते। समुपजातवीर्यस्य पाश्चात्त्यासु भूमिषु स्मृ
तिरुत्पद्यते तत्स्मरणाच्च चित्तमनाकुलं तत्समाधीयते। समाधिरैकाग्रता समाहितचित्तस्य प्रज्ञाभ्यासोत्तरा विवेकेन जा
यते। तदभ्यासात्पराच्च वैराग्याद्भवत्यसंप्रज्ञातः समाधिर्मुमुक्षूणामित्यर्थः। प्रतिक्षणपरिणामिनो हि भावा ऋते चिति
शक्तेरिति न्यायेन तस्यामपि सर्ववृत्तिनिरो[illegible]पारिणामप्रवाहे [illegible] संस्कारप्रवाहश्च भवत्येवेत्यभिप्रे

मधुसूदनी

गी.टी.६ त्यसंस्कारशेषइत्युक्तं। तस्यच संस्कारस्य प्रयोजनमुक्तं। ततः प्रशांतवाहिता संस्कारादिति। प्रशांतवाहितानामाह्निकस्य
१२४ चित्तस्य निरिंधनाग्निवत् प्रतिलोमपरिणामेनोपशमः। यथा समिदाज्याद्याहुतिप्रक्षेपे वह्निरुत्तरोत्तरवृद्ध्या प्रज्वलति समि
दादिक्षये तु प्रथमक्षणे किंचिच्छाम्यति उत्तरोत्तरक्षणेषु त्वधिकमधिकं शाम्यतीति क्रमेणाशांतिर्वर्द्धते तथा निरुद्धचित्तस्योत्त
रोत्तराधिकः प्रशमः प्रवहति। तत्र पूर्वप्रशमजनितः संस्कार एवोत्तरप्रशमस्य कारणं तदा च निरिंधनाग्निवच्चित्तं क्रमेणो
पशाम्यद्व्युत्थानसमाधिनिरोधसंस्कारैः सह स्वस्यां प्रकृतौ लीयते तदा च समाधिपरिपाकप्रभवेन वेदांतवाक्यजेन सम्यग्द
र्शनेनाविद्यायां निवृत्तायां तद्धेतुकदृग्दृश्यसंयोगाभावाद्वृत्तौपं चविधायामपि निवृत्तायां स्वरूपप्रतिष्ठः पुरुषः शुद्धः केव
लो मुक्त इत्युच्यते। तदुक्तं। तदा द्रष्टुः स्वरूपेऽवस्थानमिति। तदा सर्ववृत्तिनिरोधदशायां तु नित्यापरिणामिचैतन्यरूप निम
त्वेन तस्य सर्वदा शुद्धत्वेऽपि अनादिना दृश्यसंयोगेनाविद्यकेनांतःकरणतादात्म्याध्यासादंतःकरणवृत्तिसारूप्यं प्राप्नुवन्भो
क्तापि भोक्तेव दुःखानां भवति। तदुक्तं। वृत्तिसारूप्यमितरत्रेति। इतरत्र वृत्तिप्रादुर्भावे एतदेव विवृतं द्रष्टृदृश्योपरक्तं चित्तं सर्वा
र्थं चित्तमेव द्रष्टृदृश्योपरक्तं विषयिविषयनिर्भासं चेतनाचेतनस्वरूपापन्नं विषयात्मकमप्यविषयात्मकमिवाचेतनंमि मपि चेतन
वत्स्फटिकमणिकल्पं सर्वार्थमित्युच्यते तदनेन चित्तसारूप्येण भ्रांताः केचित्तदेव चेतनमित्याहुः। तदसंख्येयवासनाभिश्चि १२४
त्रमपि परार्थं संहत्यकारित्वात्। तस्य भोगापवर्गार्थत्वेन स्वस्य परार्थत्वेन नो संहतः पुरुषो न तु घटादिवत् संहत्यकारि चित्तं चेत
नमित्यर्थः। एवं च विशेषदर्शिन आत्मभावभावनानिवृत्तिः एवं यांतःकरणपुरुषयोर्विशेषदर्शनं तस्य यांतःकरणे प्रागविवेक

विशेषयोः
वशादात्मभावना आसीत्सा निवर्तते। भेददर्शने सत्यभेदभ्रमानुपपत्तेः। स च पुरुषयोर्विशेषदर्शनं च भगवदर्पितनिष्कामकर्मसाध्यं।
तल्लिंगं च योगभाष्ये दर्शितं। यथा प्रावृषि तृणांकुरस्योद्भेदेन तद्बीजसत्तानुमीयते। तथा मोक्षमार्गश्रवणेन सिद्धांतरुचिव
शात्। यस्य लोमहर्षाश्रुपातौ दृश्येते। तत्राप्यस्ति विशेषदर्शनबीजमपवर्गभागीयं कर्माभिनिर्वर्तितमित्यनुमीयते। यस्य
तु तादृशं कर्म बीजं नास्ति तस्य मोक्षमार्गश्रवणे पूर्वपक्षयुक्तिषु रुचिर्भवत्यरुचिश्च सिद्धांतयुक्तिषु तस्य कोऽहमासं कथमहमा
समित्यादिरात्मभावभावना स्वाभाविकी प्रवर्तते सा तु विशेषदर्शिनो निवर्तत इति। एवं सति किं स्यादिति तदाह। तदा विवेक
निम्नं कैवल्यप्राग्भारं चित्तं निम्नं जलप्रवहणयोग्यो नीचदेशः प्राग्भारस्तदयोग्य उच्चप्रदेशः चित्तं च सर्वदा प्रवर्तमानवृत्तिप्र
वाहेण प्रवहज्जलतुल्यं तदात्मानात्माविवेकरूपविमार्गवाहि विषयभोगपर्यंतमस्यासीदधुना त्वात्मानात्मविवेकमा
र्गवाहि कैवल्यपर्यंतं संपद्यत इति। अस्मिंश्चाविवेकवाहिनि चित्ते येंतरायास्ते सहेतुकाः निवर्तनीया इत्याह सूत्राभ्यां त
च्छिद्रेषु प्रत्ययांतराणि संस्कारेभ्यः। हानमेषां क्लेशवदुक्तं। तस्मिन्विवेकवाहिनि चित्ते छिद्रेष्वंतरालेषु प्रत्ययांतराणि व्युत्थानरू
पाण्यहं ममेत्येवंरूपाणि व्युत्थानानुभवजेभ्यः संस्कारेभ्यः क्षीयमाणेभ्योऽपि प्रादुर्भवंति एषां च संस्काराणां क्लेशानामिव हा
नमुक्तं यथा क्लेशा अविद्यादयो ज्ञानाग्निना दग्धबीजभावाः पुनश्चित्तभूमौ प्ररोहं प्राप्नुवंति। तथा ज्ञानाग्निना दग्धबीजभा
वाः संस्काराः प्रत्ययांतराणि न प्रसोतुमर्हंति। ज्ञानाग्निसंस्कारास्तु यावच्चित्तमनुशेरत इति। एवं च प्रत्ययांतरानुदयेन विवे
कवाहिनि चित्ते स्थिरीभूते सति प्रसंख्यानेऽप्यकुसीदस्य सर्वथा विवेकख्यातेर्धर्ममेघः समाधिः। प्रसंख्यानं सत्त्वपुरुषा

गी॰टी॰६ न्यताख्यातिः शुद्धात्मज्ञानमिति यावत् तत्र बुद्धेः सात्त्विके परिणामे कृतसंयमस्य सर्वेषां गुणपरिणामानां स्वामिवदाक्रमणं सर्वा
१२५ धिष्ठातृत्वं तेषामेव च शान्तोदिताव्यपदेश्यधर्मित्वेन स्थितानां यथावद्विवेकज्ञानं सर्वज्ञातृत्वं च विशोका नाम सिद्धिः फलं तद्वैराग्या
द्याच्च कैवल्यमुक्तं। सत्त्वपुरुषान्यताख्यातिमात्रस्य सर्वभावाधिष्ठातृत्वं सर्वज्ञातृत्वं च। तद्वैराग्यादपि दोषबीजक्षये कैवल्यमिति सूत्राभ्यां सर्वज्ञातृत्वं
तदेतदुच्यते। तस्मिन्नप्रसंख्याने सत्यप्यकुसीदस्य फलमलिप्सोः प्रत्ययान्तराणामनुदये सर्वप्रकारं विवेकख्यातेः परिपोषाद्धर्ममेघः
समाधिर्भवति। इज्याचारदमाहिंसादानस्वाध्यायकर्मणां। अयं तु परमो धर्मो यद्योगेनात्मदर्शनमिति स्मृतेर्धर्मं प्रत्यक्चैतन्य
सिं॰रति साक्षात्कारं मेहति सिंचतीति धर्ममेघस्तत्त्वसाक्षात्कारहेतुरित्यर्थः। ततः क्लेशकर्मनिवृत्तिः। ततो धर्ममेघात्समाधेर्मिथ्याक्लेशानां पञ्चवि
धानामविद्यास्मितारागद्वेषाभिनिवेशानां कर्मणां च कृष्णशुक्लकृष्णशुक्लभेदेन त्रिविधानामविद्यामूलानामविद्याक्षये
बीजक्षयादात्यन्तिकी निवृत्तिः कैवल्यं भवति कारणनिवृत्त्या कार्यनिवृत्तेरात्यन्तिकत्वौचित्याद् इत्यर्थः। एवं स्थिते युंजन्नेवं स
दात्मानमित्यनेन संप्रज्ञातः समाधिरेकाग्रभूमावुक्तः। नियतमानस इत्यनेन तत्फलभूतोऽसंप्रज्ञातसमाधिर्निरोधभूमावु
क्तः। शान्तिमिति निरोधसमाधिजसंस्कारफलभूतप्रशान्तवाहिता निर्वाणपरमामिति धर्ममेघस्य समाधेस्तत्त्वज्ञानद्वा
रा कैवल्यहेतुत्वं मत्संस्थामित्यनेनौपनिषदाभिमतं कैवल्यं दर्शितं। यस्मादेवं महाफलो योगस्तस्मात्तं महता प्रयत्ने
न संपादयेदित्यभिप्रायः १५ एवं योगाभ्यासनिष्ठस्याहारादिनियममाह द्वाभ्यां यदुक्तं सज्जीर्यति शरीरस्य च का १२५
र्यक्षमतां संपादयति तदात्मसम्मितमन्नं तदवति कृष्णलोभेनाधिकमश्नतो न योगोऽस्ति अजीर्णदोषेण व्याधिपीडितत्वा

द्देकान्तमनश्नतोऽपि नास्ति योगः [illegible] आहारासंपोषणाभावेन शरीरस्य कार्याक्षमत्वात् यदु वा आत्मसम्मितमन्नं
तदवति तन्न हिनस्ति यद्भूयो हिनस्ति तद्यत्कनीयो न तदवतीति शतपथश्रुतेः। तस्माद्योगी नात्मसंमितादन्नादधिकं न्यूनं वा
श्नीयादित्यर्थः [illegible] अपूरयेदशनेनार्द्धं तृतीयमुदकेन तु। वायोः संचरणार्थं तु चतुर्थमवशेषयेदित्यादियोगशास्त्रोक्तपरि
माणादधिकं [illegible] न्यूनं वा भुञ्जानस्य योगो न संपद्यत इत्यर्थः। तथातिनिद्राशीलस्यातिजाग्रतश्च योगो नैवास्ति हे अर्जुन सावधा
नो भवेत्यभिप्रायः। एवं चात्यल्पाहारादिकं समुच्चयार्थः अपरोक्तानुक्तसमुच्चयार्थः। यथा मार्कण्डेयपुराणे। नाध्मा दोष६
तः [illegible] तो न व्याकुलचेतनः। युंजीत योगं राजेन्द्र योगी सिद्ध्यर्थमात्मनः। नातिशीते न चैवोष्णे न द्वन्द्वे नानिलान्विते।

नात्यश्नतस्तु योगोऽस्ति न चैकान्तमनश्नतः न चातिस्वप्नशीलस्य जाग्रतो नैव चार्जुन १६
युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु युक्तस्वप्नावबोधस्य योगो भवति दुःखहा १७

कालेष्वेतेषु युंजीत न योगं ध्यानतत्परः इत्यादि १६ एवमाहारादिनियमविरहिणो योगव्यतिरेकमुक्त्वा तन्नियमव
तो योगान्वयमाह युक्तेति आह्रियत इत्याहारोऽन्नं विहरणं विहारः पादक्रमः तौ युक्तौ नियतपरिमाणौ यस्य तथा अन्येष्व
पि [illegible] जपाध्ययनादिषु कर्मसु युक्ता नियतकाला चेष्टा यस्य तथा स्वप्नो निद्रा अवबोधो जागरणं तौ युक्तौ
नियतकालौ [illegible] यस्य योगो भवति साधनपाटवात्समाधिः सिद्ध्यति नान्यस्य एवं प्रयत्नविशेषेण संपादितो योगः

गी॰टी॰६ किंफलं इत्यत्राह दुःखहेति। सर्वसंसारदुःखकारणाविद्यान्मूलनहेतुब्रह्मविद्योत्पादकत्वात्समूलसर्वदुःखनिवृत्तिहेतुरि
१२६ त्यर्थः। अत्राहारस्य नियतत्वं अर्द्धमशनस्य सव्यंजनस्य तृतीयमुदकस्य तु। वायोः संचारणार्थं तु चतुर्थमवशेषयेदित्या
दिशास्त्रोक्तं। विहारस्य नियतत्वं योजनान्न परं गच्छेदित्यादि। कर्मसु चेष्टाया नियतत्वं वागादिचापलपरित्यागः। रात्रेर्वि
भागत्रयं कृत्वा प्रथमांत्ययोर्जागरणं मध्ये स्वपनमिति स्वप्नावबोधयोर्नियतकालत्वं एवमन्येपि योगशास्त्रोक्ता नि
यमा द्रष्टव्याः १७ एवमेकाग्रभूमौ संप्रज्ञातसमाधिमभिधाय निरोधभूमावसंप्रज्ञातसमाधिं वक्तुमुपक्रमते यदा

यदा विनियतं चित्तमात्मन्येवावतिष्ठते निस्पृहः सर्वकामेभ्यो युक्त इत्युच्यते तदा १८

यस्मिन्काले परवैराग्यवशाद्विनियतं विशेषेण नियतं सर्वशून्यतामापादितं चित्तं विगलद्रजस्तमस्कमंतःकरणसत्वं स्व
च्छत्वात्सर्वविषयाकारग्रहणसमर्थमपि सर्वतो निरुद्धवृत्तिकत्वादात्मन्येव प्रत्यक्चिति अनात्मानुपरक्ते वृत्तिराहि
त्येपि स्वतः सिद्धस्यात्माकारस्य वारयितुमशक्यत्वात्तच्चितेरेव प्राधान्यात्तद्भूतं सदवतिष्ठते। निश्चलं भवति तदा
तस्मिन्सर्ववृत्तिनिरोधकाले युक्तः समाहित इत्युच्यते कः यः सर्वकामेभ्यो निस्पृहः। निर्गता दोषदर्शनेन सर्वेभ्यो दृ १२६
ष्टादृष्टविषयेभ्यः कामेभ्यः स्पृहा तृष्णा यस्येति परवैराग्यमसंप्रज्ञातसमाधेरंतरंगं साधनमुक्तं। तथा च व्याख्या
तं प्राक् १८

समाधौ निर्वृत्तिकस्य चित्तस्योपमानमाह। दीपचलनहेतुना वातेन रहिते देशे स्थितो दीपो यथा चलनहेतोरभावान्नेंगते न चलति
सोपमा स्मृता सदृष्टांतश्चिंतितो योगज्ञैः कस्य योगिन एकाग्रभूमौ संप्रज्ञातसमाधिमतोभ्यासपाटवात् यतचित्तस्य निरुद्धसर्व
चित्तवृत्तेरसंप्रज्ञातसमाधिरूपं योगं निरोधभूमौ युंजतोनुतिष्ठतो यत्र आत्मांतःकरणं तस्य निश्चलतया सत्वोद्रेकेण प्रकाशकत
या च निश्चलो दीपो दृष्टांत इत्यर्थः। आत्मनो योगं युंजत इति व्याख्याने दार्ष्टांतिकालाभः सर्वावस्थस्यापि चित्तस्य सर्वदात्माका
रतयाऽपदवैयर्थ्यं च। नहि योगेनात्माकारता चित्तस्य संपाद्यते किंतु स्वत एवात्माकारस्य सतोनात्माकारता निवर्त्यत इति।

यथा दीपो निवातस्थो नेंगते सोपमा स्मृता योगिनो यतचित्तस्य युंजतो योगमात्मनः १९
यत्रोपरमते चित्तं निरुद्धं योगसेवया यत्र चैवात्मनात्मानं पश्यन्नात्मनि तुष्यति २०

तस्मादार्ष्टांतिकप्रतिपादनार्थमेवात्मपदं। यतचित्तस्येति वा भावपरो निर्देशः कर्मधारयो वा यतस्य चित्तस्येत्यर्थः १९
एवं सामान्येन समाधिमुक्त्वा निरोधसमाधिं विस्तरेण विवरीतुमारभते। यत्रेत्यादि। यत्र यस्मिन्परिणामविशेषे योगसेवया योगा
भ्यासपाटवेन जाते सति चित्तं निरुद्धं एकविषयकवृत्तिप्रवाहरूपामेकाग्रतां त्यक्त्वा निरिंधनाग्निवदुपशाम्यति सर्ववृत्तिकत
या सर्ववृत्तिनिरोधरूपेण परिणतं भवति। यत्र च यस्मिंश्च परिणामे सति आत्मना रजस्तमोनभिभूतशुद्धसत्वमात्रेणां
तःकरणेनात्मानं प्रत्यक्चैतन्यं परमात्माभिन्नं सच्चिदानंदघनमनंतमद्वितीयं पश्यन्वेदांतप्रमाणजया वृत्त्या साक्षात्कुर्व

गी॰टी॰६ वैश्यात्मन्येव परमानंदघने तुष्यति न देहेंद्रियसंघातेन वा तद्भोग्येन्यत्र परमात्मदर्शने सत्यपि तुष्टिहेत्वभावात् तुष्यन्नेवेति वा। तमं
१२७ तःकरणपरिणामं सर्ववृत्तिनिरोधरूपं योगं विद्यादिति परेणान्वयः यत्रकाल इति तु व्याख्यानमसाधु तच्छब्दानन्वयात् २०
आत्मन्येव तोषे हेतुमाह यत्र यस्मिन्नवस्थाविशेषे आत्यंतिकमनंतं निरतिशयं ब्रह्मस्वरूपं अतींद्रियं विषयेंद्रियसंप्रयो
गानभिव्यंग्यं बुद्धिग्राह्यं बुद्ध्यैव रजस्तमोमलरहितया सत्वमात्रवाहिन्या ग्राह्यं सुखं योगी वेत्ति अनुभवति। यत्र च स्थितो यंवि
द्वांस्तत्वतः आत्मस्वरूपान्नैव चलति। तं योगसंज्ञितं विद्यादिति परेणान्वयः समानः। आत्यंतिकमिति ब्रह्मसुखस्वरूप
कथनं। अतींद्रियमिति विषयसुखव्यावृत्तिः। तस्य विषयेंद्रियसंयोगसापेक्षत्वात्। बुद्धिग्राह्यमपि सौषुप्तसुखव्यावृत्तिः

सुखमात्यंतिकं यत्तद्बुद्धिग्राह्यमतींद्रियं वेत्ति यत्र न चैवायं स्थितश्चलति तत्वतः २१

सुषुप्तौ बुद्धेर्लीनत्वात् समाधौ निरुद्धवृत्तिकायास्तस्याः सत्वात्। तदुक्तं गौडपादैः। लीयते तु सुषुप्तौ तन्निगृहीतं न लीयत इति।
तथा च श्रूयते। समाधिनिर्धूतमलस्य चेतसो निवेशितस्यात्मनि यत्सुखं भवेत्। न शक्यते वर्णयितुं गिरा तदा यदेतदंतःक
रणेन गृह्यत इति। अंतःकरणेन निरुद्धसर्ववृत्तिकेनेत्यर्थः। तत्यात्तु सुखास्वादनं गौडाचार्यैस्तत्र प्रतिषिद्धं। नास्वादयेत्सु राम॰
खं तत्र निःसंगः प्रज्ञया भवेदिति। महदिदं समाधौ सुखमनुभवामीति सविकल्पवृत्तिरूपा प्रज्ञा सुखास्वादः तं व्युत्थानरू १२८
पत्वेन समाधिविरोधित्वात् योगी न कुर्यात्। अत एवमेतादृश्या प्रज्ञया सह संगं परिसृजेत् तां निरुंध्यादित्यर्थः। निर्वृत्तिकेन
तु चित्तेन स्वरूपसुखानुभवस्तैः प्रतिपादितः। स्वस्थं शांतं सनिर्वाणमकथ्यं सुखमुत्तममिति। स्पष्टं चैतदुपरिष्टात्करिष्यते
२१

यत्र न चैवायं स्थितश्चलति तत्वतस्तदुक्तमुपपादयति। एवं निरतिशयात्मसुखव्यंजकं निर्वृत्तिकचित्तावस्थाविशेषं के आसक्ते
ताभ्यासपाटवाल्लब्ध्वा संपाद्य अपरं लाभं ततोधिकं न मन्यते। कृतं कृत्यं प्राप्तं प्रापणीयमात्मलाभान्न परं विद्यत इति स्मृतेः। तत्रैव
च योगकाले तया समाधेर्विघ्नकरणं नास्त्येव शीतवातमशकाद्युपद्रवनिवारणार्थमपि तन्नास्तीत्याह। यस्मिन्नात्मसुखे
सुखमये निर्वृत्तिकचित्तावस्थाविशेषे स्थितो योगी गुरुणा महता शस्त्रनिपातादिनिमित्तेन महतापि दुःखेन न विचा
ल्यते किंचिदपीत्यर्थः। २२ यतो परमानंदस्वरूपस्य अभिव्यंजकोऽयं निर्वृत्तिकः परमानंदाभिव्यंजकश्चित्तावस्था

यं लब्ध्वा चापरं लाभं मन्यते नाधिकं ततः यस्मिन्स्थितो न दुःखेन गुरुणापि विचाल्यते। २२
तं विद्याद्दुःखसंयोगवियोगं योगसंज्ञितम् स निश्चयेन योक्तव्यो योगोऽनिर्विण्णचेतसा २३

विशेषस्तं कर्तव्यं सर्ववृत्तिनिरोधं चित्तवृत्तिमयस्य दुःखविरोधित्वेन दुःखवियोगमेव संतं योगसंज्ञितं योगश
ब्दाहमपि विसंधिपरूपकवायोगपदलक्षणाभिधाज्ञानीयान्तु योगशब्दानुरोधात् किंचिद्भिन्नं तं प्रतिपादितमित्यर्थः। त
था च भगवान्पतंजलिः सूत्रयत् योगश्चित्तवृत्तिनिरोध इति योगो नव तु दुःखहेतिमत्तां गुणं तदेतदुपसंहर्ता।
एवं महायोगो निश्चयानिर्वेदयोः साधनत्वविधानायाह। स यथोक्तफलो योगो निश्चयेन शास्त्राचार्यवचनतात्प
र्यविषय एवार्थः सत्य एवेत्यध्यवसायेन योक्तव्योऽभ्यसनीयः। अनिर्विण्णचेतसा एतावतापि कालेन योगो न सिद्धः

गी॰टी॰६ किं मनः पर्यक... हमित्यनुतापो निर्वेदस्तद्रहितेन चेतसा इह जन्मनि जन्मांतरे वा सेत्स्यति किं त्वरयेत्येवं धैर्ययु-

१२८ क्तेन मनसेत्यर्थः। तदेतद्गौडपादा उदाजह्रुः उत्सेक उदधेर्यद्वत्कुशाग्रेणैकबिंदुना। मनसो निग्रहस्तद्वद्भवेदपरिखे-

दतः इति। उत्सेक उत्सेचनं शोषणाध्यवसायेन जलोद्धरणमिति यावत्। अत्र संप्रदायविद आख्यायिकामाचक्षते। कस्य-

चित्किल पक्षिणो अंडानि तीरस्थानि तरंगवेगेन समुद्रोपजहार। स च समुद्रं शोषयिष्याम्येवेति प्रवृत्तः स्वमुखाग्रेणै-

उपरि कैकं जलबिंदुं प्रचिक्षेप। तदा च बहुभिः पक्षिभिर्बंधुवर्गैर्वार्यमाणोपि नैवोपरराम। यदृच्छया च तत्रागतेन नारदे-

न निवारितोप्यस्मिन् जन्मनि जन्मांतरे वा येन केनाप्युपायेन समुद्रं शोषयिष्याम्येवेति प्रतिजज्ञे। ततश्च दैवानुकू-

ल्यात् कृपालुर्नारदो गरुडं तत्साहाय्याय प्रेषयामास। समुद्रस्त्वज्ज्ञातिद्रोहेण त्वामवमन्यत इति वचनेन ततो

गरुडपक्षवातेन शुष्यन् समुद्रो भीतस्तान्यंडानि तस्मै पक्षिणे प्रददाविति। एवमखेदेन मनोनिरोधे परमधर्मे प्र-

वर्तमानं योगिनमीश्वरोऽनुगृह्णाति ततश्च पक्षिण इव तस्याभिमतं सिध्यतीति भावः॥ २३॥ किं च बहुधा योगोभ्यस-

न नीयः। संकल्पाद्दुष्टेष्वपि विषयेषु शोभनत्वदर्शनं शोभनाध्यासः तस्माच्च संकल्पादिदं मे स्यादिदं मे स्यादित्येवं- १२८

रूपाः कामाः प्रभवंति। तान् शोभनाध्यासप्रभवान् विषयाभिलाषान् विचारजन्याशोभनत्वनिश्चयेन शोभ-

नाध्यासबाधाद् दृष्टेषु स्रक्चंदनवनितादिष्वदृष्टेषु वैकुंठलोकपारिजातादिषु रः प्रभृतिषु वांतपायसवत् अ

अत एव सर्वान् ब्रह्मलोकपर्यंतान् अशेषतः निरवशेषान् सवासनांस्त्यक्त्वा अत एव कामपूर्वकत्वादिंद्रियप्रवृत्तेस्तदपाये स-

ति विवेकयुक्तेन मनसैवेंद्रियग्रामं चक्षुरादिकरणसमूहं विनियम्य समंततः सर्वेभ्यो विषयेभ्यः प्रत्याहृत्य शनैः शनैरुपर-

मेदित्यन्वयः॥ २४॥ भूमिकाजयक्रमेण शनैः शनैरुपरमेत् धृतिर्धैर्यमखिन्नता तया गृहीतया बुद्ध्या अवश्यकर्तव्यतानि-

श्चयरूपया यदा कदाचिदवश्यं भविष्यत्येव योगः किं त्वरयेत्येवंरूपया शनैः शनैर्गुरूपदिष्टमार्गेण मनो निरुंध्या-

देतेनानिर्वेदनिश्चयो प्राग्युक्तो दर्शितः। तथा च श्रुतिः यच्छेद्वाङ्मनसी प्राज्ञस्तद्यच्छेज्ज्ञान आत्मनि। ज्ञानमात्मनि महति

संकल्पप्रभवान्कामांस्त्यक्त्वा सर्वानशेषतः। मनसैवेंद्रियग्रामं विनियम्य समंततः॥ २४॥

शनैः शनैरुपरमेद्बुद्ध्या धृतिगृहीतया। आत्मसंस्थं मनः कृत्वा न किंचिदपि चिंतयेत्॥ २५॥

ति नियच्छेत्तद्यच्छेच्छांत आत्मनीति। वागिति वाचं लौकिकीं वैदिकीं च मनसि व्यापारवति नियच्छेत्। नानुध्यायाद्बहूञ्-

शब्दान्वाचो विग्लापनं हि तदिति श्रुतेर्वाग्वृत्तिनिरोधेन मनोवृत्तिमात्रशेषो भवेदित्यर्थः। चक्षुरादिनिरोधोप्येतस्यां

भूमौ द्रष्टव्यः। मन इति छांदसं दैर्घ्यं। मनः कर्मेंद्रियज्ञानेंद्रियसहकारि नानाविधविकल्पसाधनं करणं तज्ज्ञाने जानाती-

ति ज्ञानमिति व्युत्पत्त्या ज्ञातर्यात्मनि ज्ञातृत्वोपाधावहंकारे नियच्छेत् मनोव्यापारान्परित्यज्याहंकारमात्रं परिशेषयेत्।

गी॰टी॰६
१२९

तज्ज्ञाने ज्ञातृत्वोपाधिमहंकारमात्मनि महति महत्त्वे सर्वव्यापके नियच्छेद्द्विविधो ह्यहंकारो विशेषरूपः सामान्यरूपश्चेति अय
महमेतस्य पुत्र इत्येवं व्यक्तमभिमन्यमानो विशेषरूपो व्यष्ट्यहंकारः अस्मीत्येतावन्मात्रमभिमन्यमानः सामान्यरूपः सम
ष्ट्यहंकारः स च हिरण्यगर्भो महानात्मेति च सर्वानुस्यूतत्वादुच्यते ताभ्यामहंकाराभ्यां विविक्तो निरुपाधिकः शान्त आत्मा सर्वा
न्तरश्चिदेकरसस्तस्मिन्महान्तमात्मानं समष्टिबुद्धिं नियच्छेदेवं तत्कारणमव्यक्तमपि नियच्छेत्ततो निरुपाधिकस्त्वंपदलक्ष्यः
शुद्ध आत्मा साक्षात्कृतो भवति शुद्धे हि विवेकरहिते प्रत्यगात्मनि ग्राह्यग्राहकरूपमनिर्वाच्यमव्यक्तं प्रकृतिरुपाधिः सा च प्र
सामान्याहंकाररूपं महत्तत्त्वं नाम पृथ्वीया कार्यं भवति ततो बहिर्विशेषाहंकाररूपेण ततो बहिर्मनोरूपेण ततो बहिर्वागा
दीन्द्रियरूपेणातदेतत्कृत्वाभिहितं। इन्द्रियाणि पराण्याहुरिन्द्रियेभ्यः परं मनः। मनसस्तु परा बुद्धिर्बुद्धेः परतस्तु सः। बुद्धे
रात्मा महान्परः। महतः परमव्यक्तमव्यक्तात्पुरुषः परः। पुरुषान्न परं किंचित्सा काष्ठा सा परा गतिरिति। तत्र गवादिष्विव
वाङ्निरोधः प्रथमा भूमिः बालमुग्धादिष्विव निर्मनस्त्वं द्वितीया तंद्रामिवाहंकाररहितत्वं तृतीया सुषुप्ताविव महत्त्वराहि ॥ दावि
त्यं चतुर्थी तदेतद्भूमिचतुष्टयमपेक्ष्य शनैः शनैरुपरमेदित्युक्तं यद्यपि महत्त्ववशान्तात्मनो मध्ये महत्त्वोपादानमव्याक
तात्त्विकं वंशकस्ती दाहारितथापितत्वमहत्त्वस्य नियमं नाभ्यधायि सुषुप्ताविव स्वरूपलयप्रसंगात्तस्याः कर्मकृये सतिपु १२९
रुषप्रयत्नमन्तरेण स्वत एव सिद्धत्वात् तत्त्वदर्शनानुपयोगित्वाच्च। दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिरिति पूर्वम

पूर्वमभिधाय सूक्ष्मत्वसिद्धये निरोधसमाधिरभिधानात्तत्त्ववत्त्वदृष्टौ दर्शनसाधनत्वेन दृष्टतत्त्वस्य च जीवन्मुक्तिरूपक्ले
शकृतयापोहितानुशान्तात्मन्यवरुद्धस्य चित्तस्य परोक्षविहितत्वेन सुषुप्तिवन्न दर्शनहेतुत्वमिति चेत् न स्वतः सिद्धस्य दर्शन
स्य निवारयितुमशक्यत्वात्। तदुक्तं आत्मानात्माकारं स्वभावतो वस्थितं सदा चित्तं। आत्मैकाकारतया तिरस्कृतानात्मदृष्टिर्वि
दधीत। यथा घट उत्पद्यमानः स्वतो वियत्पूर्ण एवोत्पद्यते जलतंडुलादिपूरणं त्वस्य घटस्योत्पन्नस्य पुरुषप्रयत्नेन भवति तत्र जला
दीनि निःसारितेऽपि वियन्निःसारयितुं न शक्यते मुखपिधानेऽप्यन्तर्वियद्वतिष्ठत एव तथा चित्तमुत्पद्यमानं चैतन्यपूर्णमेवोत्पद्यते
उत्पन्ने तु तस्मिन्मूषानिषिक्तद्रुतताम्रवद्घटादिरूपत्वं भोगहेतुधर्माधर्मसहकृतसामग्रीवशाद्भवति तत्र घटादिः स्व
नात्माकारविरामप्रत्ययाभ्यासेन निवारितेऽपि निर्निमित्तश्चिदाकारो वारयितुं न शक्यते ततो निरोधसमाधिनानात्मकेनवि
तेन संस्कारमात्रशेषतयातिसूक्ष्मत्वेन निरुपाधिकश्चिदात्ममात्राभिमुखत्वाद्विनिर्विघ्नेनात्मानुभवनेन तदेतदा
ह। आत्मसंस्थं मनः कृत्वा न किंचिदपि चिंतयेदिति। आत्मनि निरुपाधिके प्रतीचि संस्था समाप्तिर्यस्य तदात्मसंस्थं सर्वका
रणनिवृत्त्या स्वभावसिद्धात्माकारमात्रविशिष्टं मनः कृत्वा धृतिगृहीतया विवेकबुद्ध्या संपाद्य संप्रज्ञातसमाधिस्थः
सन् किंचिदपि अनात्मानमात्मानं वा न चिंतयेत् समाधिस्थैर्याय कामपि चित्तवृत्तिं नोत्पादयेदित्यर्थः। २५
एतेन रूपस्याविषयीकुर्यात् अनात्माकारवृत्तेर्हि व्युत्थानमेव स्यात् आत्माकारवृत्तेश्च संप्रज्ञातः समाधिरित्यसंप्रज्ञात॰

गी॰टी॰६ [illegible]वेरोध[illegible]कुर्वन्योगी [illegible]दीनां [illegible]विक्षेप[illegible]हेतूनां[illegible] यतो यस्मा[illegible] [illegible]हारागे
१२० [illegible]संचल[illegible]दिकु[illegible]संस्तत मनो निश्चरति विक्षिप्तं [illegible]विषयाभिमुखी प्रमाणविपर्ययविकल्पस्मृतीनामन्यतम
[illegible]पि समाधिविरोधिनी [illegible]निद्रुलाद्यपि [illegible]हेतूनां निद्राशेष[illegible]प्रमादीनां मध्ये [illegible]यतो निमित्ता[illegible]
[illegible]मनो [illegible]निश्चरति लीनं सत्समाधि[illegible]रोधिनीं निद्रा[illegible] [illegible]लादयति तत [illegible] निक्षेप निमित्ता[illegible]
[illegible] [illegible]मनो निरोद्धव्यं [illegible] [illegible]वेत निरुंध्यात् यथा न विक्षि

यतो यतो निश्चरति मनश्चंचलमस्थिरम् तत
स्ततो नियम्यैतदात्मन्येव वशं नयेत २६

प्येत न वा लीयेतेति एवकारो ना[illegible]गोचरत्वं [illegible]समाधेर्विषयतिरस्कार[illegible]विता[illegible]र्यपादैः उपायेन निगृह्णीयाद्विक्षि श्रम॰
[illegible]कामभोगयोः सुप्रसन्नं लयेयेव [illegible] [illegible]नुस्मृत्य कामभोगान्निवर्तयेत् [illegible]सर्व १२०
मनुस्मृत्य जातं नैव तु पश्यति [illegible]यत्संबोध[illegible] [illegible]लयेत्पुनः सकषायं विजानीयात्समप्राप्तं न चालयेत्
नास्वादयेत्सुखं तत्र निः[illegible] [illegible] [illegible]कीकुर्यात् प्रयत्नतः यदा न लीयते चित्तं न

न च विक्षिप्यते पुनः अलिंगनम नाभासं निष्पन्नं ब्रह्म तत्तदा इति तथा गौडपादीयश्लोकैः उपायेन वक्ष्यमाणेन वैराग्याभ्यासेन काम[illegible]
[illegible]विपर्ययविकल्पस्मृतीनामन्यतमयापि [illegible] तं मनो निगृह्णीयात् निरुंध्यात् आत्मन्येवेत्यर्थः कामभोगयोः [illegible]
[illegible]मानावस्था [illegible]मानावस्था भेदेन द्विवचनं तथा लीयते[illegible]सुषुप्तं तस्मिन्सुषुप्रसन्नं आयासवर्जितं [illegible]
निगृह्णीयादेव प्रसुप्तं नवेत् कुतो निगृह्णीते तत्राह यथा कामो विषयगोचर प्रमाणादि[illegible]लादनेन समाधिविरोधीति तथा[illegible] उ
[illegible]लादनेन समाधिविरोधी सर्ववृत्तिनिरोधो हि समाधिः अतः कामादिकृतविक्षेपादिवल्लयादिकृत[illegible]
[illegible]निरोद्धव्यमित्यर्थः १ उपायेन निगृह्णीयात् केनेत्युच्यते सर्वं द्वैतमविद्याविजृंभितमल्पं दुःखमेवे[illegible]
[illegible]सुखं [illegible]सुखमस्ति अथ यदल्पं तन्मर्त्यं [illegible]दुःखमिति श्रुत्यर्थगुरूपदेशादनुपश्चादालयीलोच्य कामान्वंत्वमानाव
स्थान्विषयानुभोगाननुभूयमानावस्थांश्चविषयान्निवर्तयेत् मनसः सकाशादिति कामभोगश्च काम भोगं तस्मान्मनो शेषः
[illegible]दिति [illegible]एवं द्वैतस्मरणकाले वैराग्यभावनोपायइत्यर्थः द्वैतविस्मरणं तु परमोपाय इत्याह अजं [illegible]सर्वं [illegible]
ते[illegible]किंचिदस्तीति शास्त्राचार्योपदेशानंतरमनुस्मृत्य [illegible]पनीतं द्वैतजातं न पश्यत्येव अधिष्ठानेशालेकल्पितस्याभा^ वा
[illegible]कुरयस्य वस्त्वर्थं स्लेशाव [illegible]एवं वैराग्यभावनात्मदर्शनाभ्यां [illegible]ये भोनिवर्त्यमानं चित्तं यदि दि
[illegible] [illegible]वशाद्विषयाभिमुखं भवेत्तदा निद्राशेषं [illegible] [illegible]नेनिर्विशेषेण [illegible]समकु
[illegible] [illegible] [illegible]मानं दैनंदिन [illegible]प्यासवशा कामभोगे [illegible] [illegible]स्यात्तदा [illegible]

१२८ ...व[illegible]कारेणवपुः[illegible]जेत्[illegible]वंपुनःपुनरभ्यासतोलयात्संबोधितंविषयेभ्यःप्रत्यावर्तितं[illegible]दालावस्थं प
[illegible]सकषायं[illegible]बलवासनावशेन[illegible]भावाख्यंकषायदोषेण[illegible]
[illegible]समाहितमिप्यवगम्य[illegible]यामि[illegible]निरुध्यात्[illegible]जयबि[illegible]
[illegible]तज्ञान[illegible]समं[illegible]लक्षणमप्राप्तविर्तकबायलयात्यानबालयेत्[illegible]सुखं[illegible]
बाविषुपरि[illegible]विशेष[illegible]समंत्र[illegible]तस्थापयेत्[illegible]तत्रसमाधेयपरमसुख[illegible]
किंचुध्यतिगृहीतस्तयाबुद्ध्या[illegible]प्राप्ते[illegible]तस्यामेवसम[illegible]यत्नेनस्थापयेत् २ तत्रसमाधेयपरमसुख[illegible]
विसुखंनास्वादये[illegible]तावंतकाल[illegible]सुखास्वाद[illegible]माधिभंगप्रसंगात्[illegible]कर्तव्या[illegible]
यदुक्तंप्रज्ञोसुखंतदविद्यापरिकल्पितम[illegible]भावनया[illegible]निःस्पृहःसर्वसुखेषुभवेत् अथवा[illegible]यास[illegible]कल्पसु
खाकार[illegible]सहसंपरित्यज्य[illegible]सुखरूप[illegible]निर्विर्तिकनचित्तेन[illegible]भावप्राप्तस्य[illegible]
प्रशान्तात[illegible]सर्वतोनिवर्त्य[illegible]प्रयत्नवशेनकृत[illegible]भावबाधात्[illegible]यानिश्चल[illegible]
स्वीकुर्यादित्युक्तं[illegible]निरोधप्रयत्नेनसमंत्र[illegible]त[illegible]येत् ४ समप्राप्त[illegible]दृशस्थितु[illegible]
भवति[illegible]साम्येनलयशब्देनैवस्तब्धीभावरूपोपलक्षणात्[illegible]पुनः[illegible]शब्दाद्याकार[illegible]
[illegible]रात[illegible]साम्येनसुखास्वाद[illegible]शब्देनोपलक्षणात्पूर्व[illegible]
[illegible]सुखास्वाद[illegible]दिगीव[illegible]हि[illegible]
न
रा.म.
१२९

[illegible]मधीयकल्वं[illegible]भासेन[illegible]यस्ताभ्याद[illegible]कषायसुखास्वादयो[illegible]एवयदैवंक्षेपवत्तु
[illegible]एतत्त्रयोरूपोयोगः[illegible]प्रतिपादितः। यतःपंचावर्ति
[illegible]बुद्धिश्चनविचेष्टितां[illegible]योगमनिमन्यंतेस्थिरामिंद्रियधारणां[illegible]
[illegible]वाप्ययाविति[illegible]एतन्मूलकमेवयोग[illegible]तस्माद्युक्तं[illegible]
[illegible]दिति २६ एवंयोगाभ्यासबलात्[illegible]प्रकर्षेण[illegible]
[illegible]प्रशांतमनसंहृतिश[illegible]निर्मनस्कं[illegible]हेतुगर्भविशेषण[illegible]शांतरजस

प्रशांतमनसंह्येनंयोगिनंसुखमुत्तमम्। उपैतिशां
तरजसंब्रह्मभूतमकल्मषम् २७

मकल्मषं[illegible]तिं[illegible]तम्[illegible]सत्त्वमो[illegible]शांतरजसमि
[illegible]ब्रह्मभूतं[illegible]समत्र
[illegible]एवंयोगिनं[illegible]निरतिशयंसुखमुपैत्युपगच्छति[illegible]
[illegible]सिद्धि[illegible]सुखंयः
[illegible]एवमेव[illegible]

गी॰टी॰ ९
१३२

[illegible] कल्मषः विगतमलः संसारहेतुध[illegible] यालेन [illegible] सर्वातिशयनिर[illegible]
म[illegible] याश्योगेनिसरूअत[illegible] क्ष्यासस्याशि[illegible] प्रमिलितइत्यंतस[illegible] छेदा
न[illegible] विधायसुख[illegible] निर्विशेषविकल्परूपविलक्षणम[illegible] विरूपेहनि
[illegible] सर्वात्सर्ववा[illegible] सुखानुभवः समाधावेव[illegible] अत्रचा
[illegible] निरुद्धसिद्धकाले[illegible]तरायादर्शिता[illegible] शयप्रमादाल[illegible] भ्रांतिदर्शनाल[illegible]
भूमिक[illegible]नवस्थित[illegible]निविक्षेपा[illegible] विक्षि[illegible] नयंतीतिचित्त[illegible] प्रतिप[illegible]

युं[illegible]नं योगी [illegible]तकल्मषः सुखेन
ब्रह्मसंस्पर्श[illegible] सुखमश्नुते ॥ २८ ॥

[illegible] एवनेतावद्भिर्विघ्नै[illegible] हवरिर्ययात[illegible]
[illegible] विषम[illegible] कालवकागेऽस्य[illegible] आसनादि[illegible]नहेतेति[illegible]
[illegible] नीयोनवेत्य[illegible] विप[illegible]तगतो[illegible] भय[illegible]
[illegible] स्पर्शिवत्स्था[illegible] व्यास्त्रविपर्या[illegible] प्रमादः सम[illegible] धनानामनुष्ठा[illegible]
[illegible] उदासीन्यमिति यावत्[illegible] सला[illegible] दासीन्य[illegible] राम॰ १३२

[illegible] निरोधाय[illegible] कायचित्तयोर्गुरुत्वं[illegible] ला असिक्रमपि योगविषये प्रवृत्त्यभावेन बोधि। अविरतिश्चित्तस्य विषय
विशेषे[illegible] भ्रांतिदर्शनं योगसाधनेऽपि तत्साधन चबुद्धिः[illegible] तत्साधनेऽप्यसाधनबुद्धिः। अलब्धभूमि
कत्वं समाधि[illegible] एकाग्र[illegible] अलाभः[illegible] यावत्। अनवस्थितत्वं लब्धायामपि समाधिभूमौ प्रय[illegible]
श्चैथिल्यात् चित्तस्य तत्राप्रतिष्ठितत्वं। तत्त एते चित्तविक्षेपान् योगमलायोगप्रतिपक्षा योगांतरायादिति चाभिधीयंते। दुःखदो
र्मनस्यांग[illegible] मेजयत्वश्वासप्रश्वासा विक्षेपसहभुवः[illegible] चित्तस्य राजसः परिणामो बाधनालक्षणः। तच्चाध्यात्मिकं शारी
रं मानसं च व्याधिवशात् कामादिवशाच्च भवति। आधिभौतिकं व्याघ्रादिजनितं आधिदैविकं ग्रहपीडादिजनितं द्वेषात्मवि
षयत्वेन हेतुत्वात् समाधिविरोधि दौर्मनस्यम्[illegible] दुःखानुभवजनितश्चित्तस्य तामसः परिणामविशेषः
क्षोभापरपर्यायः स्तब्धीभावः सतु[illegible] योगविरोधी। अंगमेजयत्वमंगकंपनमासनस्थैर्यविरोधि।
प्राणेन बाह्यस्य वायोरंतः प्रवेशनं श्वासः समाधिरंगरेचकविरोधी प्राणेन कौष्ठ्यस्य वायोर्बहिर्निःसारणं प्रश्वासः स
माध्यंगपूरकविरोधी[illegible] आहितचेतस्य[illegible] विक्षेपसहभुवो[illegible] एते[illegible]
सवैराग्याभ्यासनिरोद्धव्याः। ईश्वर[illegible] समाधिलाभे प्रक्तते ईश्वरप्रणिधानाद्वेतिपद[illegible]
तदुक्त्वा प्रणिधेयमीश्वरं[illegible] शयेन[illegible] पुरुषविशेष ईश्वरः। तत्र निरतिशयं सर्वज्ञबीजं। सर्वेषा
मपि गुरुः कालेनानवच्छेदात्[illegible] प्रतिपा[illegible] प्रणिधानं[illegible] तस्य वाचकः प्रणवः। तज्ज

गी०टी० ६
१३२

परस्तदर्थभावनं मिति। ततः प्रत्यक्चेतनाधिगमोऽप्यन्तरायाभावश्चेति। ततः प्रणवजपरूपात्तदर्थध्यानरूपाच्चेश्वरप्रणिधानात्
प्रत्यक्चेतनस्य पुरुषस्य प्रकृतिविवेकेनाधिगमः साक्षात्कारो भवति। उक्तानामन्तरायाणामभावोऽपि भवतीत्यर्थः। अभ्यासवैरा
ग्याभ्यामन्तरायनिवृत्तौ कर्तव्यायामभ्यासदार्ढ्यार्थमाह। तत्प्रतिषेधार्थमेकतत्त्वाभ्यासः। तेषामन्तरायाणां प्रतिषेधार्थमेक
स्मिन्कस्मिंश्चिदभिमते तत्त्वेऽभ्यासश्चेतसः पुनःपुनर्निवेशनं कार्यं तथा। मैत्रीकरुणामुदितोपेक्षाणां सुखदुःखपुण्यापुण्य
विषयाणां भावनातश्चित्तप्रसादनं। मैत्री सौहार्दं। करुणा कृपा। मुदिता हर्षः। उपेक्षा औदासीन्यं। सुखादिशब्दैस्तद्वं
तः प्रतिपाद्यन्ते सर्वप्राणिषु सुखसंभोगापन्नेषु साध्वेतन्मम मित्राणां सुखित्वमिति मैत्रीं भावयेन्न त्वीर्ष्यां। दुःखितेषु कथं नु
नामैषां दुःखनिवृत्तिः स्यादिति कृपामेव भावयेन्नोपेक्षां न वा हर्षं। पुण्यवत्सु पुण्यानुमोदनेन हर्षं कुर्यान्न तु विद्वेषं न
चोपेक्षां। अपुण्यवत्सु चौदासीन्यमेव भावयेन्नानुमोदनं न वा द्वेषं एवमस्य भावयतः शुक्लो धर्म उपजायते ततश्च विगतराग
द्वेषादिमलं चित्तं प्रसन्नं सदेकाग्रतायोग्यं भवति मैत्र्यादिचतुष्टयं चोपलक्षणं [illegible] इत्यादीनाममानित्वम
दम्भित्व[illegible]आदीनां च धर्माणां सर्वेषामेतेषां शुभवासनारूपत्वेन मलिनवासनानिवर्तकत्वात् रागद्वेषौ महाशत्रू सर्वपु
रुषार्थप्रतिबन्धकौ महता प्रयत्नेन परिहर्तव्यावित्येतदर्थमाह। [illegible] उपायाश्चित्तप्रसादनाय
दर्शिताः। तदेतच्चित्तप्रसादनं भवन्ति दुःखहेतोर्यस्य जातं तत्प्रत्यवेतद्भवनं सुखे[illegible]मनःप्रशमानुपपत्तेः २८

श्लो०
रा०
१३३

॥सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि। ईक्षते योगयुक्तात्मा सर्वत्र समदर्शनः॥२९॥

तदेवं निरोधसमाधिना त्वंपदलक्ष्ये तत्पदलक्ष्ये च शुद्धे साक्षात्कृते तदैक्यगोचरा तत्त्वमसीति वेदान्तवाक्यजन्या निर्विकल्पक
साक्षात्काररूपा ब्रह्मविद्याभिधाना जायते ततश्च कृत्स्नाविद्यातत्कार्यनिवृत्त्या ब्रह्मसुखमत्यन्तमश्नुत इत्युपपादयन्
त्रिभिः श्लोकैः तत्र प्रथमं त्वंपदलक्ष्योपस्थितिमाह। सर्वेषु भूतेषु स्थावरजंगमेषु शरीरेषु भोक्तृतया स्थितमेकमेव नि
त्यं विभुमात्मानं प्रत्यक्चेतनं साक्षिणं परमार्थसत्यमानन्दघनं साक्ष्येभ्योऽनृतजडपरिच्छिन्नदुःखरूपेभ्यो विवेकेन लक्षितं सा
क्षात्करोति तस्मिंश्चात्मनि साक्षिणि सर्वाणि भूतानि साक्षिरूपाण्याध्यासिकेन संबन्धेन भोग्यतया कल्पितानि साक्षिसाक्ष्ययोः
संबन्धान्तरानुपपत्तेर्मिथ्याभूतानि परिच्छिन्नानि जडानि दुःखात्मकानि साक्षिणो विवेकेन लक्षितः कः। योगयुक्तात्मा योगेन निर्वि
चारवैशारद्यरूपेण युक्तः प्रसादं प्राप्त आत्मान्तःकरणं यस्य स तथा। तथा च पातंजलं सूत्रं। निर्विचारवैशारद्येऽध्यात्म
प्रसादः। ऋतंभरा तत्र प्रज्ञा। श्रुतानुमानप्रज्ञाभ्यामन्यविषया विशेषार्थत्वादिति। तथा च श्रुतानुमानागोचरं यथार्थं
विशेषवस्तुगोचरयोगजप्रत्यक्षेण ऋतंभरसंज्ञेन युगपत्सूक्ष्मं व्यवहितं विप्रकृष्टं च सर्वं तुल्यमेव पश्यतीति। सर्वत्र समं
दर्शनं तस्येति सर्वत्र समदर्शनः स आत्मानमनात्मानं च योगयुक्तात्मा यथावस्थितमीक्षत इति युक्तं। अथवा यो योगयु
क्तात्मा यो वा सर्वत्र समदर्शनः स आत्मानमीक्षत इति योगिसमदर्शिनावात्मेक्षणाधिकारिणावुक्तौ। यथा हि चित्तवृत्ति
निरोधः साक्षिसाक्षात्कारहेतुः। तथा जडविवेकेन सर्वानुस्यूतचैतन्यपृथक्करणमपि नावश्यं योग एवापेक्षितः। अतएवूबसि आह

गी॰ ६ ष्टः। लोकमोविक्लनाशस्ययोगोन्तानंबराघव योगोवृत्तिनिरोधेनि[illegible]ज्ञानसम्यग्निकृष्टो। असाध्यकस्यचिद्योगः
१३५ कस्यचित्तत्वनिश्चयः। प्रकारौद्वौततोदेवोजगादपरमःशिवइति। चित्तेनाधास्यसाक्षिणःसकाशात्तदुपाधिभूतचि
[illegible]कृष्टान्तदर्शनस्यतस्यचोपायइत्यर्थः। एकोऽसंप्रज्ञातसमाधिःसंप्रज्ञातसमाधौहिआत्मेकाकारत्वे
[illegible]इयुक्तमनःकरणासर्वसाक्षितानुभूयतेनिरूद्धसर्ववृत्तिकंतूपशांतत्वानानुभूयतइतिविशेषः। द्वितीय
स्तुसाक्षिणिकल्पितंसाक्ष्यमन्तत्वान्नास्त्येवसाक्ष्येवतुपरमार्थसत्यःकेवलोद्वितीयइति[illegible]। तत्रप्रथम
मुक्ता[illegible]परमार्थतावादिनो[illegible]पाक्षिके[illegible]तेषांपरमार्थस्यचित्तस्यादर्शनेनसाक्षिदर्शनेनि
[illegible]निर्विकोपायासंभवात्। श्रीमच्छंकरभगवत्पूज्यपादमतोपजीविनस्त्वौपनिषदाःप्रपंचान्ततवादिनोद्वि
[illegible]बोधायप्रवृत्ताः। निरंशाधिष्ठानज्ञानशर्वोपरितत्रकल्पितस्यबाधितस्यचित्तस्यतद्दृश्यस्यवादर्शना राम
[illegible]पपद्यते। श्रीमच्छंकरभगवत्पूज्यपादाः[illegible]मनुत्पादयांबभूवुः। ब्रह्म
वेदोपनिषत्परमहंसाः[illegible]वेदान्तवाक्यविचार[illegible]प्रवर्त्ततेब्रह्मसाक्षात्कारायनतुयो १३५
गविचारेणेतिवदितिपोषनिराकरणेनतस्यान्य[illegible]ष्टितिकतमाधिकेन २९ श्रीकृष्णः

एवंशुद्धंत्वंपदार्थनिरूप्यशुद्धंतत्पदार्थनिरूपयति। योयोगीमामीश्वरंतत्पदार्थमशेषप्रपंचकारणंमायोपाधि[illegible]पाधिवि
वेकेनसर्वत्रप्रपंचेसद्रूपेणस्फुरणरूपेणचानुस्यूतंसर्वोपाधिविनिर्मुक्तंपरमार्थसत्यमानंदघनमनंतंपश्यतियोगजेनप्रत्य
क्षेणापरोक्षीकरोतितथासर्वंचप्रपंचजातंमायामय्यारोपितंमद्भिन्नतयामयैवेनेवपश्यतितस्यैवंविवेकदर्शिनोऽहं
तत्पदार्थोभगवान्प्रणश्यामीश्वरःकश्चिन्मद्भिन्नोऽस्तीतिपरोक्षज्ञानविषयोनभवामिकिंतुयोगजापरोक्षज्ञानविषयो
वे भवामियद्यपिवाक्यजापरोक्षज्ञानविषयत्वंत्वंपदार्थाभेदेनैवतथापिकेवलस्यापितत्पदार्थस्ययोगजापरोक्षज्ञानविष
सर्वंच यो मां पश्यति सर्वत्र सर्वं च मयि पश्यति तस्याहं न प्रणश्यामि स च मे न प्रणश्यति ३०
यत्वमुपपन्नमेवएवंयोगजेनप्रत्यक्षेणमामपरोक्षीकुर्वन्सचमेनप्रणश्यतिपरोक्षोनभवतिस्वात्माहिममसवि
द्वानतिप्रियत्वात्सर्वदाममदपरोक्षज्ञानगोचरोभवतियेयथामांप्रपद्यंतइत्युक्तेः। तथैवचशरशय्यास्थभीष्म
ध्यानस्थयुधिष्ठिरंप्रतिभगवतोक्तं। अविद्वांसमपिस्वात्मानमपिसंतंभगवंतंनपश्यतिअतोभगवान्पश्यन्नपितंन
पश्यतिसएनमात्मेदितोनपुनर्ज्ञानीनिश्चितःविद्वांस्तुसदैवसन्निहितोभगवतोनुग्रहभाजनमित्यर्थः। ३०
एवंत्वंपदार्थंतत्पदार्थंचशुद्धंनिरूप्यतत्त्वमसिवाक्यार्थंनिरूपयति। सर्वेषुभूतेष्वधिष्ठानतयास्थितंसर्वानु
[illegible]तमात्मानंमामीश्वरंतत्पदलक्ष्यंत्वंपदलक्ष्येणसहैकत्वमभेदमास्थितःघटाकाशोमहाकाशइत्यत्रेवा

गी॰टी॰६
१३५

पाधिभेदनिराकरणेन निश्चिन्वन् यो भजति अहं ब्रह्मास्मीति वेदांतवाक्यजेन साक्षात्कारेण परोक्षीभवति सो विद्वान् कार्यं सिद्ध
त्वात् जीवन्मुक्तः कृतकृत्य एव भवति यावत्तु तस्य बाधितानुवृत्त्या शरीरादिदर्शनमनुवर्तते तावत् प्रारब्धकर्मप्राबल्यात् सर्वकर्मसं
न्यासेन वा याज्ञवल्क्यादिवत् विहितेन कर्मणा वा जनकादिवत् प्रतिषिद्धेन कर्मणा वा दत्तात्रेयादिवत् सर्वथा येन केनापि रूपेण
वर्तमानोपि व्यवहरन्नपि स योगी ब्रह्माहमस्मीति विद्वान् मयि परमात्मन्यभेदेन वर्तते सर्वथा तस्य मोक्षं प्रति नास्ति प्र
तिबंधशंका। तस्य ह न देवाश्च नाभूत्या ईशत आत्मा ह्येषां स भवतीति श्रुतेः देवा महाप्रभावा अपि तस्य मोक्षाभवनाय

सर्वभूतस्थितं यो मां भजत्येकत्वमास्थितः सर्वथा वर्तमानोपि स योगी मयि वर्तते ३१
आत्मौपम्येन सर्वत्र समं पश्यति योर्जुन। सुखं वा यदि वा दुःखं स योगी परमो मतः ३२

नेशते किमुतान्ये क्षुद्रा इत्यर्थः। अत्र विदो निषिद्धकर्मणि प्रवर्तकयो रागद्वेषयोरसंभवेन निषिद्धकर्मासंभवेनैतदं
गीकृत्य ज्ञानस्तुत्यर्थमिदमुक्तं। सर्वथा वर्तमानोपीति। हत्वापि स इमांल्लोकान्न हंति न निबध्यत इतिवत् ३१
एवमुपसंहृतेपि तत्त्वावबोधे कश्चिन्मनोनाशवासनाक्षययोरभावात् जीवन्मुक्तिसुखं नानुभवति चित्तविक्षेपेण च दृष्टदुः
खमनुभवति सोपरमो योगी देहपाते कैवल्यभागित्वात् देहसद्भावपर्यंतं च दृष्टदुःखानुभवात्। तत्त्वज्ञानमनोना
शवासनाक्षयाणां तु युगपदभ्यासात् दृष्टदुःखनिवृत्तिपूर्वकं जीवन्मुक्तिसुखमनुभवन् प्रारब्धकर्मवशात् समाधेर्व्यु

पि
राम॰
१३५

त्थानकाले आत्मौपम्येन उपमा तेनात्मदृष्टांतेन सर्वप्राणिजातं सुखं वा यदि वा दुःखं समं तुल्यं यः पश्यति स्वस्या
निष्टं यथा न संपादयति एवं परस्याप्यनिष्टं यो न संपादयति प्रद्वेषशून्यत्वात् एवं स्वस्येष्टं यथा संपादयति तथा परस्या
पीष्टं यः संपादयति रागशून्यत्वात् स निर्वासनतया प्रशांतमना योगी ब्रह्मवित्परमः श्रेष्ठो मतः पूर्वस्मात् हे अर्जुन अत्र
तत्त्वज्ञानमनोनाशवासनाक्षयाणां क्रममभ्यासाय महान् प्रयत्न आस्थेय इत्यर्थः। तत्रेदं सर्वं द्वैतजातमद्वि
तीये चिदानंदात्मनि मायया कल्पितं वास्तवं ब्रह्मैव आत्मैवैकः परमार्थसत्यः सच्चिदानंदाद्वयो ब्रह्मास्मीति ज्ञानं तत्त्वज्ञानं
प्रदीपज्वालासंतानवद्वृत्तिसंतानरूपेण परिणममानमंतःकरणद्रव्यं मन इत्युच्यते। तस्य ना
शो नाम वृत्तिरूपपरिणामं परित्यज्य सर्ववृत्तिविरोधिना निरोधाकारेण परिणामः पूर्वापरपरामर्शमंतरेण स
हसोत्पद्यमानस्य क्रोधादिवृत्तिविशेषस्य हेतुश्चित्तगतः संस्कारविशेषो वासना पूर्वपूर्वाभ्यासेन चित्ते वास्यमानत्वा
त् तस्याः क्षयो नाम विवेकजन्यायां चित्तप्रशमवासनायां दृढायां सत्यपि बाह्ये निमित्ते क्रोधाद्यनुत्पत्तिः तत्र तत्त्व
ज्ञाने सति मिथ्याभूते जगति न रागविषाणादाविव धीवृत्त्यनुदयात् मनश्च दग्धेंधनवत् उपयोगाभावान्निरिंधना
ग्निवन्मनो नश्यति [illegible] संस्कारो द्वेधक [illegible] मि तस्या प्रतीतो वासना क्षीयते एवं [illegible] यां वास

गी॰टी॰६ नायं हेतुत्वभावेन क्रोधादिवदनुदयात् । मनोनाशं पतिनष्टं च मनसि शमदमादिसंपत्त्या तत्त्वज्ञानमुदेति । तत्त्वमुत्पन्ने तत्त्वज्ञाने राग
१३६ द्वेषादिरूपा वासना क्षीयते क्षीणायां च वासनायां प्रतिबंधाभावात्तत्त्वज्ञानोदय इति परस्परकारणत्वं दर्शनीयं । अतएव भग
वान्वसिष्ठ आह तत्त्वज्ञानं मनोनाशो वासनाक्षय एव च । मिथः कारणतां गत्वा दुःसाध्यानि स्थितानि हि । तस्माद्राघव यत्नेन
पौरुषेण विवेकिना । भोगेच्छां दूरतस्त्यक्त्वा त्रयमेतत्समाश्रयेदिति । पौरुषो यत्नः केनाप्युपायेन त्वयैवं संपादयिष्यामीत्येवंवि
धोत्साहरूपो निर्बंधः । विवेको नाम विविच्य निश्चयः तत्त्वज्ञानस्य श्रवणादिकं साधनं मनोनाशस्य योगः वासनाक्षयस्य
प्रतिकूलवासनोत्पादनमिति । एतादृशविवेकयुक्तेन पौरुषेण प्रयत्नेन । भोगेच्छायाः स्वल्पाया अपि हविषा कृष्णवर्त्मे
वेति । न्यायेन वासनावृद्धिहेतुत्वात् दूरतस्त्यक्त्वेति । त्रिविधो हि विद्याधिकारी कृतोपास्तिः अकृतोपास्तिश्च । तत्र यः उपास्य
साक्षात्कारपर्यंतामुपास्तिं कृत्वा तत्त्वज्ञानाय प्रवर्त्तते तस्य वासनाक्षयमनोनाशयोर्दृढतरत्वेन ज्ञानादूर्ध्वं जीवन्मुक्तिः
स्वत एव सिध्यति इदानींतनस्तु प्रायेणाकृतोपास्तिरेव मुमुक्षुरौत्सुक्यमात्रात्सहसा विद्यायां प्रवर्त्तते योगं विना चि रा॰म॰
त्तविवेकमात्रेणैव मनोनाशवासनाक्षयौ तात्कालिकौ संपाद्य शमादिसंपत्त्या श्रवणमनननिदिध्यासनानि संपा १३६
दयति तैश्च दृढाभ्यस्तैः सर्वबंधविच्छेदि तत्त्वज्ञानमुदेति । अविद्याग्रंथिः ब्रह्मत्वं हृदयग्रंथिः संशयाः कर्माण्यपि सर्व
कामत्वं मृत्युः पुनर्जन्म चेत्यनेकविधो बंधो ज्ञानान्निवर्त्तते तथा च श्रूयते । एतद्यो वेद निहितं गुहायां सोऽविद्याग्रंथिं विकि

रतीह सोम्य ब्रह्म वेद ब्रह्मैव भवति भिद्यते हृदयग्रंथिश्छिद्यंते सर्वसंशयाः । क्षीयंते चास्य कर्माणि तस्मिन्दृष्टे परावरे । सत्यं ज्ञानमनं
तं ब्रह्म यो वेद निहितं गुहायां परमे व्योमन् सोऽश्नुते सर्वान्कामान्सह ब्रह्मणा विपश्चितेति । तमेव विदित्वाऽतिमृत्युमेति यस्तु विज्ञान
वान्भवति समनस्कः सदा शुचिः । स तु तत्पदमाप्नोति यस्माद्भूयो न जायते । य एवं वेदाहं ब्रह्मास्मीति स इदं सर्वं भवति स सर्वं त्वं नि
ष्फलमाहार्यं । सेयं विदेहमुक्तिः सत्यपि देहे ज्ञानोत्पत्तिसमकालीना ज्ञेया ब्रह्म[illegible]तानामेतेषां बंधाना
मविद्यानाशे सति निवृत्तौ पुनरुत्पत्त्यसंभवात् अतः शो[illegible]भावात् तत्त्वज्ञानं तस्यानुवर्त्तते मनोनाशवासनाक्षयौ तु दृ
ढा[illegible] भोगप्रदेन प्रारब्धेन कर्मणा बाध्यमानत्वात्सवातप्रदेशप्रदीपवत्सहसा निवर्त्तेते । अत इदानींतन
स्तत्त्वज्ञानिनः प्राक्सिद्धतत्त्वज्ञानेन प्रयत्नापेक्षा किंतु मनोनाशवासनाक्षययोः प्रयत्नसाध्याविति । तत्र मनोनाशोऽ
संप्रज्ञातसमाधिनिरूपणेन निरूपितः प्राग्वासनाक्षयस्त्विदानीं निरूप्यते । तत्र वासनास्वरूपं वसिष्ठ आह । दृढभावनया
त्यक्तपूर्वापरविचारणं । यदादानं पदार्थस्य वासना सा प्रकीर्त्तिता । अत्र च स्वस्वदेशाचारकुलधर्मस्वभावभेदतद्गतापश
ब्दसुशब्दादिषु प्राणिनामभिनिवेशः सामान्येनोदाहरणं । सा च द्विविधा मलिना शुद्धा च । शुद्धा दैवीसंपच्छास्त्रसंस्का
रप्राबल्यात् तत्त्वज्ञानसाधनत्वेनैकरूपैव । मलिना तु त्रिविधा । लोकवासना देहवासना चेति । सर्वे जना यथा न निंदंति शास्त्रवासना ।
तथैवाचरिष्यामीत्यशक्यार्थाभिनिवेशो लोकवासना तस्याश्च कोऽपि लोकमाराधयितुं समर्थ इति न्यायेन संपादयितुमश
क्यत्वात् पुरुषार्थानुपयोगित्वाच्च मलिनत्वं । शास्त्रवासना तु त्रिविधा पाठव्यसनं बहुशास्त्रव्यसनं अनुष्ठानव्यसनं चे

तिकं मेधा मर्त्यं ह्वानस्य ह्वीलसोनिरोधस्य च प्रसिद्धा मलिनत्वं च स्याः क्लेशावहत्वात् पुरुषार्थानुपयोगित्वात् दुःखहेतुत्वाच्च जन्म
हेतुत्वाच्च देहवासनापि त्रिविधा आत्मत्वभ्रांतिर्गुणाधानभ्रांतिर्दोषापनयनभ्रांतिश्चेति तत्रात्मत्वभ्रांतिर्विरोचनादिषु प्र
सिद्धा मातृवल्लौकिकी गुणाधानं द्विविधं लौकिकं शास्त्रीयं च सम्यक्शब्दादिविषयसंपादनं लौकिकं गंगास्ना
नशालग्रामतीर्थादिसंपादनं शास्त्रीयं दोषापनयनमपि द्विविधं लौकिकं शास्त्रीयं च। चिकित्सकोक्तैरौषधैर्व्या
ध्यापनयनं लौकिकं वैदिकस्नानाचमनादिभिरशौचापनयनं वैदिकं एतस्याश्च सर्वप्रकारायाः मलिनत्वमप्रा
माणिकत्वादशक्यत्वात् पुरुषार्थानुपयोगित्वात् पुनर्जन्महेतुत्वाच्च शास्त्रप्रसिद्धं। तदेतल्लोकशास्त्रदेहवासना
त्रयमविवेकिनामुपादेयत्वेन प्रतिभासमानमपि विविदिषोर्वेदनोत्पत्तिविरोधित्वाद्विदुषो ज्ञाननिष्ठाविरोधि
त्वाच्च विवेकिभिर्हेयं। तदेवं बाह्यविषयवासना त्रिविधा निरूपिता आभ्यंतरवासना तु कामक्रोधदंभदर्पाद्यासु
रसंपद्रूपा सर्वानर्थमूलं मानसीवासनेत्युच्यते तदेवं बाह्याभ्यंतरवासनाचतुष्टयस्य शुद्धवासनया क्षयः संपाद
नीयः तदुक्तं वसिष्ठेन मानसीर्वासनाः पूर्वं त्यक्त्वा विषयवासनाः मैत्र्यादिवासनानाम्नीर्गृहाणामलवासना
इति। तत्र विषयवासनाशब्देन पूर्वोक्ता लोकशास्त्रदेहवासना विवक्षिताः मानसवासनाशब्देन काम
क्रोधदंभदर्पाद्यासुरसंपद्विवक्षिता यद्वा शब्दस्पर्शरूपरसगंधा विषयाः तेषां भुज्यमानत्वदशाजन्यः सं १२७

स्कारो विषयवासना काम्यमानत्वदशाजन्यः संस्कारो मानसवासना अस्मिन्पक्षे पूर्वोक्तानां चतसृणामनयो
रेवांतर्भावः बाह्याभ्यंतरव्यतिरेकेण वासनांतरासंभवात् तासां वासनानां परित्यागो नाम तद्विरुद्धमैत्र्यादिवासनो नो
त्पादनं तास्त्र मैत्र्यादिवासना भगवता पतंजलिना सूत्रिताः प्राक्तत्र्यपेक्षणाख्याता अपि पुनर्व्याख्यायंते। चित्तं हि रागद्वे
षपुण्यपापैः कलुषीक्रियते। तत्र सुखानुशयी रागः मोहादनुभूयमानं सुखमनुशेते कश्चिद्वृत्तिविशेषो रागः सः सर्वसु
यं खजातं मे भूयादिति तच्च दृष्टादृष्टसामग्र्याभावात्संपादयितुमशक्यं अतः स रागश्चित्तं कलुषीकरोति यदा तु सुखिषु प्रा
णिषु अयं मैत्रीं भावयेत् सर्वेप्येते सुखिनो मदीया इति तदा तत्सुखं स्वकीयमेव संबंधमिति भावयतस्तत्र रागो निवर्त्तते यथा
स्वस्य राज्यनिवृत्तावपि पुत्रादिराज्यमेव स्वस्य की। यं रा‍ज्यं तद्वत् निवृत्ते च रागे वर्षाव्यपाये जलमिव चित्तं प्रसीदति। तथा दुः
खानुशयी द्वेषः दुःखमनुशेते कश्चिद्वृत्तिविशेषः तमोनुगतरजःपरिणामः यदि दशसर्वदुःखं सर्वदा मे मा भूदिति तत्र शत्रु
व्याघ्रादिषु सत्सु न निवारयितुं शक्यं न च सर्वे ते दुःखहेतवो हंतुं शक्यंते अतः स द्वेषः सदा हृदयं दहति यदा तु स्वस्येव दुः परेषां
खं तेषामपि दुःखं मा भूदिति करुणां दुःखिषु भावयेत् तदा वैर्यादिद्वेषनिवृत्तौ चित्तं प्रसीदति। तथा च स्मर्यते। प्राणा यथा
त्मनोऽभीष्टा भूतानामपि ते तथा। आत्मौपम्येन भूतेषु दयां कुर्वंति साधवः इति एतदेवेहाप्युक्तं आत्मौपम्येन सर्वत्रेत्यादि।
तथा प्राणिनः स्वभावत एव पुण्यं नानुतिष्ठंति पापं चानुतिष्ठंति तदाहुः पुण्यस्य फलमिच्छंति पुण्यं नेच्छंति मानवाः। न पा
पफलमिच्छंति पापं कुर्वंति यत्नतः इति। ते च पुण्यपापे अक्रियमाणे क्रियमाणे च पश्चात्तापं जनयतः स च कृत्यानुदितः

गी·टी·६ किमहं साधु नाकरवं किमहं पापमकरवमिति यच्चसौ पुण्यपुरुषेषु मुदितो भावयेत्तदा तद्वासनावान् स्वयमेवाऽप्रमत्तोऽशुक्लाकृ
१३८ ष्णे पुण्ये प्रवर्तते। तदुक्तं कर्माशुक्लाकृष्णं योगिनस्त्रिविधमितरेषां। अयोगिनां त्रिविधं शुक्लं शुभं कृष्णमशुभं। शुक्लकृष्णं
शुभाशुभमिति तथा पापपुरुषेषूपेक्षां भावयन्स्वयमपि तद्वासनावान्पापान्निवर्तते तत्श्च पुण्याकरणपापकरणनि
मित्तस्य पश्चात्तापस्याभावे चित्तं प्रसीदतीति एवं सुखिषु मैत्रीं भावयतो न केवलं रागो निवर्तते किं तु सूयेर्ष्यादयोपि निवर्त
न्ते परगुणेषु दोषाविष्करणमसूया परगुणानामसहनमीर्ष्या यदा मैत्रीवशात्परसुखं स्वीयमेव संपन्नं तदा परगु
णेषु कथमसूयादिकं संभवेत् तथा दुःखिषु करुणां भावयतः शत्रुवधादिकरो द्वेषाय दानिवर्तते तदा दुःखिप्रति
नि क योगित्वसुखित्वप्रयुक्तद्वेषोपि निवर्तते एवं दोषान्तं निरुन्धि। बृहती या वासिष्ठरामायणादिषु तदेवं तत्त्वज्ञानं मनो वासिष्ठे
नाशो वासनाक्षयश्चेति त्रयमभ्यसनीयं तत्र केनापि द्वारेण पुनःपुनस्तत्त्वानुस्मरणं तत्त्वज्ञानाभ्यासः। तदुक्तं। त
च्चिंतनं तत्कथनमन्योन्यं तत्प्रबोधनं। एतदेकपरत्वं च तत्त्वाभ्यासं विदुर्बुधाः। सर्गादावेव नोत्पन्नं दृश्यं नास्त्येव तत् राम·
सदा। इदं जगदहं चेति बोधाभ्यासं विदुः परमिति। दृश्यावभासविरोधियोगाभ्यासः मनोनिरोधाभ्यासः तदु
क्तं। अत्यंताभावसंपत्तौ ज्ञातुर्ज्ञेयस्य वस्तुनः। युक्त्या शास्त्रैर्यतंते ये तेप्यत्राभ्यासिनः स्थिता इति। ज्ञातृज्ञेययो १३८
मिथ्यात्वधीरभावसंपत्तिः स्वरूपेणाव्यपनीतिः तत्ताभावसंपत्तिस्तदर्थं युक्त्यायोगेन। दृश्यासंभवबोधे
न रागद्वेषादितानवे। रतिर्घनोदिता यासौ ब्रह्माभ्यासः स उच्यते इति। रागद्वेषादिक्षीणता रूपवासनाक्ष

याभ्यास उक्तः। तस्मादुपपन्नमेतत् तत्त्वज्ञानाभ्यासेन मनोनाशाभ्यासेन वासनाक्षयाभ्यासेन च रागद्वेषशून्यतया यः स्वपरसुख
दुःखादिसमदृष्टिः स परमो योगी मतो यस्त्वविषमदृष्टिः स तत्त्वज्ञानवानप्यपरमो योगीति ३२ उक्तमर्थमाक्षिपन्नुः योयं स
र्वत्र समदर्शनरूपः परमो योगः साम्येन समत्वेन विज्ञातानां रागद्वेषादीनां विषमदृष्टिहेतूनां निराकरणेन त्वया सर्वज्ञेन
श्वरेणोक्तः। हे मधुसूदन सर्ववैदिकसंप्रदायप्रवर्तक एतस्य त्वदुक्तस्य सर्वमनोवृत्तिनिरोधरूपस्य योगस्य स्थितिं वि
द्यमानतां स्थिरां दीर्घकालानुवर्तिनीं न पश्यामि न संभावयामि अहं अस्मद्विधोऽन्यो वा योगाभ्यासनिपुणः। कस्मान्न सं

अर्जुन उवाच योयं योगस्त्वया प्रोक्तः साम्येन मधुसूदन एतस्याहं न पश्यामि चंचलत्वात्
स्थितिं स्थिरां ३३ चंचलं हि मनः कृष्ण प्रमाथि बलवद्दृढं तस्याहं निग्रहं मन्ये वायोरिव सु
दुष्करम् ३४

भावयामीत्याह। चंचलत्वान्मनस इति शेषः। ३३ सर्वलोकप्रसिद्धत्वेन तदेव चंचलत्वमुपपादयति चंचलं प्रकर्षेण चलं
सदाचलं न स्थिरभावं मनः हि प्रसिद्धमेवेत्युक्तानां पापादिदोषान्सर्वथा निवारयितुमशक्यानपि कुर्वति निवारयति तेषा
मेव सर्वथा प्राप्तुमशक्यानपि पुरुषार्थान्नाकर्षति प्रापयतीति वा कृष्ण कृष्णनरूपेण संबोधयन् दुर्निवारमपि चित्तचांचल्यं नि
वार्य दुष्प्रापमपि समाधिसुखं त्वमेव प्रापयितुं शक्नोषीति सूचयति न केवलमत्यर्थं चलं प्रमाथि शरीरमिंद्रियाणि च
प्रमथितुं क्षोभयितुं शीलं यस्य तत् क्षोभकं तया शरीरेंद्रियसंघातस्य विवशताहेतुरित्यर्थः किंच बलवत् अभिप्रेतात्

द्विषयात् केनाप्युपायेन निवारयितुमशक्यं किंच दृढं विषयवासनासहस्रानुस्यूततया भेत्तुमशक्यं । तंतुनागवच्छेत्तुमिति भाष्ये तंतु
नागो नागपाशः तांतणीति गुर्जरदेशप्रसिद्धो महाह्रदनिवासी जंतुविशेषो वा तस्यातिदृढतया बलवतो बलवत्त्वात् प्रमाथिनः
प्रमाथितयातिचंचलस्य महामत्तवनगजस्येव मनसो निग्रहं निरोधं निर्वृत्तिकतयावस्थानं सुदुष्करं सर्वथा कर्तुमशक्यम
हं मन्ये वायोरिव यथाकाशे दोधूयमानस्य वायोर्निश्चलत्वं संपाद्य निरोधेनमशक्यं तद्वदित्यर्थः । अयं भावः । जातेपि तत्त्वज्ञाने प्रार
ब्धकर्मभोगाय जीवतः पुरुषस्य कर्तृत्वभोक्तृत्वसुखदुःखरागद्वेषादिलक्षणश्चित्तधर्मः क्लेशहेतुत्वाद्बाधितानुवृत्त्यापि बंधो भव
ति चित्तवृत्तिनिरोधरूपेण तु योगेन तस्य निवारणं जीवन्मुक्तिरित्युच्यते यस्याः संपादनेन स योगी परमो मत इत्युक्तं तत्रेदमुच्यते बं
धः किं साक्षिणो निवार्यते किं वा चित्तात् नाद्यस्तत्त्वज्ञानेनैव साक्षिणो बंधस्यैव निवारितत्वात् । न द्वितीयः । स्वभावविपर्ययायोगा
त् विरोधिसद्भावाच्च नहि जलादार्द्रत्वं मणेर्वौष्ण्यं निवारयितुं शक्यते प्रतिक्षणपरिणामिनो भावा ऋते चितिशक्तेरिति न्यायेन
प्रतिक्षणपरिणामस्वभावचित्तस्य प्रारब्धभोगेन च कर्मणा कृत्स्नाविघातकार्यनाशेन प्रवृत्तस्य तत्त्वज्ञानस्यापि प्रतिबंधकत्वा
त्स्वफलदानाय देहेंद्रियादिकमवस्थापितं तेन च कर्मणा स्वफलसुखदुःखादिभोगार्थं चित्तवृत्तिर्विना संपादयितुं शक्यते तस्मा
द्यावदेहं स्वाभाविकानामपि चित्तपरिणामानां कथं वियोगेन निर्मूलतः शक्यते कर्तुं । तथापि तत्त्वज्ञानादिव योगादपि प्रारब्धफलस्य
कर्मणः प्राबल्यादवश्यंभाविनि चित्तस्य चांचल्ये योगेन तन्निवारणमशक्यं महत्त्वाबोधादेव मन्ये तस्मादनुपपन्नमेतदात्मौपम्येन 
सर्वत्र समदर्शी परमो योगी मत इत्यर्जुनस्याक्षेपः । ३४ तमिममाक्षेपं परिहरन् सम्यग्विदितं ते चित्तचांचल्यं तमतो निग्रहीतुं शक्यं
सीति संतोषेण संबोधयति । हे महाबाहो महांतो साक्षान्महादेवेनापि सह कृतप्रहरणौ बाहू यस्येति निरतिशयमुत्कर्षं सूच

यति । आरब्धकर्मणः प्राबल्यादसंयतात्मना दुर्निग्रहं दुःखेनापि निग्रहीतुमशक्यं प्रमाथि बलवद्दृढमिति विशेषणत्रयं अंगीकृत्यैतदुक्तं
चलं हि मन इत्येतच्चलं मनस्तस्य संशयो नास्त्येव संशयोऽत्र सत्यमेवैतद्ब्रवीषीत्यर्थः । एवं सत्यपि संयतात्मना धीमात्रोपायेन योगिनाभ्या
सेन वैराग्येण च गृह्यते निगृह्यते सर्ववृत्तिशून्यं क्रियते तन्मन इत्यर्थः । अनिगृहीतुरसंयतात्मनः सकाशात्संयतात्मनो निगृही
तुर्विशेषद्योतनाय तुशब्दः । मनोनिग्रहेऽभ्यासवैराग्ययोः समुच्चयबोधनाय चशब्दः । हे कौंतेयेति पितृष्वसृपुत्रत्वं वश्यं मदाशु भ
च ग्रहीतव्य इति स्नेहसंबंधमनेनाश्वासयति । अत्र प्रथमार्धेन चित्तस्य हठनिग्रहो न संभवतीति द्वितीयार्धेन तु क्रमनिग्रहः

श्रीभगवानुवाच । असंशयं महाबाहो मनो दुर्निग्रहं चलम् ।
अभ्यासेन तु कौंतेय वैराग्येण च गृह्यते ३५

संभवतीत्युक्तं । द्विविधो हि मनसो निग्रहः हठेन क्रमेण च । तत्र चक्षुःश्रोत्रादीनि ज्ञानेंद्रियाणि वाक्पाण्यादीनि कर्मेंद्रियाणि
च तत्तद्गोलकमात्रोपरोधेन हठान्निगृह्यंते तद्दृष्टांतेन मनोपि हठेन निगृहीष्यामीति मूढस्य भ्रांतिर्भवति न च तथा निगृ
हीतुं शक्यते तत्तद्गोलकस्य हृदयकमलस्य निरोद्धुमशक्यत्वात् अतएव क्रमनिग्रह एव युक्तस्तं दृष्टांतेन वसिष्ठ आह । उप
विश्योपविश्यैव चित्तज्ञेन मुहुर्मुहुः । न शक्यते मनो जेतुं विना युक्तिमनिंदितां । अंकुशेन विना मत्तो यथा दुष्टमतंगजः । अध्या
त्मविद्याधिगमः साधुसंगम एव च । वासनासंपरित्यागः प्राणस्पंदनिरोधनं । एतास्ता युक्तयः पुष्टाः संति चित्तजये किलास

तीषुयुक्तिष्वेतासुहठान्नियमयंतिये।चेतस्तेदीपमुत्सृज्यविनिघ्नंतितमोंजनैरिति।मनोनिग्रहेचाध्यात्मविद्याधिगमएक
उपायः।साहिदृश्यस्यमिथ्यात्वंदृग्वस्तुनश्चपरमार्थसत्यपरमानंदस्वप्रकाशत्वंबोधयति।तथाचसत्येनमनःस्वगोचरेषुदृश्ये
षुमिथ्यात्वेनप्रयोजनाभावंप्रयोजनवतिचपरमार्थसत्यपरमानंदरूपेदृग्वस्तुनिस्वप्रकाशत्वेनस्वागोचरत्वंबुध्यानिरिंधना
ग्निवत्स्वयमेवोपशाम्यति।यस्तुबोधितमपितत्त्वंनसम्यग्बुध्यतेयोवाविस्मरतितयोःसाधुसंगमएवोपायःसाधवोहिपुनः
पुनर्बोधयंतिस्मारयंतिच।यस्तुविद्यामदादिदुर्वासनयापीड्यमानोनसाधूननुवर्तितुमुत्सहतेतस्यपूर्वोक्तविवेकेनवासनापरि
त्यागस्त्वेवोपायः।यस्तुवासनानामतिप्राबल्यात्तास्त्यक्तुंनशक्नोतितस्यप्राणस्पंदनिरोधएवोपायः।प्राणस्पंदवासनयोश्चि
त्तप्रेरकत्वात्तयोर्निरोधेचित्तोपशांतिरुपपद्यते।तदेतदाहवसिष्ठः।द्वेबीजेचित्तवृक्षस्यप्राणस्पंदनवासने।एकस्मिंश्चतयोःक्षीणे
तनोद्वेअपिनश्यतः।प्राणायामदृढाभ्यासैर्युक्त्याचगुरुदत्तया।आसनाशनयोगेनप्राणस्पंदोनिरुध्यते।असंगव्यवहारि
त्वाद्भवभावनवर्जनात्।शरीरनाशदर्शित्वाद्वासनानप्रवर्तते।वासनासंपरित्यागाच्चित्तंगच्छत्यचित्तताम्।प्राणस्पंदनिरोधा
च्चयथेच्छसितथाकुरु।एतावन्मात्रकंमन्येरूपंचित्तस्यराघव।यद्भावनंवस्तुनोंतर्वस्तुत्वेनरसेनचयदाभावो[illegible]
द्धेयोपादेयरूपिणः।स्थीयतेसकलंत्यक्त्वातदाचित्तंनजायते।अवासनत्वात्सततंयदानमनुतेमनः।अमनस्तांतदोदे
तिपरमात्मपदप्रदेति।अत्रद्वावेवोपायौपर्यवसितौप्राणस्पंदनिरोधार्थमभ्यासःवासनापरित्यागार्थंचवैराग्यमिति।

म[illegible]संगमाध्यात्मविद्याधिगमावभ्यासवैराग्य[illegible]तयोरेवांतर्भवतः।अतएवभगवता[illegible]सेनवैरा
ग्येणचेतिद्वयमेवोक्तं।अतएवभगवान्पतंजलिरसूत्रयत्।[illegible]योगश्चित्तवृत्तिनिरोधः।वृत्तयःपंचतय्यःप्रमाणवि
पर्ययविकल्पनिद्रास्मृतयःइत्येवंपंचविधानामनंतानामासुरवृत्तीनांक्लिष्टानामक्लिष्टानामपिचित्तवृत्तीनांसर्वासांनि
रोधोनिरिंधनाग्निवदुपशमाख्यःपरिणामोऽभ्यासवैराग्याभ्यांसमुच्चिताभ्यांभवति।तदुक्तंयोग[illegible]चित्तनदीनामो
भयतोवाहिनीवहतिकल्याणायवहतिपापायच।तत्रयाकैवल्यप्राग्भाराविवेकनिम्नासाकल्याणवहा।याचाविवेक
निम्नासंसारप्राग्भारासापापवहा।तत्रवैराग्येणविषयस्रोतःखिलीयंतेविवेकदर्शनाभ्यासेनकल्याणस्रोतउद्घा कि
ट्यतइत्युभयाधीनश्चित्तवृत्तिनिरोधइति।प्राग्भारनिम्नपदेनतदाविवेकनिम्नंकैवल्यप्राग्भारंचित्तमितिव्याख्यातं।य
थातीव्रवेगोपेतंनदीप्रवाहंसेतुबंधनेननिवार्यकुल्याप्रवर्तनेन[illegible]क्षेत्राभिमुखंतिर्यक्प्रवाहांतरं[illegible]द्यते।
तथावैराग्येणचित्तनद्याविषयप्रवाहंनिवार्यसमाध्यभ्यासेनप्रशांतवाहितासंपाद्यतइतिद्वारभेदात्समुच्चय[illegible]
कद्वारत्वेहिव्रीहियववद्विकल्पःस्यादिति।मंत्रजपदेवताध्यानादीनांक्रियारूपाणामावृत्ति[illegible]रूपोऽभ्यासः[illegible]
वातिसर्वव्यापारोपरमस्यतुसमाधेःकोनामाभ्यासइतिशंकांनिवारयितुमभ्यासंसूत्रयतिस्म।तत्रस्थितौयत्नो
भ्यासइति।तत्रस्वरूपावस्थितेद्रष्टरिशुद्धेचिदात्मनिनिर्वृत्तिकस्यचित्तस्यप्रशांतवाहितारूपानिश्चलतास्थितिस्त

गी.टी.द्वि
१४१

स्थितौ यत्नो मानसउत्साहः स्वभावचंचलत्वाद्बहिःप्रवाहशीलं चित्तं सर्वथा निरोत्स्यामीत्येवंविधः स आवर्त्यमानोऽप्यासक्र
च्चेतो। स तु दीर्घकालनैरंतर्यसत्कारासेवितो दृढभूमिः। अनिर्वेदेन दीर्घकालासेवितो विच्छेदाभावेन निरंतरासेवितः सत्का
रेण श्रद्धातिशयेन वा सेवितः सोऽभ्यासो दृढभूमिर्विषयसुखवासनया चालयितुमशक्यो भवति। अदीर्घकालत्वे दीर्घ
कालत्वेऽपि विच्छिद्य विच्छिद्य सेवने श्रद्धातिशयाभावेन च लयविक्षेपकषायसुखास्वादैर्नामपरिहारे व्युत्थानसंस्का
रप्राबल्याद्दृढभूमिरभ्यासः फलाय न स्यादिति त्रयमुपात्तं। वैराग्यं तु द्विविधं अपरं परं च। यतमानसंज्ञा व्यतिरेक
संज्ञैकेंद्रियसंज्ञा वशीकारसंज्ञा भेदेन अपरं चतुर्धा। तत्र पूर्वभूमित्रयजयेनोत्तरभूमिसंपादनविवक्षया चतुर्थमेवात्रोच्य
ते। दृष्टानुश्रविकविषयवितृष्णस्य वशीकारसंज्ञा वैराग्यमिति। स्त्रियोऽन्नपानमैश्वर्यमित्यादयो दृष्टा विषयाः
स्वर्गो विदेहता प्रकृतिलयत्वादयो वैदिकत्वेनानुश्रविका विषयास्तेषूभयविधेष्वपि सत्यामेव तृष्णायां विवेकता
रतम्येन यतमानादित्रयं भवति। अत्र ते गतिकिं सारं किमसारमिति गुरुशास्त्राभ्यां ज्ञास्यामीत्युद्योगो यतमानं। स्वचि
त्ते पूर्वविद्यमानदोषाणां मध्येऽभ्यस्यमानविवेकेनेते पक्वा एते ऽवशिष्टा इति चिकित्सकवद्विवेचनं व्यतिरेकः। दृष्टानु
श्रविकविषयप्रवृत्तेर्दुःखात्मकत्वबोधेन बहिरिंद्रियप्रवृत्तिमजनयंत्या अपि तृष्णाया औत्सुक्यमात्रेण मनस्य १४२
वस्थानमेकेंद्रियं। मनस्यपि तृष्णाशून्यत्वेन सर्वथा वैतृष्ण्यं विशोधिनी चित्तवृत्तिर्ज्ञानप्रसादरूपा वशीकारसंज्ञा।

८८ क्ष।

[illegible] तस्य समाधेरंतरंगसाधनं [illegible] बहिरंगस्य [illegible] अंतरंगसाधनं [illegible] वैराग्यं तच्चासूत्रयत्। तत्परं पु
रुषख्यातेर्गुणवैतृष्ण्यमिति। संप्रज्ञातसमाधिपाटवेन गुण[illegible]काल्प्रधानाद्विवेकस्य पुरुषस्य ख्यातिः साक्षात्कार
उत्पद्यते तया अशेषगुणत्रयव्यवहारेषु वैतृष्ण्यं यद्भवति तत्परं श्रेष्ठं [illegible] वैराग्यं [illegible] परिपाकनिमित्ता [illegible] चित्तप्रशम
परिपाकादविलंबेन कैवल्यमिति ३५ यत्तु कमयोचः प्रारब्धभोगेन कर्मणा तत्त्वज्ञानादपि प्रबलेन फलदानाय [illegible] न
त्वाद्यमानासु कथं तासां निरोधः कर्तुं शक्य इति। तत्रोक्तमेव साक्षात्कारे वेदांतव्याख्याने नादि [illegible] ख्यादि
दोषाद्यभ्यासवैराग्याभ्यां। न संयतो निरुद्ध आत्मा अंतःकरणं येन तेनासंयतात्मना साक्षात्कारवतापि योगो मनोवृ
त्तिनिरोधः दुष्प्रापः दुःखेनापि प्राप्तुं न शक्यते।

असंयतात्मना योगो दुष्प्राप इति मे मतिः। वश्यात्मना
तु यतता शक्योऽवाप्तुमुपायतः ३६

प्रारब्धकर्मकृताच्चित्तचांचल्यादिति चेत्तत्र दर्शितमेव मे मतिः मम संमतिस्तत्रैवेत्यर्थः। केन तर्हि प्राप्यते इत्यत आह। वश्या
त्मना तु वैराग्यपरिपाकेन वासनाक्षये सति वश्यः स्वाधीनो विषयपारतंत्र्यशून्य आत्मांतःकरणं यस्य तेन तु शब्दोऽसं
यतात्मनो वैलक्षण्यद्योतनार्थोऽवधारणार्थो वा एतादृशेनापि यतता यतमानेन वैराग्येण विषयस्रोतः खिलीकर
णेऽप्यात्मस्रोतउद्घाटनार्थमभ्यासं प्रागुक्तं कुर्वता योगः सर्ववृत्तिनिरोधः शक्योऽवाप्तुं चित्तचांचल्यनिमित्ता

ध्यम

गी॰टी॰६॥ निप्रारब्धकर्मणाप्यभिभूयमाणाऽशक्यः कौंतेति बलवता[illegible]मारब्धभोगानां कर्मणामभिभवउच्यते। उपायतः स्या
२४२ यात् उपायः पुरुषकारस्तस्य लौकिकस्य वैदिकस्य वा प्रारब्धकर्मापेक्षया प्राबल्यात् अन्यथा लौकिकानां कृष्यादिप्रयत्न
स्य वैदिकानां ज्योतिष्टोमादिप्रयत्नस्य वैयर्थ्यापत्तेः सर्वत्र प्रारब्धकर्मसद्भाव विकल्पग्रासात् प्रारब्धकर्मसत्त्वे
तत एव फलप्राप्तेः किं पौरुषेण प्रयत्नेन तदसत्त्वे तु सर्वथा फलासंभवात् किं तेनेति। अथ कर्मणः स्वयमदृष्टरूपस्य दृष्ट
साधनसंपत्तिव्यतिरेकेण फलजननासमर्थत्वादपेक्षितः कृष्यादिषु पुरुषप्रयत्न इति चेत् योगाभ्यासेपि समं समाधा
नं तत्साध्याया जीवन्मुक्तेरपि सुखातिशयरूपत्वेन प्रारब्धकर्मफलांतर्भावात् अथवा यथा प्रारब्धकर्मफलं तत्त्व
ज्ञानाद्बलवदिति कल्प्यते दृष्टत्वात्तथा तस्मादपि कर्मणो योगाभ्यासः प्रबलोस्तु शास्त्रीयस्य प्रयत्नस्य सर्वत्र
ततः प्राबल्यदर्शनात्। तथा चाह भगवान्वसिष्ठः। सर्वमेवेह हि सदा संसारे रघुनंदन। सम्यक्प्रयुक्तात्सर्वेण पौ
रुषात्समवाप्यते॥ उच्छास्त्रं शास्त्रितं चेति पौरुषं द्विविधं स्मृतं। तत्रोच्छास्त्रमनर्थाय परमार्थाय शास्त्रितं। उच्छास्त्रं
शास्त्रप्रतिषिद्धं अनर्थाय नरकाय शास्त्रितं शास्त्रविहितं अंतःकरणशुद्धिद्वारा परमार्थाय तत्त्वबोधपूर्वकपरमा २४२
र्थाय मोक्षाय। शुभाशुभाभ्यां मार्गाभ्यां वहंती वासनासरित्। पौरुषेण प्रयत्नेन योजनीया शुभे पथि। अशुभेषु
समाविष्टं शुभेष्वेवावतारय। स्वमनः पुरुषार्थेन बलेन बलिनां वर। प्रागभ्यासवशाद्याति यदा ते वासनोदयं।

तदाभ्यासस्य साफल्यं विद्धि त्वमरिमर्दन। वासना शुभजेति योजः। संदिग्धायामपि सदा शुभामेव समाहर। शुभायां वासनावृद्धौ
